CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालगौरवम्

महाकाव्यम्



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् इति संस्थायाः द्वाविंशतितमं पुष्पम्

नेपालगौरवम् महाकाव्यम्

काव्यकारः
प्रा.डा.विष्णुप्रसादशर्मा देवकोटा

प्रकाशकम्
जयतु संस्कृतम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुस्तकनाम – **नेपालगौरवम् (महाकाव्यम्)**

रचनाकारः – प्रा.डा. विष्णुप्रसादशर्मा देवकोटा

प्रकाशिका – जयतु संस्कृतं संस्था

प्रकाशनवर्षम् – २०७९ नववर्षम्

प्रकाशनप्रतयः – पञ्चशतम्

सर्वाधिकारः – काव्यकारे

मुद्रक : किशोर अफसेट प्रेस प्रा. लि.

गल्कोपाखा, काठमाडौं–२६

ISBN : 978-9937-9491-2-5

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समर्पणम्



पितृनाम –लोकनाथः देवककोटा, मातृनाम –महाकाली (गोमा) देवकोटा

मज्जनकजननीकरकमलयोर्नेपालगौरवमहाकाव्यमनेन पद्यप्रसूनेन समर्पयामि -

सदा सौम्याकारौ विपदि सहजे वापि समये
अनीतेर्दूरस्थौ श्रमविरमणाच्चापि पितरौ ।
रतौ पुत्रस्नेहादवनभरणे दूरितसुखौ,
तयोश्चित्ते नित्यं वितरतु सुमोदं कृतिरियम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकीयम्

२००४ तमे विक्रमवर्षे एकतन्त्रीयस्य राणाशासनस्य विरोधे सर्वश्रीकस्य पूर्णप्रसादब्राह्मणस्य विमर्शे श्रीभद्रशर्म-राजेश्वरदेवकोटा-कमलराजरेग्मी-पद्मराजाधिकारि-काशीनाथ-गौतमानां नेतृत्वे सञ्चालितं जयतु संस्कृतमिति नामकम् आन्दोलनं नेपालस्य शैक्षिकराजनैतिकेतिहासे महत्त्वपूर्णं स्थानं रक्षति। २०५४ तमे विक्रमसम्वत्सरे तेन आन्दोलनेन स्वस्य पञ्चाशत्तमवर्षस्योपलक्ष्ये स्वर्णमहोत्सवस्यायोजनां विधाय २०५५ विक्रमसंवत्सरे तदान्दोलनं जयतु संस्कृतमिति संस्थायां रूपान्तरयित्वा अस्याः स्मरणे तीनधारापाकशालायाश्छात्रावासस्य वा अग्रे स्मारकस्तम्भः स्थापितः।

तस्य संस्थायां रूपान्तरितायां सत्यामनया प्राच्यभाषाधर्मसंस्कृति-परम्परामूल्यमान्यतानां संरक्षणसंवर्द्धने प्रचारश्च स्वस्याः प्रमुखमभियानं लक्ष्यीकृतम्। अथ च संस्कृतस्य लोकप्रियतां वर्धयितुं तस्य पठनपाठनयोः प्रक्रियां व्यापिकां सम्पादयितुं संस्कृतग्रन्थानां नेपाल्यां भाषान्तरेषु च अनुवादकार्यक्रमः कल्पितः। अनूदितानां प्रकाशनं संस्कृतस्य प्रचारप्रसारौ च कल्पितौ। नेपाल्याः संस्कृतेः सभ्यतायाश्च संरक्षणं तदर्थं गोष्ठी-प्रशिक्षण-कार्यशालानां सञ्चालनमित्येतादृशाः कार्यक्रमा आयोज्यमानाः सन्त्यनया।
अस्याः संस्थायाः प्रयासे नेपालस्य नेपालसर्वकारस्य च पुराणतमे समाचारप्रकाशने गोरखापत्रे दैनिके प्रतिमासं संस्कृतपत्रद्वयं २०७२ विक्रमवर्षस्य आषाढमासस्य प्रथमदिनतः (जयतु संस्कृतम् इति दिवसतः) पाक्षिकरूपेण प्रकाश्यमानं भजते। एवमेव जयतु संस्कृतमिति संस्थायाः प्रयासे २०७५ भाद्रस्य षष्ठगतदिनतो नेपालटेलिभिजनतः (नेपालदूरदर्शनतः) संस्कृतसमाचाराः प्रसार्यमाणाः विलसन्ति। लोकसेवाऽऽयोगे संस्कृतपत्रमेकं रक्षणीयमिति प्रयासे सर्वाणि पत्राणि साधारणानि कृतानि सन्ति। नेपालप्रज्ञाप्रतिष्ठाने संस्कृतविभाग-सञ्चालने, नेपालस्य मुक्तविश्वविद्यालये अन्येषु विश्वविद्यालयेषु च संस्कृतस्य विषयविभागान् स्थापयितुं प्रयासाः जायमानाः सन्ति। द्वन्द्वकाले पिहितद्वाराणां संस्कृतमाध्यमिकविद्यालयानां पुनःस्थापनायै संस्कृतगुरुकुलानां सुदृढतायै संस्थेयं सक्रिया वर्तते। उत्तरमहाभारतग्रन्थलेखने, संस्कृते मौलिकग्रन्थानां लेखने, तत्र प्रेरणाप्रदाने संस्थेयं सदा जागरुका अस्ति। संस्कृतनाटकानां लेखने तन्मञ्चने च संस्थेयं कार्यं कुर्वाणा वर्तते। रूपकाणां सङ्ग्रहः सम्पाद्यते चेत् नाटकानि प्राप्तानि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सन्ति रचनाकारेभ्यः। मौलिकस्य संस्कृतग्रन्थस्य प्रकाशितस्य च मूल्याङ्कनं विधाय तदाधारेण 'जयतु संस्कृतम्' इति पुरस्कारेण अद्यपर्यन्तं चतुर्दशविद्वांसः पुरस्कृताः सन्ति। संस्कृतवाङ्मयस्य सेवाया आधारेण च संस्कृतविद्वांसः जयतु संस्कृतम् इति सम्मानेन सम्मानिताः सन्ति। तत्र सम्मानिताः विद्वांसः सन्ति- डा. स्वामी प्रपन्नाचार्यः, आचार्यः प्रा.खेमराजकेशवशरणः, प्रा.डा. वेणीमाधवढकाल, प्रा विद्यानाथोपाध्यायः, शरत्कुमारभट्टराई, प्रा. शिवगोपालरिसाल, पुरुषोत्तमभट्टराई च।

जयतु संस्कृतमिति संस्थयैव थाइल्याण्डदेशे २०१५ तमे ईशवीयवर्षे षोडशतमे विश्वसंस्कृतसम्मेलने जाते नेपालेऽपि संस्कृतसम्मेलनमेतादृशं स्यादिति प्रतिनिधिद्वारा पत्रं सम्प्रेष्य कृतेऽनुरोधे सा प्रक्रिया अग्रे गता वर्तते। एतादृशस्य सम्मेलनस्य आयोजकेन सर्वकारीयेण विश्वविद्यालयेन भाव्यमिति व्यवस्थायाः सत्त्वात् पुनः जयतु संस्कृतम् इति संस्थया नेपालसंस्कृतविश्वविद्यालयः समनुरुद्धः। तदनुसारेण विश्वविद्यालयेन सर्वापि प्रक्रिया अग्रे सारिता, तदनुसारं वैक्रमाब्दस्य २०७५ आषाढमासे क्यानाडादेशस्य भ्यानकुवरमहानगरे सम्पन्ने विश्वसंस्कृतसम्मेलने नेपालस्य प्रस्तावः स्वीकृतः। अथ च २०१८ खीष्टाब्दे अत्र सम्मेलनं सञ्जातञ्चेत् तेन २०२४ तमे खीष्टाब्दे नेपाले तत्सम्मेलनं भविष्यतीति घोषितमासीत्। तदनु नेपालसंस्कृत-विश्वविद्यालयेन विश्वसंस्कृतसम्मेलनस्य नेपाले सम्पादनाय एका संयोजनसमितिश्च सङ्घटिता वर्तते। इदमपि कार्यं संस्थायाः सक्रियतायां सञ्जातम् इति आस्माकीनो विश्वासः।

भाषाऽऽयोगस्य पाठ्यक्रमविकासकेन्द्रस्य च ध्यानाकर्षणं संस्कृतसम्बन्धे कृतमस्ति। संस्थयानया संस्कृतलोकभाषाभियानमपि सञ्चालितम्। राष्ट्रियजनगणनायां संस्कृतमातृभाषाभियानञ्चाग्रे सारितम्। उच्चस्तरीयाय राष्ट्रियशिक्षाऽऽयोगाय (वि.सं २०७५) च अस्माभिः महत्त्वपूर्णाः परामर्शाः दत्ताः। तत्र अस्माभिः प्रत्तान् अनेकान् परामर्शान् स्वीकृत्य आयोगस्य प्रतिवेदनस्य २०-२१ अध्याये ते समाविष्टाः। एवञ्च साधारणशिक्षायां प्रथमकक्षातोऽष्टमकक्षापर्यन्तं संस्कृतपत्रस्य सन्निवेशाय अनया संस्थया महान् प्रयासः कृतः। एषु खलु सर्वेषु कार्येषु प्रा.डा. विष्णुप्रसादशर्माणोऽपि संस्थायाः उपाध्यक्षतया संलग्नाः सन्ति।

एभिश्च विद्वद्भिः लिखितमस्ति नेपालगौरवमहाकाव्यम्। इमे गोरखाजनपदीयाः सन्ति। एषां प्रारम्भिकी शिक्षा गोरखाजनपदे एवाभूत्। ततो भारतस्यायोध्यातः प्रथमातः शास्त्रिकक्षापर्यन्तं ततश्च वाराणसीतः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आचार्यपरीक्षा समुत्तीर्णा विक्रमस्य २०३१ तमे वर्षे। साहित्याचार्यपरीक्षापि ततः एव २०३४ तमे विक्रमवत्सरे समुत्तीर्णा। अनेन विदुषा त्रिभुवनविश्वविद्यालयतोः २०३७ विक्रमसंवत्सरे शिक्षाशास्त्रिपरीक्षा उत्तीर्णा। २०५२ तमे विक्रमसंवत्सरे अनेन विदुषा **'प्रक्रियाकौमुदी-सिद्धान्तकौमुद्योः समीक्षणात्मकमध्ययनम्'** इति विषये विद्यावारिधिरपि कृतो वर्तते।

एतेषामन्या कृतिर्व्याकरणप्रवेशिका वर्तते। विभिन्नपत्रपत्रिकादिषु प्रकाशिता अन्ये संस्कृत-नेपाली-हिन्दीभाषासु लिखिताः पर्वोत्सवमया विद्वद्जीवनी-भूताश्चानेके लेखाः सन्ति। तेषां संस्कृतलेखानां नेपालीभाषालेखानाञ्च सङ्ग्रहौ प्रकाशनोद्यतौ स्तः।

देवकोटामहोदयस्य काव्यरचना प्रौढा, पाण्डित्यपूर्णा च वर्तते। इमे हि कवयो भावसुकोमलताया अपेक्षया वैचारिकसघनतायामवगाहनं कर्तुमिच्छन्ति। इमे च महाकाव्यकारा ऐतिहासिकानामपि विषयवस्तूनां मौलिकानां निजात्मकानाम् अभिव्यक्तिप्रदानाय समर्था वर्तन्ते। प्रस्तुतं महाकाव्यमष्टादशसर्गेषु विभक्तमस्ति। अत्र च न्यूनावरतः १२०० श्लोकाः सन्ति। अत्र च द्रव्यशाह-रामशाह-पृथ्वीनारायणशाहानां गुरोर्गोरखनाथस्य, भगवतो बुद्धस्य चोदात्तं जीवनं तत्कार्याणि च वर्णितानि सन्ति। नेपालैकीकरणं दिव्योपदेशाश्च पृथ्वीनारायणस्य महाराजस्य महत्त्वपूर्णानि कृत्यानि सन्ति देशस्य हितकारकाणि। रचनाकर्तुरन्या अपि रचना आयान्तु इति आशासाना जयतु संस्कृतमिति संस्था शुभं तेषां कामयते, वर्धापनानि च प्रयच्छति -

अध्यक्षः
डा. बद्रीपोखेलः
जयतु संस्कृतम्
अनामनगरम्, काष्ठमण्डपः- ३२।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालगौरवं काव्यं गौरवाय प्रकल्पते

१. पृष्ठभूमिः

सँस्कृतसाहित्यस्य उत्पत्तेरितिहासेऽन्विष्टे आर्यसभ्यतायाः प्राचीनतम ऋग्वेदग्रन्थो दृष्टिगोचरीभवति। विचाराणां छन्दसाञ्च प्रारम्भ ऋग्वेदादेव सम्भूतोऽस्ति। प्राक्तनैः स्वकीयानि दिव्यानि चिन्तनानि वैदिककाल एव प्रकटीकृतानि। कर्गजस्य लेखन्याः लिप्या मस्याश्चाभावात्मके समयेऽपि गुहावृक्षमूलस्कन्धादिषु स्थित्वा चिरन्तनाः साधकाश्छन्दोमयान् दिव्यान् विचारान् उदगिरन् । ये च गुरुमुखाच्छ्रुत्वा विचारा शिष्योपशिष्य-परम्परया साधकजगति विस्तारमलभन्त। तदनन्तरञ्च लिप्या मस्याश्चाविष्कारस्य कारणात् स्थानात् स्थानान्तरं ग्रामाद् ग्रामान्तरं द्वीपाद् द्वीपान्तरञ्चार्षचिन्तनानि सम्प्राप्तानि।

परं लोके छन्दोबद्धायाः क्रमबद्धायाश्च रचनाया रूपेण सर्वप्रथमं वाल्मीकीयं रामायणं दृष्टिपथमवातरत्। एतस्य प्रसिद्धिर्लोके आदि-काव्यनाम्ना समभवत्। यस्य रचनाकार आदिकविर्महर्षिर्वाल्मीकिर्वर्तते। अनेनादिकविना भक्तिसूत्रे रामचरितपुष्पाणि गुम्फितानि। एवं छन्दोबद्धकाव्योद्यानस्य प्रथमो मालाकारो वाल्मीकिर्बभूव। येन तपोनिष्ठेन वाग्मिना च सर्वप्रथमं छन्दोबद्धः कारुण्यपूर्णश्च श्लोकः समश्लोकि -

मा निषाद प्रतिष्ठां त्वमगमश्शाश्वतीस्समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥ इति

एवंविधां श्लोकमयीं रचनां श्रुत्वा प्रसन्नस्य जगत्सर्जकस्य ब्रह्मणो भक्तिरसाचार्यस्य नारदस्य च विषयनिर्देशनमधिगत्य नारदेन कथितमध्याय-द्वयात्मकं रामायणीयं विषयवस्तु विपुलीकृत्य कथ्यवस्तुभिर्विस्तार्य चादिकवि र्महर्षिर्वाल्मीकिश्चतुर्विंशतिसहस्रश्लोकमितं रामायणं व्यरचयत्।

२. विषयप्रवेशः

आदिकवेर्वाल्मीकेः पूर्वं केवलं वेद एव छन्दांसि प्रयुक्तान्यासन्। वाल्मीकिना लैकिके काव्ये छन्दस्समवतारितम्। कथानायकं कोशलकुमारं कोशलराजञ्च राममवतार्य एतन्माध्यमेन वाल्मीकिना पितृभक्ति(भ्रातृप्रेम) समुत्कृष्टदाम्पत्य-प्रजावात्सल्यादीनामपूर्वं निर्देशनं संसूचनञ्च प्रस्तुतम्। अनेन गुणवृत्त्यलङ्कार-ध्वनिरसादीनां प्रयोगं विधाय भावकाः काव्यामृत-रसास्वादेनाकण्ठं निमग्नाः कारिताः । वाल्मीकेरनन्तरं पुराणसाहित्येन महाभारतेन च काव्यजगतः क्षेत्रं विस्तारितम्। रामायणं महाभारतं पुराणानि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च समस्तकाव्यवाङ्मयस्य उपजीव्यग्रन्था अभवन्, वर्तन्ते चाधुनापि । यथा च सागराद् यावति रत्नजाते समुद्धृतेऽपि एतस्य रत्नाकरत्वं न विच्छिद्यते तथैव रामायणाद् महाभारतात् पुराणेभ्यश्च यावत्सु विषयवस्तुषु समुद्धृतेषु सत्स्वपि अत्र विषयवस्तूनां नैयून्यं न दृग्गोचरीभवति जातुचित् । परं प्रचारं प्राप्य पल्लवितं पुष्पितञ्च भूत्वा लता वितानायते ।

रामायण-महाभारतपुराणानि चास्माकमार्षकाव्यानि । एतानि व्याकरणनियम -बद्धानि सन्त्यपि कतिपयस्थलेषु चात्र पाणिनेः सूत्रनियमा न परिपालिताः प्रतिभान्ति । अपाणिनीयानि वा पदानि प्राप्तावसराणि दृष्टिपथमागतान्यपि दृश्यन्ते । पूर्वभारतस्येदानीन्तन-पाकिस्तानदेशस्य शालातुर (लाहौर)स्थाने लब्धजनुषा पाणिनिना नेपालस्य अर्घाखाँचीजनपदस्य पणेनाग्रामे पूर्वं तपश्चरित्वा पश्चाच्चाष्टाध्यायीं विरचय्य पदानां शुद्धाशुद्धिविवेक-नियमा निर्धारिताः । तदनु तन्नियमान् अष्टाध्यायीं वानुसृत्य बहुशः काव्यानि प्रणीतानि, मुक्तकखण्डकाव्यानि, रूपकोपरूपकाणि, कथाख्यायिकाचम्पूकाव्यानि महाकाव्यानि च । अधुनापि प्रणीयमानानि सन्ति प्रणेष्यन्ते च पश्चादपि । कालिदासाश्वघोष-भारवि-माघ-क्षेमेन्द्र-श्रीहर्षाः सँस्कृतमहाकाव्याकाशस्य समुज्वलनक्षत्राणि सन्ति सदा प्रकाशमानानि । अष्टाध्याय्या नियमानाधृत्य रचितायां महाकाव्यश्रृङ्खलायां प्राध्यापकस्य श्रीविष्णुप्रसाद-देवकोटामहाभागस्य नेपालगौरवमित्याख्यं महाकाव्यं सँस्कृतमहाकाव्यक्षेत्रे नैपालक-कविविरचित-महाकाव्यश्रृङ्खलायां महत्त्वपूर्णं स्थानं बिभर्ति ।

३. नैपालकविदुषां महाकाव्यलेखनपरम्परा

किमिदं महाकाव्यम् ? मुक्तक-युग्मक-सान्दानतिक- कलापक-कुलकादौ एकद्वित्रिचतुःपञ्चात्मके तदधिकसंख्यावति वा पदसङ्घेऽपि, गुणरीतिवृत्तिरसालङ्काराणामुचितविन्यासस्य चामत्कारिकपदावल्याश्च संयोजनमावश्यकं मन्यते चेन्महाकाव्यविषये किं वक्तव्यम् ? केवलं पद्यसमूहमात्रेण यथाकथञ्चिद् रीत्यलङ्कारादिविन्यसनमात्रेण विषयवस्तूनामुपस्थापनमात्रेण वा न जातुचिदपि महाकाव्यस्य तत्त्वं कविजनानुमोदितं भवितुमर्हति । ऐतिहासिक-घटनाप्रदर्शनेन, यत्किञ्चित् प्राकृतिकचित्रणेन च महाकाव्यत्वं न सिद्धं भवति । प्रथमा प्रकृतेर्यथार्थस्वरूप-चित्रणक्षमता, द्वितीया पाठकमनसि प्रभावसर्जकता, तृतीया व्याकरणकोश-भूगोल-गजतुरङ्गमादिलक्षणाभिज्ञता, एवमेव प्रतिभायाश्चामत्कारिकप्रयोगः, रसानुकूलरचना-नैपुण्यम्, गुणरीत्यलङ्काराणां रसपरत्वेन विवक्षेत्यादयो मूलतो महाकाव्यस्य रचनासूत्राणि । केवलं विपुलाकारतया महाकाव्यत्वं न मन्यते । महच्च तत्काव्यमिति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्युत्पत्तिर्महदाकारत्वमपि अभिलषति इत्यन्यत्। महत्त्वं हि गुणरीत्यलङ्काररसेषु बोध्यम्। सहृदयहृदयाह्लादकं रचनालालित्यञ्च यत्र कविकर्मणि भवति तन्महाकाव्यमिति बोद्धव्यम्।

रचनायां रस-प्रवहणशीलतायां खण्डकाव्यादीन्यपि महाकाव्यवद् समादरभाञ्जि मन्यन्ते। यथा कालिदासस्य मेघदूतम्, अमरुककवेरमरुशतकम्, पण्डितराज-जगन्नाथस्य पञ्चलहर्यः जयदेवस्य गीतगोन्दञ्चेति। एतानि मुक्तक-खण्ड- काव्यानि रसमयत्वाद् महाकाव्यवदादरणीयानि सन्ति। तथापि नायक-नायिकादीनां सुचरित-प्रकृतिचित्रण-प्रभृतिविषयवस्तूनां बाहुल्यादपि महाकाव्यस्य महाकारताप्यपेक्ष्यते। वस्तुतो रसपरतन्त्रतयैव-महाकवेर्महाकाव्यता, न पद्य-संयोजनमात्रेण। अत एवाह- ध्वनिकारः- नहि कवेरितिवृत्तनिर्वहणेन किञ्चित् प्रयोजनमितिहासादेरेव तत्सिद्धेरित्यानन्दवर्धनो ध्वन्यालोके (३ उद्योते, १४ कारिकाया वृत्तिभागे)। तत्रैतदप्युक्तम् -

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ॥ इति च पूर्ववत्।

अनौचित्येन विना रसभङ्गो न भवति। औचित्येन योजनं रसस्य परा उपनिषद्। औचित्यं विभावानुभाव-व्यभिचारिभावानाम्। औचित्येन प्रयुक्ता नीरसा अपि विषया रसावहा भवन्ति। औचित्यरहिताः सरसा अपि विषया विरसा भवन्ति। कालिदासादीनां प्रबन्धान् वीक्ष्य स्वकाव्ये तथौचित्याय प्रयतनीयम्। तथात्व एव महाकाव्यमाह्लादजनकमनुभूयते।

४. नेपाले महाकाव्यलेखनपरम्परा

यद्यपि महाकाव्यस्य लेखनपरम्परा भारत एवोद्भूता विकसिता च। तथात्वेऽपि नेपाले च सँस्कृतस्य पठनलेखनपरम्परा लिच्छविकालत एव दृश्यते। राज्ञो मानदेवस्य चाँगुनारायणे स्थापितोऽभिलेखोऽलङ्कारमण्डितः कमनीयपदावली-गुम्फितश्चास्ते। नेपाले सँस्कृतभाषायास्सँस्कृतसाहित्यस्य च समृद्धावस्था तत एव तत्र ज्ञायते। लिच्छविकालिकाभिलेखेषु जयदेव-द्वितीयस्य पाशुपताभिलेखः साहित्यिकदृष्ट्या ऐतिहासिकदृष्ट्या च महत्वपूर्णः। अत्रत्यानि पद्यानि कविवरस्य बुद्धकीर्त्ते कीर्तिकौमुदी-द्योतकानि।

१७५० तमे वैक्रमाब्दे समुत्कीर्णः प्रताप-मल्लस्य कृष्णमन्दिराभिलेखश्च साहित्यिकवैशिष्ट्येऽनन्यताभाक्। मल्लशासन-काले नाटकमहाकाव्ययोः लेखनक्रमश्च प्रवर्धमानो दृश्यते। साहित्यसङ्गीतयोः विकासे मल्लकालः सातिशयं महत्त्वं धरति।

१. महाकाव्यपरम्परायां प्रथमतो नेपालस्य भक्तपुर-जनपदस्य राज्ञो जगज्ज्योतिर्मल्लस्य सभापण्डितो वंशमणिः सप्तदशसर्गात्मकं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्विचत्वारिंशदुत्तरनवशतश्लोकात्मकञ्च हरिकेलिमहाकाव्यं व्यरचयत्। जगज्ज्योतिर्मल्लः १६६८ तमे वैक्रमाब्दे राज्याधिरूढ आसीत्। अतो वंशमणिः १६७४ तमवैक्रमसम्वत्सरात् प्रागेव महाकाव्यमेतत् प्रणीतवानित्यनुमीयते। महाकविना स्वकाव्यस्य नाम कृष्णकाव्यमिति कथितम्- 'कृते तेन श्रीवंशमणिना कृष्णकाव्येऽतिभव्ये' इति।

श्रृङ्गाररस-प्रधानमेतन्महाकाव्यं श्रीकृष्णस्य गोपीभिः सह विहितया केल्या सह सम्बद्धं वर्तते। अत एव हरिकेलिरिति सार्थकं नामास्य महाकाव्यस्य। महाकाव्ये प्रा.डा.वेणीमाधव -ढकालमहाभागेन महता श्रमेण समीक्षात्मिका विस्तृता भूमिका लिखितास्ति। अनया सहितं महाकाव्यमिदं महेन्द्रसँस्कृत - विश्वविद्यालयेन २०५१ वैक्रम-वत्सरे प्रकाशितम्। द्वितीयो महाकाव्यकारः काशीनाथोऽस्ति।अनेन १६७५ विक्रमाब्दे षोडशसर्गात्मकं यदुवंशमहाकाव्यं व्यलेखि। महाकाव्यमेतन्नेपाल-प्रज्ञाप्रतिष्ठानतः प्रकाशितं वर्तते। महाकविना प्रसादगुणमय्यां वाण्यां यदुकुलस्य गौरवमत्र गीतं वर्तते।

२. एवञ्च १८८०. वैक्रमाब्दे भवदत्ततो भार्गवीगर्भतो लब्धजन्मा सुकृतिदत्तपन्तः १९२८तमे वैक्रमाब्दे कार्तवीर्योदयमहाकाव्यस्य प्रणयनमपूरयदिति महाकाव्यस्य सम्पादकः कृतविद्यावारिधिकः स्वामी प्रपन्नाचार्यो लिखति। बागलुङजनपद-निवासिना सुकृतिदत्तेन प्रणीतं सप्तदशसर्गात्मकमेतन्महाकाव्यं हैहयवंशस्य माहिष्मतीशासकस्य चक्रवर्तिनः कार्तवीर्यस्य चरितवर्णने केन्द्रितं वर्तते। महाविद्यायास्ताराया उपासनायाः फलस्वरूपेण अलौकिकविद्यायाः प्राप्तेः कारणान्नैषधसमं महाकाव्यमिदं प्रणेतुमहं प्राभवमिति महाकविरसौ समुल्लिखति। **नागेन्द्रनेत्रनवभूमितविक्रमाब्दे वैशाखमाससितपक्षतृतीयतिथ्याम्। श्रीकार्तवीर्यचरितोदितकाव्यमेतत् श्रीतारिणीकरुणया परिपूर्णमासीत्** ॥इति। (सप्तदशसर्गे पञ्चत्रिंशं पद्यम्)।

नैपालकमहाकविभिरधुनावधि प्रणीतेषु महाकाव्येषु कार्तवीर्योदय-महाकाव्यमुत्कृष्टतमं वर्तते। गुणरीत्यलङ्काराणां समुचितप्रयोगदृष्ट्या वीररस-योजनादृष्ट्या, अन्यरसानां यथोचित-समन्वयदृष्ट्या च महाकाव्यमेतत् सहृदय- हृदयावर्जकं वेविद्यते। अस्य महाकाव्यस्य रीति सन्निवेशमलङ्कारचमत्कारं माधुर्यादिगुणयोजनमार्यादर्शप्रकाशनं चित्रकाव्यनिदर्शनं वैदिकपरम्पराद्योतनञ्चेत्यालक्ष्य नेपालसँस्कृत-विश्वविद्यालयेन प्राध्यापकवर्गमाध्यमेन विविधविषयक - कार्यपत्राणां बहुधा लेखनं कार्यशालागोष्ठीनामायोजनं विद्यावारिध्युपाधये विद्यार्थिभ्यः परामर्शनञ्च विहितानि। सँस्कृत-विश्वविद्यालयस्य शास्त्रिस्तरस्य पाठ्यक्रमे कार्तवीर्योदयमहाकाव्यं हरिकेलिमहाकव्यञ्च समाविष्टे स्तः। एतेनापि महाकाव्यस्य नैपालकमहाकाव्यस्य च महत्त्वमुच्चतममाकल्यते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

३. महाकाव्यपञ्चकं विरचय्य कृष्णप्रसादघिमिरेमहाभागेन नैपालककवि-परम्परायाम् उच्चतमं स्थानं सुरक्षितमनुभूयते। अनेन लिखितानि पञ्च महाकाव्यानि चेमानि- (क) श्रीकृष्णचरितामृतम्। भगवतो रसेश्वरस्य श्रीकृष्णस्य बाल्यादारभ्य समग्रं चरितमत्र प्रसादगुणमय्यां शैल्यामुपस्थापितं विद्यते। महाकाव्यमेतद् भागद्वयात्मकं प्राप्यते।
(ख) नाचिकेतसम्- कठोपनिषदो नचिकेता-पात्रमधिकृत्य लिखितमिदं महाकाव्यम्। (ग) वृत्रवधम्- श्रीमद्भागवत-वृत्रासुरवधमधिकृत्य लिखितमिदं महाकाव्यम्। (घ) ययातिचरित्रम्- चन्द्रवंशीयराजस्य चक्रवर्तिनो ययातेश्चरितावलम्वि महाकाव्यमिदमुच्चतरम्। (ङ) पूर्णाहुतिः- युधिष्ठिरस्य राजसूययज्ञमधिकृत्य लिखिमिदं महाकाव्यम्।

(४) यज्ञदत्तसूरिः -पोखरानिवासिना यज्ञदत्तसूरिणा रचिते चन्द्रसम्भवमहाकाव्ये चन्द्रवंश्यानां महापुरुषाणामुदात्तानि चरितानि समुल्लिखितानि सन्ति नितराम्। (५) पूर्णप्रसादब्राह्मणः - विंश्यां शताब्द्यां गोरखाजनपदमलङ्कुर्वाणस्सन्नपि काष्ठमण्डपमहानरस्य ताहाचलस्थान-निवासी असौ २००७ विक्रमाब्दे **सत्यहरिश्चन्द्रमहाकाव्यं** प्रसादगुणसंयुतं व्यरचयत्। (६) हरिप्रसादाचार्यः- प्रतिष्ठानपुरजनपदस्य खैराग्रामाभिजनो दाङजनपद-निवासी हरिप्रसादाचार्यः शाहवंश्यानां राज्ञां चरितप्रकाशकं विंशतिसर्गात्मकं गोरक्षशाहवंशनामकं महाकाव्यं प्राणैषीत्। (७) भीमकान्तपन्थी- गुल्मीजनपदीयः काष्ठमण्डपस्य चावहीलस्थाननिवासी चायं जगदम्बिकावैभवम्, जगदीश्वरवैभवञ्चेति महाकाव्यद्वयं विरचितवान्। (८) भरतराजघिमिरे 'मन्थलीयः'- अयं हि २०१७ विक्रमवत्सरे महेन्द्रोदयमहाकाव्यं प्रणीतवान्। महाकाव्यमेतत् सरलं ललितम् अलङ्कारैरलङ्कृतञ्च विलसति। (९) दधिरामो मरासिनी- श्रीरामचरितामृतं श्रीकृष्णचरितामृतञ्चेत्यन्वर्थं सप्तसर्गात्मकं सुललितं भक्तिकाव्यं व्यरीरचत्। (१०) प्रा.डा. माधवभट्टराई- अयं हि पञ्चदशसर्गात्मकं माधुर्यगुणविभूषितं **सत्यसाईचरितमित्यन्वर्थं** महाकाव्यं प्रणीतवान्। (११) प्रा.डा.वेणीमाधवढकालः अष्टादशसर्गात्मकं **पृथूदयमहाकाव्यं** रचितवान्। एतन्महाकाव्यं श्रीमद्भागवत-महापुराणस्य राज्ञः पृथोः पृथिवीदोहनसम्बद्धं प्रजारञ्जनसम्बद्धञ्च चरितं समवलम्ब्य सुश्लोकितं राजते। (१२) प्रा.डा. विष्णुराज आत्रेयः - अनेन **हनूमदयननामकं** महाकाव्यं महाबलिनो हनुमतो लोकातिशयचरितमाश्रित्य प्राणायि। (१३) पशुपतिझा- अयं नेपालस्यैतिहासिकमहत्त्वख्यापकं महाकाव्यं व्यरचयत्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किं नामधेयं महाकाव्यम् ?

प्रा.डा. विष्णुप्रसाददेवकोटा-कविवरस्य नेपालगौरवमहाकाव्यात् पूर्ववर्तिभिः वाङ्मयसाधकैः कविभिर्लिखितानि सरसानि सुललितानि च महाकाव्यानि रचितानि दृश्यन्ते। महाकाव्यश्रेण्यां समुल्लिखितेषु सत्स्वपि कुलचन्द्रगौतमस्य **शोकमहोर्मिः, कृष्णकर्णाभरणम्, हरिवरिवस्या, भागवतमञ्जरी, वन्दनायुगलम्, आदर्शदम्पती सीतारामौ, गङ्गागौरवञ्चेति** काव्यानि महाकाव्यवद् रसगुणालङ्कार-विलसितानि सन्ति। एवमेव पण्डितराजसोमनाथ-सिग्द्यालस्य **आदर्शराघव-पुष्पाञ्जलिकाव्यं** रश्मिराज अर्यालस्य **सत्यनारायणकथामृतमिति** च महाकाव्यवदादरणीये वर्तेते काव्यतत्त्वविन्यासदृष्ट्या।

५. प्रकृतस्य नेपालगौरवमहाकाव्यस्य वैशिष्ट्यम्

प्राध्यापकस्य कृतविद्यावारिधिकस्य विष्णुप्रसाद-देवकेटामहाभागस्य पश्चात्कालिकं नेपालगौरवाभिधेयं महाकाव्यं प्राच्यसिद्धान्तानुकूलं स्वराष्ट्रस्य गौरवबोधकं तद्वर्धकञ्च प्रमुखशाहवंशीयराजानां योगदानसूचकं नेपालराष्ट्रस्य सौन्दर्यस्याधुनातनानां नेतॄणामदूरदर्शिता-स्वार्थान्धतादीनां सूचकं राष्ट्रनिर्माणनेतृभिः करणीयकार्याणां सम्बन्धे परामर्शदं पञ्चश्रीकस्य वृद्धमहाराजस्य पृथ्वीनारायणशाहस्य सुकार्याणां तदीयदिव्योपदेशस्य च महत्त्वबोधकम् आर्यसंस्काराणां राष्ट्रियसँस्कृतेश्च महत्त्वख्यापकं गुरुगोरखनाथ-मत्स्येन्द्रनाथ-गौतमबुद्धादीनां तपःस्थलत्वेन तेषामनुग्रह-पात्रत्वेनाशिःपरम्परया च राष्ट्रमिदं संरक्षितं समेधितञ्चेति विशेषताभिः विजृम्भितञ्च वर्तते। अत्रानेककाव्य-तत्त्वानां स्वाभाविकी समुपस्थितिर्दृश्यते।

६. नेपालगौरवमहाकाव्ये वृत्तप्रयोगः

अनुष्टुब्-वसन्ततिलका-मन्दाक्रान्ता-मालिनी-न्द्रवज्रोपजाति-वंशस्थ- शार्दूलविक्रीडितादीनि वृत्तानि प्रयुक्तानि दृश्यन्ते। अनेन कवेर्वृत्त-प्रयोगकौशलं सूच्यते। केवलमेकस्य द्वयोस्त्रयाणां वा वृत्तानां प्रयोगः सौष्ठवाय कल्पते। महाकाव्यमेतत् ऊनद्वादशशतमितश्लोकैः (११९८) सनाथितं वर्तते। सहस्राधिका श्लोकसंख्या सामान्यतो महाकाव्यस्य स्वरूपनिर्धारणाय पर्याप्ता मन्यते। महांकवेः कालिदासस्य कुमारसम्भवमहा-काव्यमपि १०९६ (षण्णवत्यधिकैकसहस्रपद्य)- मितं राजते। रघुवंशं बृहत्काव्यत्रये निर्धारितमिति तस्यान्या वार्ता।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालमातुर्वन्दनां विधाय प्रकृतमहाकाव्यस्य प्रणयनं प्रारब्धं विद्यते। सर्वत्र काव्ये विषयवस्तुबोधनं विकासादिस्थितीनां ज्ञापनञ्च मातृभूमिं सम्बोध्य तदर्थं विहितमस्ति। अतो महाकाव्यस्य परमा नायिका मातृभूरेवात्र बोध्या। मङ्गलाचरणे महाकाव्यकारेण श्लोकानां सप्तविंशतिराराचिता विलसति। अत्र च मङ्गलाचरणे भावध्वनिर्वर्तते। रतिर्देवादिविषया व्यभिचारी तथाञ्चितः। भावः प्रोक्तः इति मम्मटसिद्धान्तात्। आदिशब्दादत्र मुनिगुरुभूराज-पुत्रविषयिण्यां रतौ च भावो भवति, कान्ताविषयिका रतिस्तु श्रृङ्गार एव। महाकाव्यपरम्परायां नेपालगौरव-महाकाव्यस्य स्थानं महाकाव्ये कविकल्पितं चरितं सदपि न सर्वथा तत्कविकल्पितम् ऐतिहासिक-विषयाणां समावेशनात्। न सर्वथैवैतिहासिकञ्च सूत्रात्मकस्यैतिहासिक-वृत्तबीजस्य कविकल्पना-मूलजलमलप्राप्त्या लताप्रतानवद् प्रवर्धनात्।

(७) प्राच्यकाव्यसिद्धान्तदृष्ट्या नेपालगौरवमहाकाव्यसमीक्षणम्

प्राच्यालङ्कारिकसम्मतिः महाकाव्यस्य तत्त्वसम्बन्धे प्राच्यैस्सँस्कृतसमीक्षकैः कतिपयनियमा निर्धारिताः सन्ति। तन्निर्धारितनियमानां परिपालने महाकाव्यत्वं भवति नान्यथेति स्पष्टमुल्लिखितं तैः। तत्र महाकाव्यलक्षणं निरूपयन् कविराजो विश्वनाथ आह -

सर्गबन्धो महाकाव्यं तत्रैको नायकस्सुरः। सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः॥
एकवंशभवा भूपाः कुलजा बहवोऽपि वा। श्रृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते॥
अङ्गानि सर्वेऽपि रसास्सर्वे नाटकसन्धयः। इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्॥
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकञ्च फलं भवेत्। आदौ नमस्क्रियाशीर्वा स्तुतिनिर्देश एव वा॥
क्वचिन्मन्दखलादीनां सताञ्च गुणकीर्तनम्। एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः॥
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह॥ नाना वृतमयः क्वापि सर्गः क्वचन इष्यते।
सर्गान्ते भाविसर्गस्य कथायास्सूचनं भवेत्॥ प्रातर्मध्याह्न-मृगयाशैलर्तु-वनसागराः॥
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः। रणप्रयाणोपयम-मन्त्रपुत्रोदयादयः।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह॥

एतदेव महाकाव्यलक्षणं पौरस्त्यसमीक्षकसम्मतम्। एतदनुसारेण महाकाव्ये आवश्यकानि तत्त्वानीमानि निर्धारितानि प्राप्यन्ते -
(क) सर्गबद्धता- पद्यानि पूर्वापरक्रमेण सर्गेषु निबद्धानि स्युः।
(आ) उत्तमनायकोपस्थितिः- धीरोदात्तगुणान्वितस्योत्तम-कुलजस्य क्षत्रियस्यैकस्यैकवंशभवानां कुलजानां बहूनां भूपानां वा नायकत्वमावश्यकम्। (ख) एकोऽङ्गी रसस्श्रृङ्गारवीरशान्तेषु स्यात्। (ग) अन्ये रसा अङ्गत्वेन समावेशनीयाः। एवञ्च मुखप्रतिमुखप्रभृतीनां पञ्चानामेव सन्धीनां प्रयोगः स्यात्। (घ) ऐतिहासिकं सज्जनाश्रितं वा वृत्तं वर्णनीयम्। (ङ)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धर्मार्थकाममोक्षाश्चत्वारो वर्गाः पुरस्करणीयाः। न्यूनतोऽप्येकवर्गस्य फलं प्राप्तव्यं स्यात्। (च) नमस्काराशीर्वाद-वस्तुनिर्देशकात्मकानां मध्ये किमप्येकं मङ्गलमाचरितं स्यात्। (छ) कुत्रचिन्मन्दानां खलादीनाञ्च चरितमुपन्यस्तं स्यात्। सच्चरित्रन्तु सर्वत्रैव। (ज) एकस्मिन् सर्गे एकं वृत्तं प्रयोक्तव्यम्, सर्गान्ते च वृत्तान्तरं प्रयोज्यम्। (झ) अष्टाधिकाः सर्गा ये च नातिस्वल्पा नातिदीर्घाः स्युः।

(ञ) सर्गान्ते भाविसर्गस्य कथा संसूचनीया। (ट) प्रातर्मध्याह्नमृगया-शैलर्तुवनसागरा वर्णनीयाः। (ठ) नायकनायिकानां संयोग-विप्रलम्भमुनि-स्वर्गपुराध्वराणि वर्णनीयानि। (ड) युद्धप्रयाण-मन्त्रिपरामर्शन-पुत्रप्राप्त्यादीनि च यथायोगं वर्णनीयानि। एतदतिरिक्तमपि काव्यकर्त्रा महाकाव्ये समावेशाय यदौचित्यं स्वीक्रियते तत् समावेष्टुं शक्यमेव। पौरस्त्यैर्वाङ्मयसेविभिः सँस्कृतमहाकाव्यानि पुरुषार्थचतुष्टयप्राप्तिं लक्ष्यीकृत्य समाजोत्थानमङ्गीकृत्य सुखावसानं विचार्य च प्रणीतानि सन्तीति कारणादधुना यावत् संस्कृतमहाकाव्यं पौरस्त्यजगता निर्धारितेषु लक्षणेष्वेव केन्द्रीभूतं प्राप्यते।

प्राध्यापकेन कृतविद्यावारिधिना च विष्णुप्रसादाभिधेयेन प्रणीतं नेपालगौरवमपि निर्धारितलक्षणैर्लक्ष्यितं प्राप्यते स्वाध्ययनतः। यथा हि (क) अत्र खलु महाकाव्ये सर्ग-बद्धानि पद्यानि सन्ति अष्टादशपरिमलान्तर्गतानि। महाकाव्यप्रणेत्रात्र सर्गस्य स्थाने परिमलपदं रक्षितम्। परिमल इति सुवासः। तेन नेपालस्य गौरवभूतानां प्राकृतिकसौन्दर्याणां स्वसँस्काराणां गुरुगोरखनाथस्य विविधानुग्रहाणां द्रव्यसाहस्य तपसो रामसाहस्य नव-व्यवस्थायाः पृथ्वीनारायणस्य देशैकीकरणसमुद्योगस्य सुवासोऽत्र प्राप्यते। ११९८-मितपद्यैर्महाकाव्यस्य कलेवरमारचितं वर्तते। (ख) नायकबहुत्वम्। अत्र नेपालमाता प्रमुखा नायिका कविसम्बोद्धया वा वर्तते। ततोऽन्ये उपनायकाः सहनायका वा सन्ति -गौतमबुद्धः, गोरखनाथः, द्रव्यसाहः, रामसाहः, पृथ्वीनारायणसाहश्च। नेपालस्योन्नयने एभिर्महत्त्वपूर्णो योगो दत्त इत्यस्मात् कारणादेतेषामुल्लेखनपूर्वकं काव्यनायकत्वं सहनायकत्वकल्पनञ्चोचितमेव। (ग) प्रतिनायकानां सार्थकता - देवदत्तश्चित्रसेनौ, अग्नीवरुणौ, देवराज इन्द्रः, काली, भैरवनाथः, राजा शमसारो, एकीकरणविरोधिनः प्रतिपक्षराजानश्च प्रतिनायकाः। महाकाव्ये प्रतिनायकानां प्रतिकूलाचरणं पराजयश्च सम्यक् प्रदर्शिते इति प्रतिनायकत्वचित्रणं सार्थक्यं भजते।

(घ) एकरसता- महाकाव्ये वीररसोऽङ्गी, प्रकृतिचित्त्रण-श्रृङ्गाराद्भुतादयोऽङ्गरसा राजन्ते। गोरखनाथस्य रामशाहस्य पृथ्वीनारयणसाहस्य च शौर्यप्रदर्शनात् प्रतिपक्षिणो विजित्य नेपाले सुशासनस्थापनैकीकरण-विकासप्रवर्धनादि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रदर्शनादत्र वीररसोऽङ्गीरसः स्वीकर्तव्यो भवति। वृद्धमहाराजेन पृथ्वीनारायणाख्येन शौर्येण, देशनिष्ठया स्वात्मबलेन च नेपालराष्ट्रमेकीकृतं वर्तते।

(ङ) पञ्चसन्धिसमावेशनम्- बीजस्योत्पत्तौ मुखसन्धिरिति सिद्धान्तानुसारेण गोरखाराज्ये उपत्यकायां सीमितस्य नेपालराज्यस्यान्तर्भावः तेषामस्तित्वस्य विनष्टिर्वा यस्मिन् कस्मिन्नपि समये स्पष्टा आसीत्। तत्र गुरोर्गोरख-नाथस्याशीर्वादाद् मातुश्चन्द्रप्रभाया भ्रातृवर्गस्य कालुपाण्डे-वंशराजपाण्डे-रणजितबस्नेत-रामकृष्णकुँवर-प्रभृतीनां साहाय्यतया च नेपालराष्ट्रमेकीकर्तुं पृथ्वीनारायणसाहेनाभिव्यक्ता इच्छा मुखसन्धिरेव। मुखसन्धौ निविष्टस्य प्रधानफलस्य किञ्चिल्लक्ष्य इव चोद्भेदः प्रतिमुख - सन्धिरिति मान्यताया अनुसारेण गोरखनाथस्याशीर्वादाच्चन्द्रागिरित उपत्यकाया अवलोकनस्य पश्चाद् उपत्यकाया विजयस्य लमजुङप्रभृतिभिः प्रतिपक्षराज्यैः सह सन्ध्यादिसम्पादन-कार्यैरुपत्यकाया विजयो भावी, प्रतिपक्षस्य सशक्त-प्रतिकरणान्न भावीति च प्रदर्शनेन प्रतिमुखसन्धेः स्थितिरपि सुलभा।

फले प्रधानोपायस्य मुहुर्मुहुर्ह्रासान्वेषणवान् गर्भ इति सिद्धान्तानुसारेण पृथ्वीनृपतेर्गुरोर्गोरखनाथस्य च विविधविघ्नस्थित्या फलं प्राप्स्यते नेति अन्वेषणस्थित्या गर्भविमर्शसन्धिद्वयं सुलभम्। एकीकरणस्याधिककार्यस्य सम्पादनाद् गोरक्षनाथादीनां प्रतिपक्षवर्गस्य पराजयादुत्पन्नस्य फलस्य दृष्ट्या निर्वहणसन्धिरपिं सुस्पष्टतया परिलक्षित इति सन्धिपञ्चकमुपन्यस्तं कविनेति स्पष्टमभिधातुं शक्यते।

(ढ) ऐतिहासिकवृत्तस्यावश्यकता- महाकाव्येऽस्मिन्न् द्रव्यसाह-रामसाह-पृथ्वीनारायणसाह-गोरखनाथा ऐतिहासिकपात्रत्वेनोपन्यस्ता इत्यत ऐतिहासिकवृत्तं सुष्ठु परिपूरितम्। (छ) वर्गचतुष्टयस्य पुरस्करणम् - स्वदेशस्य समृद्धये स्वसंस्काराणां बोधपरिपालनाभ्यां स्वधर्मसंस्कृत्योः समनुष्ठानाय च तत्र धर्मार्थकाममोक्षाः पुरस्कृता विद्यन्ते इति तानि फलानि सुस्पष्टान्येव।

(ण) मङ्गलाचरणम् - मङ्गलं नाम विघ्नविनाशकत्वम्। तच्च सर्वेषां रचना-कर्तॄणामभीष्टमिति ते कुर्वन्त्येव शिष्टाचाररूपत्वादपि। तच्च पुराणानुसारेण- वन्दनं गुरुदेवानां ग्रहशान्तिर्द्विजार्चनम्। शुभद्रव्यावलोकश्च मङ्गलं परिचक्षते॥ इत्येवं रूपम्। नमस्काराशीर्वादवस्तुनिर्देशात्मकेषु च तेषु मातृभूमिं प्रणम्य नमस्कारात्मकं तद्विहितं कविनेति प्रभूतं तदस्त्येवात्र।
(त) वृत्तयोजनम् - एकस्मिन् सर्गे एकस्मिन् तदधिकेषु वा वृत्तेषु प्रयुक्तेषु सत्स्वपि सर्गान्ते भिन्नवृत्तस्य संयोजन-सम्बद्धो नियमः काव्यप्रणेत्रा सम्यक् परिपालितोऽस्ति। (ञ) सर्गाणां योजना - अत्र खलु नवतामानेतुं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सौन्दर्यस्यान्यस्य वा तथ्यस्य सारतामवबोधयितुं वा कविना सर्गादौ शीर्षकस्यारचनयां सर्गान्ते पुष्पिकावचनेषु च परिमलपदं प्रयुक्तं विलसति। अत्र च महाकाव्येऽष्टादशपरिमलाः सन्तीति अष्टाधिकसर्गयोजना परिपालितैव।

(ट) भाविवृत्तान्तयोजनम्- नेपालगौरवभूतानां कविकल्पित-तत्त्वानां श्रृङ्खलाबद्धतया वर्णनात् सर्गान्ते भाविवृत्तान्तस्य सूचनमपि प्रकाशमप्रकाशं वा विहितमेव वर्तते इति कथयितुं शक्यम्। सर्गाणां तत्तत्त्वबोधकानां क्रमिकतयापि तत्त्वं बोद्धुं शक्यमिति च।

(ठ) प्रातर्मध्याह्नादिप्रकृतिस्वरूपचित्रणम्- नेपालसौन्दर्यवर्णने गोरखनाथ-वनदेवीसम्वादादिषु च वनसम्पन्नदी-शैल-हिमालय-वर्णनात्प्रकृतिगतचित्रणं यथासम्भवं यथावश्यकञ्च कविना कृतमिति दार्ढ्येन कथयितुं शक्यते।

(ड) नायकनायिकादीनां संयोगविप्रयोगादिवर्णनम् - अत्र महाकाव्ये महानायिका परमनायिका वा नेपालभूदेवी नेपालजननी वा वर्तते; सर्वत्र वस्तुबोधने तस्या एव सम्बोधनात्। ततश्च योगिराजो गोरखनाथो द्रव्यसाहो रामसाहः पृथ्वीनारायणसाहः, कालुपाण्डे-प्रथमलक्ष्मणथापा च नायका मन्तव्याः। नेपालराष्ट्रस्य निर्माणे संरक्षणे प्रवर्धने चैतेषां महान् योगो वरीवर्ति। एतेषां राज्यविस्तार-गुरुसेवा-लोकरक्षेति कार्यबाहुल्यान्-नायकादिभिस्सह वियोगस्तु भूयो भूयो दृश्यत एव। संयोगोऽपि मध्ये मध्ये भवत्येवेति हेतोर्नायकनायिकादीनां संयोगवियोगवर्णनमौचित्येन सिद्ध्यति।

(ढ) प्रयाण-मन्त्रण-पुत्रोदयादिसूचनम्- एकीकरणाभियानस्य महासमरे सन्धिप्रयाणमन्त्रणादयो भूरिशो भवन्ति। षाड्गुण्यसिद्धान्ते सन्धिर्विग्रहः प्रयाण-कालो मन्त्रगुप्तिर्दुर्गसंरचना-रिपुच्छिद्रपरिज्ञानञ्चेति कृत्यानि युद्धस्य जयपराजययोः कारणानि भवन्तीति मनुशुक्रविष्णुगुप्तादयो व्याख्यान्ति। पृथ्वीनारायणो दूरदर्शी अक्लान्तो जागरूको ध्येयनिष्ठश्च राजाऽवर्ततेति हेतोस्तदीयचरितवर्णनक्रमे प्रयाणमन्त्रणादीन्यत्र वर्णितानि प्राप्यन्ते यथौचित्यम्। इत्थं महाकाव्यस्य आवश्यकानि पूर्वाचार्यनिर्धारितानि सर्वाण्यपि तत्वान्यत्र समाविष्टानि सन्ति।

८. नेपालगौरवमहाकाव्येऽलङ्कारयोजना

(क) नेपालगौरवमहाकाव्येऽलङ्काराणां स्थितेः समीक्षणम्- अलङ्क्रियत इत्यलङ्कारः, अलङ्करणमलङ्कारश्चेति व्युत्पत्त्या अलङ्कारपदेन शोभासाधनं शोभाकरणं वा बोध्यते। यथा च सुवर्णरजताद्याभूषणैर्वनिताया अङ्गानि सुशोभन्ते तथैवोत्प्रेक्षाद्यलङ्कारैरपि काव्यस्य शोभा वर्धते। यथाचौचित्येन धारितानि भूषणानि वनितां भूषयन्ति तथैवौचित्येन प्रयुक्ता अलङ्कारा अपि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काव्यं भूषयन्ति। रसा एव वस्तुतः काव्यस्य प्राणाः शोभाधायकाश्च, तदपि काव्ये यथौचित्यं विन्यस्ताः स्वयमापतिता वालङ्कारा रसोत्कर्षतायामेव पर्यवस्यन्ति।

(ख) अलङ्कारप्रयोगनियमा- अलङ्काराः काव्ये कथं प्रयोक्तव्याः का स्थितिर्महत्त्वं वा काव्येऽलङ्काराणामिति-विषये ध्वनिकारस्य नियमाः सान्दर्भिका मन्यन्ते। स चाह ध्वन्यालोके - **तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः। अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः करकादिवत्।** इति (द्वितीये उद्योते षष्ठी कारिका)। काव्यस्य जीवातुभूतं रसाद्यङ्गिनमाश्रित्य ये तिष्ठन्ति ते गुणाः। ये च वाच्यवाचकरूपाण्यङ्गान्याश्रित्य देहे कटकादिवत् तिष्ठन्ति तेऽलङ्काराः। एतत्कथनस्यानुसारेणालङ्काराः काव्यस्य वाच्यवाचकरूपमङ्गमाश्रित्यैव स्थातुमर्हन्ति। तथात्वेऽलङ्काराः काव्यशोभाधायका अन्यथा नेति बोद्धव्यम्।

(ग) ध्वनिकारदर्शिता नियमा अलङ्कारविन्यसने एवंरूपेण प्राप्यन्ते -

(अ) अङ्गाश्रितता- वाच्यवाचकरूपमङ्गमाश्रित्यैवालङ्कारा विन्यसनीयास्ते समापतिता वा स्युः। (आ) तत्परत्वेन विवक्षा-रसपरत्वेनैवालङ्कारा विवेचनीयाः। (इ) अङ्गित्वेन विवक्षणम् -कदाचिदपि प्रधानत्वेनालङ्कारा न विन्यसनीयाः। आदितोऽवसानं यावदलङ्काराणां निर्वहणेच्छा नैव स्यात्, नातिनिर्वहणैषिता भवतु। (उ) प्रयुक्ता अलङ्काराश्चाङ्गरूपेण सन्ति न वेति पर्यवेक्षितव्यम्। (ऊ) समये ग्रहणं समये त्यागश्च स्यात्। ईदृशान् नियमानाश्रित्यैवालङ्कारेषु प्रयुक्तेष्वलङ्काराणामलङ्कारता सिद्ध्यति। काव्यशोभाधायकता चोत्पद्यते। अन्यथा तेऽलङ्काराः काव्यस्य गडूभूता मन्यन्ते। अस्मिन् काव्ये येऽलङ्कारा भावा ध्वनयश्च प्रयुक्ताः सन्ति ते सर्वे रसपरत्वेनैव- अङ्गिपरत्वेनैव प्रयुक्ताः प्राप्यन्ते।

(क) अलङ्कारा भावा भावध्वनयश्च - मङ्गलाचरणपद्यानि सर्वाण्यपि भावध्वन्यन्तर्गतानि, देवादिविषया रतिर्भाव इति सिद्धान्तात्। विकासचिन्तन-नामधेये द्वितीयपरिमले उत्कीर्णानि पद्यानि प्रायो दैन्यनिर्वेदद्योतकानि। तत्रैकं पद्यमुदाह्रियते दैन्यध्वनितम् -

चेक्रीयन्ते परजनिजुषश्चान्नवस्त्रादिभोग्या,
नानाश्यन्ते निजसफलताशिल्पशैल्योऽतिमूल्याः।
अन्यासक्तान् प्रतिनिधिजनान् तादृशान् देशजाँश्च,
मातः स्वीयान् कुरु सपदि नः स्वावलम्बाग्रगण्यान्॥ (४२ तमं पद्यम्)

अन्यराष्ट्रैरुत्पादितानि अन्नवासः-प्रभृतिवस्तूनि पुनः पुनः समधिकमात्रायां क्रीयन्ते बहुमूल्या नैजशिल्पशैल्यो नानाश्यन्ते। मतं प्रदाय विजयवैजयन्त्या सनाथिताश्च जनप्रतिनिधयः परावलम्बिनः परामर्शाग्राहिणश्च सन्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जनाश्चपि परावलम्बनरज्जुसंनद्धाः सन्ति। अतो हे मातः ! एतान् स्वावम्बिनः कुरु, कारय च। एतेषां मनस्सु स्वावलम्बनस्य महत्त्वं तत्र निरन्तरताञ्च भरेत्यर्थः। अत्र परावलम्बितायां देशविकासः कथं भविष्यतीति दैन्यभावो ध्वन्यते। एवं निर्वेददैन्यभावयोः भावसन्धिसूचकं ललितं पद्यं यथा-

सेवादक्षा बलविलसिताः सम्यगुत्साहवन्तः,
पुत्रा नित्यं तरुणवयसश्चापि देशं त्यजन्ति।
औदासीन्यं प्रकृतविषये दृश्यते नेतृवर्गे
मातस्त्वत्को विकसनविधिस्तत्कथं पूर्तिमेतु ॥ २४५।

हे मातः ! बलिन उत्साहिनस्तरुणवयसश्च ते पुत्रा अन्यान् सम्पन्नदेशान् वृत्तये यान्ति। अस्मद्देशे तथाविधा उद्योगा न सन्ति, स्वकर्तव्यविषये नेतार उदासीना दृश्यन्ते। भो नेपालमातः ! एतद्देशस्य विकासविधिः कथमेवं पूर्णः स्यात्। अत्रान्यदेशेषु यूनां पलायनेन विकासाभावेन च निर्वेददैन्यभावयोः सन्धिस्सुतरां दृग्गोचरीभवति। अपरञ्च तथैव -

ज्ञात्वाऽवस्थां तव, विकसनं नेतृभिर्नो व्यधायि
भूभागानां स्थितिमनुहरन् नैव तेषां प्रयासाः।
तत्तद्भूमेःस्थितिमनुसरन् स्यात्त्वदीयो विकासो
मातस्त्वं स्यास्सपदि तुलिता साधुसम्पत्तियुक्तैः ।(२५०)

मातस्तव दुःखं बुद्ध्वापि नेतारश्चिन्तिता न सन्ति। तव भूभागाः परैर्हृताः सन्ति। परमेते प्रत्यावर्तनाय प्रयतमानाः न सन्ति। अन्यैर्वैदेशिकैः कथं देशविकासो व्यधायीति विचार्यानुकार्यं च योजनानिर्माणपूर्वकं कार्यं सविश्वासं सम्पादिते तव विकासः कथं न स्यात्? कथञ्चान्यैः साकं तव तुलना न स्यात्? एतन्न दृष्टमतोऽत्र निर्वेददैन्ययो-र्भावसन्धिश्चकास्ति। दैन्यालङ्कारस्योदाहरणं दृश्यतामनुभूयताञ्च -

अस्मद्दैन्याल्लघुविषयके याचने सम्प्रवृत्ते क्षुद्रैः स्वार्थैर्बहुविषयकैर्ग्रस्ततयाश्च सत्त्वात्।
साधून्नत्यै समुचितदृशो दक्षताया अभावाद्, दीना हीना परशरणगाः पीडिता मार्गरोधैः ॥
(२५१)

अस्माकं दीनतावस्था एतादृशी भयावहा वर्तते यत् क्षुद्रस्वार्थाय व्यक्तिगतस्वार्थाय च वयमन्येषां समक्षं याचनाञ्जलिं बध्नामः। समुचितदृशो दक्षतायाश्चाभावात् श्रमनैरन्तर्यविरहाच्चोन्नतिः शिथिलायितास्ति। वयं परशरणगाश्च स्मः। नक्रबन्धादिभिः पीडिताश्चेति भणितौ सत्यताऽस्त्येव। अयञ्च दैन्यभावो वाच्यायित एव। अतोऽत्र दैन्यालङ्कारः। उदात्तालङ्कारोऽपि काव्यशोभां प्रवर्धयन् भासते। यथा -

भावत्केऽथो खनिजनिचये दोहिते सत्प्रयुक्त्यै, सँस्कारादौ निजविषयके रक्षिते वर्धिते च।
हैमे चापि भ्रमणसुलभे वारिस्रोतः प्रयोगे, बुद्धादर्शे जनकचरिते ख्यापिते गौरवं ते ॥२५३

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवद्गर्भात् खनिजाते सत्प्रयोगाय दुग्धे, जनैः स्वसँस्कारेषु रक्षितेषु वर्धितेषु च हिमालयेषु पर्यटकानां प्रियेषु तैराधिक्येनाटितेषु जलस्रोतसां समुचितप्रयोगे विहिते जनकचरिते बुद्धादर्शे च विश्वस्मिन् विश्वे प्रचारिते तव गौरवं प्रख्यापितं भवत्येवेत्यर्थे पद्ये उदात्तालङ्कारोऽलङ्करोति कथ्यम्, उदात्तमृद्धचरितमिति सिद्धान्तात्। परं भावलक्षणे सप्तम्यन्तस्य प्रयोगादेतदुक्तं विषयजातं नास्तीति सूच्यतेऽतो दैन्यभावस्य द्योतनादुदात्तालङ्कारो दैन्यभावस्याङ्गं वर्तते। उदाहरणमिदं चौत्सुक्यहर्षयोर्भाव सन्धिसूचकम् -

सकलजनसुकार्ये जायमाने च नित्यं, बहुविधविषयाणां रोधनैरायतेश्च।
खनिजनिकृषिजानां विद्युतां विक्रयाच्च, भवति विपुलवित्ता मातृभूरस्मदीया ॥२९५

अत्र समस्तैरपि नेपालिभिः श्रमे विहिते बाह्यदेशतः क्रयणे विस्थापिते खनिजकृषिजन्येषु वस्तुषु विक्रीतेषु विद्युतो विक्रयाच्चास्माकं मातृभूरपि विपुलवित्ता भविष्यतीति उत्सुकताया हर्षस्य च प्रकटनादौत्सुक्यहर्षयोः भावसन्धिः शोभतेतराम्। एवं मातृभूसौन्दर्यवर्णनं स्वभावोक्त्या उदात्तालङ्कारेण च शोभनीयतमं दृश्यते। यथा -

गोदोहनी दुग्धचयैः प्रपूरिता दध्ना कलश्यो मधुना सुपूरिताः।
ग्रामेषु पाकालयसम्प्रयुक्ता वैशिष्ट्यमेता अनिशं वदन्ति ॥ ३।५।

श्लोकेऽस्मिन् ग्रामीणानां कर्षकाणां स्वाभाविकी चावस्था वर्णितास्ति। यथा च दुग्धेन भाण्डं प्रपूर्यते दध्ना मधुना च कलश्यस्काष्ठिक्यो वा प्रपूरिता भवन्ति। पाकालयेभ्यः सुवासः प्रसरति पाकालयानां शोभाञ्च वर्धयन्ते तानि पूर्णभाण्डानि। ग्रामीणानामेतद् वैशिष्ट्यं चकास्तीति स्वभावोक्तिः। सर्वेषां गृहेषु दधिदुग्धमधूनां सत्त्वादुदात्तश्चेति द्वयोस्तिलतण्डुलन्यायेन सत्त्वाच्छङ्करालङ्कारः काव्यशोभाधायकः। स्वभावोक्तेरपरमुदाहरणं यथा -

गौराङ्गिकाः प्राकृतरूपवत्यः, कुमारिका उन्नतयौवनाङ्कुराः।
स्वाभाविकाद् हिण्डनतश्च गोरसैश्शैत्येन पुष्टाश्च मनो हरन्ति ॥ (३।७)

प्रकृतिप्रदत्तरूपेण सुन्दर्यः सून्नतयौवनाङ्कुरा गोरसेन पुष्टाश्च कुमारिका युवजनमनो हरन्तीति स्वभावोक्तिः काव्यसुषमावर्धिनी। व्यतिरेकालङ्कारस्य दर्शनीया सुषमा च यथा -

सुरालये वासविधौ न मोक्षता, तदीयसम्प्रापणकर्म नात्र च।
अनन्यभावेन तदीयलब्धये त्वमेव भूदेवि मया विनिश्चिता ॥ (३।४६)
न यत्र दीपावलिसच्छटायुता ग्रामावलिः पर्वततुङ्गराजिता।
न शारदार्चाकृतटीकनाशिषौ नाहं समीहे भुवनं तथाविधम् ॥ (३।४८)

स्वर्गाद् मदीयभूरेव श्रेष्ठा यतो देवालयभूतस्वर्गे मोक्षो न भवति मिलति वा। तत्र भोगेनैव तपः पुण्यं वा समाप्तिमेति। अपरं कारणं तत्र

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महिमालया हिमालया न भवन्ति। प्राकृतिक्यो नद्यो न प्रवहन्ति। सञ्जीवनीवाहकाश्शैलाः न सन्ति। दीपावलिच्छटा न तत्र दृश्यन्ते। पर्वततुङ्गराजिता ग्रामावलिर्न वर्तते। शरदृतौ भगवत्या नवरात्रव्यापिनी पूजा तट्टीकाग्रहणमाशीर्वाद-ग्रहणञ्च मान्यजनेभ्यस्तत्र न भवतीति कारणाद् देवपुरितो मदीयजन्मभूरेवोत्कृष्टतरा। अत्रोपमायाः स्वर्गादुपमेयस्य जन्मभूमेराधिक्यदर्शनाद् व्यतिरेकः। व्यतिरेको विशेषश्चेदुपमानोपमेययोरिति सिद्धान्तात् । एतत् सत्यमपि, उक्तञ्च मनीषिभिः - **जननी जन्मभूमिश्च स्वर्गादपि गरीयसी** इति। एवंविध एव विचारोऽभिव्यक्तः श्रीमद्भागवते-महर्षिणा द्वैपायनेन -

किं दुष्करैः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना।
न यत्र नारायणपादपङ्कजस्मृतिः प्रमुष्टातिशयेन्द्रियोत्सवात्।
कल्पायुषां स्थानजयात् पुनर्भवात्क्षणायुषां भारतभूजयो वरम्।
क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयान्त्यभवं पदं हरेः॥ इति।

देवत्वं प्राप्तास्तपोजीविनोऽपि फल्गु द्युलोकं प्राप्य किं प्राप्तमस्माभिर्यत्र नारायणपदपङ्कजस्मरणं न भवति, इन्द्रियोत्सव एव कालो वयो वा क्षिप्यते। एतदपेक्षया चान्यलोकेषु कल्पायुषः प्राप्तेरपेक्षया च क्षणमायुः प्राप्य भारतवर्षाजिरे जनिप्राप्तिर्वरा, यतस्तत्र कृतं सर्वं कार्यजातं भगवते समर्प्यापुनरावृत्तिरूपा मुक्तिरधिगम्यते, अभयपदं मिलति इति गदन्ति। सत्यमेव, स्वजन्मभूमेरपेक्षया न स्वर्गः परं वैकुण्ठलोकोऽपि न्यूनायते। एकदेशवर्तिरूपकोदाहरणं यथा -

संसारदावानलसंपरीक्षणे भुवं कृषाणोऽपि प्रकृष्टभास्करे।
अदर्शि तेनैव ततश्च दुःखितो भवाटवीं हेयतमाममन्यत॥ (७३९)

अत्र संसारस्य दावानलकल्पनं भवस्याटवीत्वकल्पनमिति श्लोके एकदेशित्वेन रूपणाद् एकदेशविवर्तिरूपकं स्पष्टम्।

परिसंख्यालङ्कारस्योदाहरणं यथा -

भोगे रोगभयं सुखे क्षतिभयं वित्ते च राज्ञो भयं
स्पर्धायां कलिभीस्तपे करणभीर्विद्यास्वनीतेर्भयम्।
इष्टे शोकभयं यमान्मृतिभयं प्राप्तावलब्धेर्भयं,
तस्माल्लक्ष्यविधौ दृढास्तु जनता संविन्मयं निर्भयम्॥ (८५४)

अत्र परिसंख्यालङ्कारः - अन्यत्र निषिध्यैकस्मिन् वस्तुनि नियन्त्रिते परिसंख्येति सर्वालङ्कारिकसिद्धान्तात्। भोगादिषु रोगादिभयं भवत्येव। अभयता संविद्येवेति निर्धारणादत्र परिसंख्यासौन्दर्यमुद्भासते। ईदृशं परिसंख्यानमन्येषामपि कवीनां दृश्यते। **अर्थान्तरन्यासस्योदाहरणम्** - यावत्प्रहारनिकरमित्यादि दशमपरिमलस्य पद्यम्। अत्र इन्द्रप्रहारस्य निरोधनं श्रीगोरखनाथेन कृतमिति विशेषस्य योगबलास्तपस्विनो नहि प्रत्याक्रमन्तीति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाक्येन सामान्येन समर्थनं विहितमित्यर्थान्तरन्यासः काव्यशोभाधायको दृश्यते। अस्यैव परिमलस्य चतुस्पञ्चाशत्तमेऽपि पद्ये तादृशोऽर्थान्तर एव। बलिना निर्बलस्य जीवहरणं न विधातव्यमिति विशेषस्य सृष्टिञ्च सौख्यलतिकां नहि कोऽपि भिन्द्याद् इति सामान्येन वाक्येन समर्थनात्।

विरोधाभासस्योदाहरणं यथा -

असम्भवस्सम्भवतां प्रयाति वै सुदुर्लभो याति सुखेन लभ्यताम्।
दुर्गोऽप्यनायासतयाऽथ गम्यते ह्यसाध्यकं योगबलेन साध्यते॥ (१०।६०)

योगशक्तेरुदाहरणे प्रस्तुतमिदं पद्यम्। अत्रासम्भवस्य सम्भवता सुदुर्लभस्य सुलभता दुर्गस्य सुगमता कथमिति विरोधस्य योगबलादेतत् सम्भवमिति विरोधपरिहारादत्र विरोधाभासच्छटा भाति। एवमेतत्परिमलस्य ऊनत्रिंशे द्विचत्वारिंशे चतुःसप्ततितमे च श्लोके काव्यलिङ्गस्य शोभा चकास्ति, समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनमिति सिद्धान्तात्। अर्थालङ्कारस्य सम्राज उपमालङ्कारस्योदाहरणं यथा -

लग्ने श्रेष्ठे सकलविधिभिः शान्तयित्वा ग्रहादीन्
देवान् पूज्यानपि हृदयतः पूजयित्वा नरेशः।
लक्ष्म्या विष्णोरिव विहितवान्पाणिपीडां सुतस्य
देशोनन्त्यै निजजनिभुवश्चैकतायै विचार्य॥ (१७।६८)

विष्णुना लक्ष्मीरिव नरभूपालसाहेन पृथ्वीनारायणाख्यस्य सुतस्य कृते वंशोन्नत्यै देशैकतायै च मकवानपुरभूपपुत्री विवाहितेत्युपमालङ्कारः शोभतेतराम्। अत्र विष्णुरुपमानं लक्ष्मीरुपमेया इवेति वाचकपदम्। एवं विष्णुरुपमानं पृथ्वीनारायणसाह उपमेय इवेतिवाचकपदं वंशोन्नतिरेकता च साधारणधर्माविति चोपमालङ्कारः। अस्यैव परिमलस्य द्व्यशीतितमं पद्यञ्चोपमालङ्कारसौन्दर्यं पुष्णाति। पृथ्वीमल्ल इव पृथ्वीनारायणस्य शौर्यधनिकत्वं साधारणधर्मश्चेत्यत्रोपमानम्। गुणानां स्थितिः काव्यगतपद्यानि प्रायः प्रसादगुणसम्पन्नानि सन्ति। यथा च प्रसादगुणस्योदाहरणानि -

क्वचिच्छाया क्वचिद्धर्मः क्वचिद्धूमश्च वर्षणम्।
दृश्यते विविधं दृश्यं क्व ते श्रृङ्गात् सुसम्भवम्? (२।१७)

नेपालस्य भूभागेषु पर्वतश्रृङ्गात् समुच्चस्थलाद्वा क्वचिच्छाया क्वचिद्धर्मः क्वचिद्धूमशिखा क्वचिज्जलवर्षणञ्च दृश्यते इति तथ्यं सरलपदावल्यामुल्लिखितम्। अत्र सहजतयार्थः स्फुरतीति प्रसादगुणो गर्जति। एवमन्यत्रापि परिशीलनीयम्। अपरमुदाहरणम् -

गर्भधारणकष्टानि शिशुरक्षात्मिकानि वै।
जननी सहते सत्यं निस्स्वार्थमखिलानि च॥

अत्राप्यर्थस्य स्फुटतया प्रसादगुणता वेदनीया।

माधुर्यगुणस्योदाहरणमाकल्यताम् -

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भोगे रोगभयं सुखे क्षतिभयं वित्तेऽपि राज्ञो भयम्, ...
संविन्मयं निर्भयम् ॥८।५४ ।

माधुर्यस्य लक्षणं प्रस्तुवन् विश्वनाथ आह- मूर्ध्नि वर्गान्त्यवर्णेन मुक्ताष्टठडढवर्णरहिताः ककारादयो मकारान्ताः स्पर्शा वर्णा माधुर्यगुणव्यञ्जने कारणीभूताः। लघुना प्रयत्नेनोच्चार्यौ रण-वर्णौ च माधुर्यगुणव्यञ्जकौ। माधुर्यगुणाय सुकुमारवर्णा अपेक्ष्यन्ते। टठडढवर्णा दुस्श्रवत्वावहा भवन्तीति ते त्यक्ताः। दीर्घोच्चार्यौ रणवर्णौ च त्यक्तौ। यैर्वर्णैः रचनायां सौष्ठमापाद्यते तथाविधा वर्णा माधुर्ये चयनीया भवन्ति। अस्मिन् प्रासङ्गिकपद्येऽपि श्रुतिकटुवर्णा परिहृता मधुरवर्णाश्च स्वीकृताः सन्तीति कारणादत्र माधुर्यगुण-व्यञ्जकता सुस्पष्टैव। अपरमुदाहरणम् - **असम्भवः सम्भवतां प्रयाति..** इत्यादि-पद्येऽपि श्रुतिकटुवर्णपरिहारात् माधुर्यगुणः।
ओजोगुणस्योदाहरणम् -
ज्येष्ठानुभूतिसहितप्रवणप्रयोगे, देशे विकासलतिका लसतादबाधम् ।
अत्युच्चहैमशिखरायितवित्तसत्ता, जागर्तु ते जननि ! दीनविदेशदेया ॥ ६।६०)
अत्र रणशषवर्णानां संयुक्तवर्णानाञ्च प्रयोगेण वर्णप्रयोगदृष्ट्या उत्कृष्टायाः राष्ट्रभक्तेः प्रदर्शनादुद्भूतया दीप्त्या ओजोगुणो राजतेतराम्। समेषु गुणेषु प्रयुक्तेषु सत्स्वपि महाकाव्येऽस्मिन् प्रसादगुणो बहुत्र विलसति। काव्यरचनायां सौष्ठवं समानेतुमेतदुपयुक्तमपि।

(९) नेपालगौरवमहाकाव्ये रसयोजना

नेपालगौरवमहाकाव्ये रसयोजना रसस्थितिर्वा - नहि रसादृते कश्चिदर्थः प्रवर्तते - इति भरतमुनिः। काव्यस्यात्मा स एवार्थः इत्यानन्दवर्धनः। काव्यस्यात्मनि रसादिरूपे न कस्यचिद् विमतिरिति महिमभट्टः। वाक्यं रसात्मकं काव्यम् इति विश्वनाथः। **तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि** इति मम्मटः। पञ्चात्मके ध्वनौ परमरमणीयतया रसध्वनेरात्मा रस इति जगन्नाथ इति। एवं विधामभिव्यक्तिमभिव्यज्य विद्वद्भी रसरूप एवार्थः काव्यात्मत्वेनाङ्गीकृतो दृश्यते। मीमांसका नैयायिकाः सांख्या वेदान्तिनोऽपि रसरूपार्थं न त्यजन्ति, केवलं तेषां भणनशैली भिन्ना, भिन्नसम्प्रदायत्वाद् भिन्नप्रतिपाद्यत्वाच्च। रसः काव्यात्मेति सर्वैरालङ्कारिकैः सर्वदा स्वीकृतं तथ्यम्। रसेषु श्रृङ्गारवीरकरुणशान्ताः। काव्यमहाकाव्ययोः कथाख्यायिकारूपकादिषु च प्रायः प्रयुक्ताः सन्ति, सहृदयमनोमोदक्षमाः सामाजिकमानसाकर्षणक्षमाश्च।
रसपरिभाषा - रस्यते इति रसः। रसनं रस इति च व्युत्पत्त्या आह्लाद्यं वस्तु द्रवादिकं वा रस इति बुद्ध्यते। काव्येऽभिधालक्षणाभ्यामतिरिक्तया वृत्त्या गम्योऽर्थो रस इति मान्यता सिद्धान्तश्च। असौ व्यङ्ग्यपदेन च

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संबोध्यते । वाच्यलक्ष्यभिन्नोऽर्थो व्यङ्ग्यार्थः । व्यञ्जनावृत्त्या बोध्योऽर्थो वा व्यङ्ग्यः । लक्षणायां स्थितं प्रयोजनमपि व्यञ्जनयैवावबुध्यते । वाच्यार्थापेक्षया व्यङ्ग्येऽर्थे आधिक्येन चमत्कारोऽनुभूयते । स च चमत्कारो व्यञ्जना - वृत्तिगम्यो मन्यते । रसक्षेत्रम् - रसशब्देन बहवोऽर्था बुध्यन्ते । तरलपदार्थः खाद्यस्वादः, मधुरतिक्तकट्वम्ललवणकषायाः, प्रेम, आनन्दः, सौन्दर्यं, वस्तुसारः, पेयपदार्थः, पारदश्चेति । काव्यज्ञदृष्टौ श्रृङ्गारवीरकरुणाद्भुत-हास्यभयानकबीभत्सरौद्रशान्ता नवरसा बुध्यन्ते । काव्ये रसपदस्य कियत् क्षेत्रमस्तीति दर्पणकारः संकेतयति - **रसभावौ तदाभासौ भावस्य प्रशमोदयौ । सन्धिः शबलता चेति सर्वेऽपि रसनाद्रसाः ॥** इति (साहित्यदर्पणम् । ३।२५९)

रसरसाभास-भावभावाभास-भावोदय-भावसन्धि-भावशबलताः रसशब्देन कथ्यन्ते । रसधर्मयोगित्वाद् भावादिष्वपि रसत्वमुपचारादिति वृत्तौ दर्पणकारः स्पष्टीकरोति । रसधर्मयोगित्वादित्यस्य काव्यनाट्ययोरास्वादविषयत्वादित्यर्थः । भावादिष्वित्यत्र आदिशब्देन भावादीनां सप्तनिर्दिष्टानामेव ग्रहणम् । रसानुबन्धितया तत्रैवोपचाराश्रयणस्यौचित्याद् रस्यते इत्युक्तव्युत्पत्तियोगस्यापि तत्रैव तात्पर्यादिति दर्पणस्य लक्ष्मीटीकाकृट्टीकते । रसधर्मस्य सम्बन्धितया काव्येषु रूपकेषु चास्वादविषयतया च रसशब्देन रस-रसाभाव-भाव-भावाभास-भावोदय-भावशान्ति-भावशबलताः सप्त गृहीताः सन्ति दर्पणकृता । अतोऽस्मिन् महाकाव्येऽपि न केवलं श्रृङ्गारादयो नवरसाः परं रसाभास-भावादयश्च कथं सन्ति प्रयुक्ता इति च विवेचनीयं प्रतिभाति । मङ्लाचरणपद्यानि सन्ति पञ्चविंशतिमितानि । मङ्गलाचरणे नेपालमाता प्रणुता सम्बोधिता च वर्तते । यथा -

हिमवन्मुकुटाभिख्यां पर्वतस्तनमण्डलाम् ।
तराईपदपीठस्थां नुमो नेपालमातरम् ॥
सनातनेन धर्मेण सँस्कारैः प्रथया पुनः ।
सनातन्या च सँस्कृत्या सम्पन्नां मुनिवृत्तितः ॥ (१।१-२)

इत्यादिषु माङ्गलिकपद्येषु सभक्ति सश्रद्धञ्च नेपालमाता संस्तुता, यस्यास्स्वरूपं हिमालयश्रृङ्खलाशिरोभूतं सनातनसँस्कृत्या श्रुत्यनुकूलसनातनधर्मेण च मण्डितं वर्तते । अपरयोः सप्तमाष्टमपद्ययोराङ्गलशासनेन च दमयितुं पराजेतुञ्चाशक्या पृथ्वीनारायणसाहतदपत्यादिभिः साहस-श्रम-निष्ठाभिरेकीकृता च नेपालमाता वर्णिता । अतो **रतिर्देवादिविषया व्यभिचारी तथाञ्चितः** इति सिद्धान्तादत्र भावध्वनिः । निरङ्कुशैश्च राणाभिः क्षिप्तोऽप्यमूल्यकः इति सप्तदशाष्टादशपद्ययोः विकासस्य विरोधिना राणातन्त्रेण प्रताडिताया

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गणतन्त्रेण च प्राप्तपीडायाः सम्पन्नतास्वावलम्बनताभ्यां वञ्चितायाः केवलं सत्तायै लिप्सूनां वित्तोपार्जने प्रयतितवताञ्च शासकानां कुशासनमालक्ष्य - दुःखिताया नेपालमातुः दुःखवर्णनाद् दैन्यव्याधिविषादानां भावशबलताश्च ध्वनिर्ध्वन्यते ।

विकासचिन्तनाख्ये द्वितीये परिमले राजमार्गरिलमार्गाभ्यां विकासेन प्राकृतिकधार्मिकपर्यटनस्य वृद्ध्या खनिजतैलस्य उत्पादनेन अन्नानां प्रचुरेणोत्पादनेन शिल्पोद्योगानां प्रवर्धनेन जलविद्युच्छक्तेः प्रवर्धनेन तद्विक्रयेण च शिक्षायाः प्रचारणेन परिष्कारेण च वनस्य प्रवर्धनपूर्वकमौचित्यपूर्णोपयोगेन संस्कृतशिक्षायाः प्रचारानुसन्धानाभ्यां नीतिशीले प्रवर्ध्य च मातृभूमिर्विकासशिखरे नेतव्येति विचाराः प्रकटिताः सन्ति । यथा च - **सकलजनश्रमेषु जायमानेषु नित्यं .... मातृभूरस्मदीया** ॥९४॥ अत्र समस्तायाः जनतायाः श्रमेण बाह्यानां देशानां सामग्रीणामायातस्य निरोधेन खनिजकृषिपदार्थानां वृद्ध्या नैजानां विक्रयेण चास्मन्मातृभूर्विपुलवित्ता भविष्यतीति कथने चौत्सुक्यहर्षयोः भावयोर्भावध्वनिः ध्वनितोऽस्ति ।

मातृभूसौन्दर्यादिवर्णनाख्ये तृतीये परिमले पञ्चमषष्ठैकादशसु श्लोकेषु स्वभावोक्तिरुदात्तालङ्कारश्च स्तः । स्वभावोक्तौ वस्तुनो यथावद्वर्णनं विधीयते चेदुदात्ते उदारचरितं वर्ण्यते । अत्र पञ्चदशे श्लोके चौत्सुक्यभावो ध्वनितोऽस्ति । कथमिति चेत् ? विकासकार्याणां द्रुत्या परिपूर्तेः कामनायाः कारणात् । बुद्धोपदेशगौरवाभिधस्य सप्तमपरमलस्यैकादशे श्लोकेऽद्भुतरसः सर्वान् चमत्करोति । मातृकुक्षौ धरायां पदार्पणानन्तरमेव शिशुना पदसप्तकातिक्रान्तं लोकहिताय स्वाभाविकोऽस्तीति कथितञ्च । अस्यां भणितौ क्रियायाञ्चाद्भुतरस आस्वादविषयतां भजते । निवृत्तवानन्यदिनेषु इत्यभिधेऽष्टत्रिंशे श्लोके नगर्याः सौन्दर्यस्य विलोकनाय प्रयातवान् सिद्धार्थेत रुग्णमशक्तं वृद्धं मूर्च्छितं मृतञ्च दृष्टवान् । जनसमुदाये तद् हृदयविदारकमिति बीभत्सरसोऽङ्गी, निर्वेदभावश्चाङ्गत्वेन स्थितौ स्तः ।

तत्रैव त्रयस्त्रिंशे एकचत्वारिंशे च श्लोकयोः भवदावानलस्य निस्सारतायाः प्रकटनाच्छान्तरसो ध्वन्यते । निर्वेदभावोऽङ्गतया स्थितोऽस्तीति निर्वेदालङ्कारस्य वाच्यत्वम् । तत्रैव द्विसप्ततितमे श्लोके बुद्धस्यातिशयगुणवत्ताप्रदर्शनाद् भावध्वनिः । गोरखनाथः तदुपदेशगौरवनामकस्य नवमपरिमलस्य प्रथमे पद्ये भावध्वनिः, हठयोगिनो गुरोर्गोरखनाथस्य सश्रद्धं नमनात् । तत्रैवैकत्रिंशे श्लोकेऽपि भावध्वनिर्योगिराजानां गुणकीर्तनाद्, देव-गुरु-राज-भूविषयकरतेः सद्भवात् ।

गुरुगोरखादिन्द्रस्य पराजय इति नामके दशमपरिमले तपसा मत्स्थानं पदवीं वा नयतीति समाशङ्क्येन्द्रेण गोरखनाथस्य तपोभञ्जनाय नियुक्तयोः वरुणानलयोः स्वर्गणिकानाञ्च शक्तेर्विफलीभवनम् अनु कुपितेन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लज्जितेन चेन्द्रेण सह गोरखयतिवरस्य तुमुलयुद्धवर्णनादत्र समग्रोऽपि परिमलो वीररसाप्लुतो ऽस्ति । परमिन्द्रादीनामपेक्षया गोरखनाथस्य विशिष्ट-शक्तेः प्रदर्शनादेतस्य गुरुरूपत्वाद् ब्रह्मरूपस्य तस्य मोक्षस्याप्यनाकाङ्क्षिणो बोध्यतया बोधनस्य वस्तुतोऽत्र भावध्वनिः, यस्याङ्गभूतोऽस्ति वीररसः। वीररसोऽत्र गुणीभूतव्यङ्ग्ये रसाद्यलङ्कारे परिणतो वर्तते। अङ्गी तु भावध्वनिरेव। एकादशपरिमलः समग्र एव भावध्वनिसमलङ्कृतः। यतिवरस्य छिन्नकरचरण-युगलस्य राजकुमारस्य कृष्णस्य पूर्णाङ्गकरणप्रभृति-चमत्कार-प्रदर्शनात्।

द्वादशे परिमले महत्त्वप्रदर्शकपद्ये चत्वारिंशे मतिभावो व्यङ्ग्योऽस्ति। यथा च वनदेवी वदति योगिनाथं तद्भेदनं विनशनञ्च ममैव नाशस्तद्रक्षणं त्वथ परिष्करणञ्च पूजेति पद्ये नेपाले वनरक्षणं तस्य सम्पोषणञ्च वनदेव्याः पूजेति मतिर्ध्वनितास्तीति अत्र मतिभावव्यङ्ग्यत्वम्। गोरखनाथस्य नेपालानुग्रहः तत्सपर्यावर्णनाभिधे त्रयोदशपरिमले कथं नेपालस्य गोरखनाथेनानुग्रहो विहित इति प्रदर्शनात् समग्रोऽयं खण्डो देवविषयकरतित्वाद् भावव्यङ्ग्यरूपः। श्रीगोरखनाथानुग्रहकृतरामसाहकृत-शासनव्यवस्थायाः सिद्ध-लखनथापाभिधस्य उचितपरामर्शनस्य प्रदर्शने यतिवरस्यानुग्रहात् रामसाहलखनथापाभिधेययोः स्तवनीयकार्यप्रदर्शनादपि चतुर्दशपरिमले सर्वत्र भावध्वनिरस्ति, यतिवरं राजप्रवरं सिद्धलखन-थापाभिधञ्च प्रत्यादरप्रदर्शनात्।

गुरुगोरखनाथ नेपालका गौरव हुन्। त्यसैले ९-१२ परिमलमा गोरखनाथका विविध चमत्कारपूर्ण चरित्र र इन्द्रविजय, शमसारको तपस्याको फल कृष्णागारको पुनर्जीवन आदि घटनाहरू काव्यमा व्यक्त छन्। द्रव्य शाह, राम शाह र पृथ्वीनारायण शाह र यिनका कार्यहरू पनि नेपालका गौरव हुन्। त्यसैले यी तीन राजाहरूको वर्णनमा कविले काव्यप्रणयन गरेका छन्। प्रकृतिको संरक्षण, सामाजिक सद्भाव, जातीय एकता, राजनीतिक शुचिता, आर्थिक शुचिता, देशको विकास, सुख, शान्ति र समृद्धिको अभ्युत्थान हुनुपर्छ भन्ने पनि काव्यकारको सन्देश रहेको देखिन्छ। कहिलै कसैको पनि पराधीन नभएको नेपालको गौरवको उद्बोधन, राष्ट्रप्रेम र पौरस्त्य संस्कृतिप्रेमको काव्यात्मक अभिव्यक्ति दिनु नै प्रस्तुत काव्यको मूल सन्देश हो।

१५. उपसंहार

नेपालगौरवम् प्रा.डा. विष्णुप्रसादशर्मा देवकोटाको प्रथम महाकाव्य हो। देवकोटाका अनेक संस्कृत कविता, संस्कृत निबन्ध, लेखरचना, प्रकाशित भएका छन् भने संस्कृतका एकाङ्किनाटकहरू र शोधग्रन्थहरूसमेत प्रकाशोन्मुख रहेका छन्। संस्कृत व्याकरणका आधिकारिक विद्वान् देवकोटाले नेपाल र भारतमा गरी करिव ४० वर्ष संस्कृत व्याकरणको अध्यापन गराउनुभएको छ। विश्वविद्यालयका विभिन्न प्रशासनिक र प्राज्ञिक काममा पनि उहाँको संलग्नता रहँदै आएको देखिन्छ।

सरल र मृदुभाषी देवकोटाले वार्षिक रूपमा जयतु संस्कृतम् संस्थाले सञ्चालन गरेको संस्कृत कविगोष्ठीमा निरन्तर २४ वर्षसम्म कलम चलाउनुभएर काव्यप्रणयनमा अभिरुचि र अभ्यास बढाउनुभएको दृष्टिगोचर हुन्छ। संस्कृतको उद्गमभूमि नेपालमा लिच्छविकालदेखि मल्लकाल हुँदै हालसम्म पनि काव्यप्रणयनको धारा अविरल रूपमा बगिरहेको पाइन्छ। त्यसैको निरन्तरता यो महाकाव्य पनि हो। नेपालका सयौं प्रतिभाहरूले काव्यप्रणयन गरेको पाइन्छ। भरत र भामह हुँदै काव्यप्रणयनका अनेक सिद्धान्त र चिन्तनहरू अगाडि बढेको कुरा विज्ञ पाठकलाई अवगत नै छ।

रस, अलङ्कार, ध्वनि, छन्द, गुण, औचित्य आदि गरेका तत्त्वहरूलाई पनि सम्मान गर्दै प्रतुस्त काव्य प्रणयन गरेको देखिन्छ। कवि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रस, अलङ्कर, ध्वनि आदि मिलाउन कतै पनि कृत्रिम प्रयास गर्दैनन्। विषयप्रतिपादनमा केन्द्रित रहने कविका काव्यमा स्वाभाविक रूपमा रस, अलङ्कार, ध्वनि, गुण आदि स्वतः जे जति मिलेर आएका छन् तिनैमा चित्त बुझाउनुपर्दछ। काव्यमा नेपालको गौरव, पौरस्त्यसंस्कृतिको अगाध ममता र राष्ट्रप्रेम सशक्तरूपमा प्रस्तुत गर्न कवि सफल देखिन्छन्।

जयतु संस्कृतम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकृतस्य महाकाव्यस्य लेखनसन्दर्भः

इदं मत्कृतं काव्यं महाकाव्यमेव भविष्यतीति न मयावधारितमासील्लेखनवेलायाम् । देशविकासाभावप्रयुक्तं मध्यदेश-प्रवर्त्तितान्दोलनप्रसूतं तद्विषयकं वा लघुकाव्यं भविष्यतीत्यवधारितमासीत् । परं भगवत्कृपयायमाकारो लब्धो मत्कृतेन काव्येन । अध्ययनवेलातो मह्यं रचना रोचन्ते स्म । निबन्धप्रबन्धानुच्छेद-कवितालेखनानि मह्यं नितान्तं रोचन्ते स्म । वैक्रमाब्दस्य २०२५ समीपस्थवर्षेषु भारतेऽपि छात्राणामान्दोलनानि अमर्यादितान्यपि भवन्ति स्म । इदं सर्वं वृत्तमहमध्ययोध्यं पठन् समाचारपत्राणामध्ययनतो जानामि स्म ।

छात्रकर्तृके तद्देशीयभौतिकसामग्रीणां छेदनभेदने मां खेदयतः स्म । तल्लेखनप्रवृत्तेन मया 'छात्राणामुच्छृङ्खलताः' इति शीर्षके एको महाकायो लेखो लिखितः । स च 'सँस्कृतसाकेतः' इतिनामिकायामायोध्यिकायां प्रहितस्तत्र प्रकाशितश्च । कालान्तरे च विषयान्तरे सँस्कृते तत्र लेखाः प्रकाश्यन्ते स्म । हिन्द्यामपि तत्रत्यविरक्तादि-पत्रिकायां लेखाः प्रकाश्यन्ते स्म । सरस्वतीजयन्त्यां होलिकोत्सवे च ताभ्यां सम्बद्धाः सँस्कृतकविताश्च रच्यन्ते स्म । इदं मम काव्यरचनायां बीजम् ।

विक्रमाब्दस्य २०७२ तमस्य विनाशकारिभूकम्पैस्तराई-गतान्दोलनेन भारतीयनक्रबन्धेन च क्षतस्य विक्षतस्य च देशस्य दशा दुर्दशाश्च दर्शं दर्शं मम मानसमत्याहतमभवत् । अनेनाघातेन मम हृदि प्रसुप्तं काव्यबीजं प्ररूढं प्रसृतञ्चेति काव्यलेखने प्रवृत्तवान् । अत एवान्दोलनस्याकारणत्वं निष्प्रयोजनत्वं परप्रयोजितत्वमभिव्यक्तं देशविकासचिन्तने । देशविकासस्यात्यावश्यकत्वम्, तेनैव भूयसीनां समस्यानां समाधानमिति समभिव्यक्तम् । अतएवास्मत्सँस्काराणामस्मद्विशेषकाणां गौरवास्पदानां पालनीयत्वम्, देशविभूतीनां सम्माननञ्चात्यावश्यकमिति तत्र तत्र परिमले वर्णितम् । अथ च गुरुगोरखनाथस्य सिद्धतायास्तदलौकिकत्वानाञ्च कवनं विहितम् । द्रव्य-राम-पृथ्वीनारायणसाहानां कृत्यानां वर्णनं विहितम् । एवञ्च काव्यस्यास्य देशविकास एव गौरवजनको यथाशास्त्रं स्वसँस्काराणां पालनमनुष्ठानं वा विभूतीनां सम्माननं तत्कृत्यानां ज्ञानं तत्र कृतज्ञताप्रदर्शनञ्च गौरवजनकमिति धिया तत्तद्गौरवं श्लोकितम् । इदमेवास्य कविकर्मणः समुद्देश्यम् ।

मानवो मननशीलः । स मननं करोति, विचारयति, समीक्षते विमृशति च । स ज्ञातमनुभूतञ्चाभिव्यङ्क्तुमिच्छति, तदर्थं लिलिखिषति प्रवक्तुञ्चेच्छति । एवमेव स नैजं हर्षं तत्क्षयं वा प्रवक्ति रचयति श्लोकते च ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अविकासेनान्दोलनेन तदानीन्तनेन गौरवास्पदीभूतानां स्वसँस्काराणामुपेक्षया देशगौरववर्धकानां विभूतीनां विस्मरणेन च मम मानसमाहतमिति नेपालगौरवनाम्ना कवने प्रवृत्तोऽहम् । अत्र न समासां सीताभृकुटीमानदेवभानुभक्तादीनां विभूतीनां कवनं ममासामर्थ्यादसम्भवाच्च, किन्तु कतिपयानां द्रव्यसाहादीनामेव । अत्राध्यायार्थे परिमलपदं प्रयुक्तं वर्त्तते । परिमलश्च 'विमर्दोत्थे परिमलो गन्धे जनमनोहरे' इत्येवंरूपः । एवञ्च प्रकृते काव्ये मनसा विमर्दित एव तज्जः परिमलोऽनुभूतः स्यात्तद्भावकैर्मया च गुरुगोरखनाथादीनां स्वल्पमेव वैशिष्ट्यं चित्रितं तेषां सुरभिरेव पाठकहस्तगतो भविष्यतीत्यवधारितम् । नेपालगौरवपदे च गौरवं नेपालस्य महत्त्वं तदाधायकमित्येकोऽर्थः, गुरोर्गोरखनाथस्येदं गौरवमित्यपि बोधनीयं पाठकैः । मान्यानां द्रव्य-राम-पृथ्वीनारायणसाहादीनां देशैकीकरणादि चास्माकं कृते गौरवभूतमिति तदर्थमपि पदमिदं प्रयुक्तमिति चात्र विभावनीयम् । गुरुर्नेपालस्तद्वैशिष्ट्यञ्चात्र गौरवं मन्तव्यम् ।

प्रायेण सत्कार्येषु चान्तरायाः कार्यावरोधकाः समापतन्ति प्रायेण । इदं याथार्थ्यं ममोपरि चापतितम् । सुस्थमपि मानवमानसं २०७२ विक्रमसम्वत्सरस्य विनाशकारिभूकम्पेनास्वस्थीकृतम् । तत्रावर्षं पूर्वं महता परञ्च लघुना तेन नेपालस्तत्रत्यजनाश्च विभीषिताः कम्पिता ध्वस्ताः केचन मारिताश्च । अस्यां स्थितौ मनसो मतिष्कस्य हृदयस्य च विचालितत्वाच्चञ्चलत्वाच्च न किमपि बौद्धिकं कार्यं प्रारब्धम् । २०७३ विक्रमवर्षस्य पूर्वार्द्धे भग्नगृहोपकरणादि यथाशक्ति सम्पाद्य उद्धृत्य च तराइगतान्दोलनेन भारतीयेन नक्रपिधानपीडया च दुःखितं मनःसायासं लेखने प्रवृत्तम् । अनभ्यासेन मन्थरगत्या च प्रकृतकाव्यस्य केचन परिमलाः लिखिताः ।

एवमेव २०७४ विक्रमस्य श्रावणमासः काव्यकरणेन कार्यान्तरेण च व्यतीतः । तदनन्तरमस्यैव वर्षस्य भाद्रमासे गृहस्य पानीयस्य व्यवस्थार्थं विद्युत्सूत्रं सञ्चाल्य पानीयभरणभाण्डे तदवलोकनप्रसङ्गे पादयोः स्खनान् निपतत्य वामनयनोपरिभागे क्षतं जातं रुधिरञ्च प्रवहति स्म बहुलम् । प्राथमिकेषूपचारेषु रक्तस्रावोऽवरुद्धः । स्वस्थतामनुभवन् रात्रौ प्रतिदिनवत् शयितवान् । परं रात्रौ उपद्वादशवादनवेलायां वान्तं मया । स्खलनेन क्षते शरीरे तद्भागे वा रुग्णस्य वमनं मस्तिष्कभागे बाह्यरक्तस्य गमनं सूचयति । अतो यथाशीघ्रं सुविधासम्पन्ने रुग्णालये गन्तव्यमिति श्रुतं पठितञ्चासीन्मया । 'रेडियोलजी' इतिविषयं पठितवता तद्विषयस्य विशेषज्ञेण च मज्जेष्ठपुत्रेण डा.सन्देश देवकोटा इत्यभिधेयेन 'नेशनल इन्स्टिच्यूट अफ न्यूरोलोजिकल एण्ड एलाइड साइन्सेज' (उपेन्द्र देवकोटा मेमोरियल नेशनल इन्स्टिच्यूट अफ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न्यूरोलोजिकल एण्ड एलाइड साइन्सेज) इत्यत्र गन्तुं परामृष्टः सन् रात्रावेवाहं प्रापितस्तत्र ।

तत्राकस्मिकोपचारान् विधाय प्रतीक्षितुं परीक्षितुञ्च दिनद्वयं तत्र वासयित्वा गृहं मां विनिवर्त्तितवन्त उपचारकाः । अत्रावधौ अस्वाभाविकी शिरोवेदनाऽजायत । सप्ताहानन्तरं पुनस्तत्र गत्वा परीक्षणादिकं विहितवान् । तत्परीक्षणे मस्तिष्कं गच्छद्रक्तविन्दवो दृष्टा इति शल्यक्रिया एव तदुपचार इति निर्धारितं स्नायुरोगविशेषज्ञेन शल्यचिकित्सकेन च ससहयोगिदेवकोटामहोदयेन । ततस्तत्र भरणादिकं परीक्षणादिकञ्च विधाय तद्रात्रावेव शल्यचिकित्सा विहिता । तत्रासप्ताहं तत्रोपचर्य मां गृहं प्रैषयन् । तदनन्तरमपि ममासावधानतया चिकित्साया अपूर्णत्वाद्वा न शान्तो व्याधिः । शिरःपीडा जागरुकैव । पुनो द्विसप्ताहानन्तरमपरा सर्जरी जाता । तत्र दूषितं रक्तं नलिकामाध्यमेन क्षतसीवनानन्तरमपि कतिपयदिनानि यावद् बहिर्निष्कासितम् । ततः सप्ताहानन्तरं गृहं निवर्त्तितवान् ।

उपचर्योपचारकयोः सावधानतया मध्ये मध्ये चानुगमनञ्च कारयित्वा स्वस्थतां गच्छन्नपि आवर्षं बिभीतो विश्राम्यन्नारममाणश्चाभवम् । एवं सार्धवर्षमन्तरायेण भयेन च मम वीतम् । काव्यकरणमवरुद्धम् । भगवत्कृपया काव्यपूरणस्य लिखितत्वाच्चाहं जीवितः ।· देशस्य चास्माकञ्च दुर्भाग्येण सहस्राणां जीवको मम चिकित्सको देवकोटा आत्मानं जीवयितुमसमर्थोऽसमय एव कालकवलीकृतः । विधेर्विधानमिदम् । एवं विघ्नितोऽहं २०७५ विक्रमवत्सरस्योत्तरार्द्ध एव काव्यमिदमपूरयं सामान्यतया । तत्रापि मम कनिष्ठपुत्रस्याह्वानेन अमेरिकां गतवान् मासपञ्चकमित्यनेनापि काव्यरचना विलम्बिता । कोरोनाप्रभृतिभिरन्यैः कारणैश्चातिविलम्बितः । इदानीं प्राप्तावसरः कव्यं पूरितवान् ।

अत्र अष्टादश परिमलाः कल्पिताः सन्ति । अत्र च संबोध्या मातृभूर्वर्त्तते । तत्र प्रथमः परिमलो मङ्गलाचरणात्मको वर्त्तते । अत्र देशगौरवभूतानां स्वावलम्बनवर्धकानां भौतिकविकासानां चिन्तनं विहितं वर्त्तते द्वितीये परिमले । तृतीये खलु परिमले महिमालयेन हिमालयेन पर्वतमयेनोच्चावचभूभागेन तराइगतसमभूभागेन चालङ्कृतस्य देशस्य मनोहारिणः सौन्दर्यस्य वर्णनं विहितं वर्त्तते । चतुर्थे परिमले चास्मद्गौरुवभूतानां गुणवर्धकानां योग्यताधायकानाञ्च स्वसँस्काराणां वर्णनं विहितं विलसति गौरवप्रपूर्तये । । स्ववैशिष्ट्यख्यापकानां स्वसँस्काराणाञ्च गौरवास्पदत्वमेवेति तेषामपि नेपालगौरवभूतत्वमेव । पञ्चमषष्ठपरिमलयोश्च क्रमशोऽस्मद्गौरवभूतयोरेव विवाहान्त्येष्टिकर्मणोर्वर्णनं राजते । नेपाले प्रचलितानामेव सँस्काराणां कवनं वर्त्ततेऽत्र न तु सर्वेषां सँस्काराणाम् । तत्र

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कारणन्तु कालार्थक्षयाभ्यां सर्वेषां जनतया अननुष्ठानमेव । धर्मशास्त्रेषु वर्णितानां तेषामत्र वर्णनन्तु तद्भक्तिप्रदर्शनाय तेषां याथार्थ्यप्रदर्शनाय तद्हानोपादानकारणप्रदर्शनाय कविवाचा तन्महत्वबोधाय च ।

नेपालगौरवस्य सप्तमे परिमले च बुद्धोपदेशगौरवं वर्णितं राजते । नेपाले गौतमस्य बुद्धस्य जन्म तदुपददेशाश्चास्माकं गौरवास्पदीभूतम् । जीवानामहिंसनं पञ्चशीलता च बुद्धोपदेशभूता विश्वस्मिन् विश्वेऽद्यापि राजन्ते । एवं बुद्धस्य तदुपदेशानाञ्च गौरवास्पदत्वमेवेति तदत्र यथाशक्ति श्लोकितम् । तत्र लोकोत्तरत्वस्य निर्धारणन्तु समीक्षणाधीनम् । नेपालगौरवीयेऽष्टमे परिमले च स्वपितृव्यपुत्रस्य देवदत्तस्य बुद्धविषयिण्या विरोधितायाः श्लोकनं वर्त्तते । निन्द्यस्य स्वशिष्यकर्त्तृकस्य बुद्धमारणोपक्रमस्य वर्णनमत्रापूर्वं पठनीयं वर्त्तते । कठिनव्रतस्य (कट्टरपन्थिनः) देवदत्तस्य बुद्धभिक्षुकाणां कृते निर्धारिता नियमाश्चात्र वर्त्तन्ते ।

नवमे परिमले च गुरुगोरखनाथ–परिचयस्तदुपदेशा गोरखपुरस्थ–गोरक्षपीठस्य वर्णनं योगबलेन कालीविजयो भैरवनाथतान्त्रिक–विजयस्तदुपदेशो नागमण्युद्धारप्रकारश्च वर्णिताः सन्ति । दशमे च परिमले गुरुगोरखनाथस्य सिद्ध्या योगबलेन तत्कर्तृकसाधु–सज्जन–भोजनसपर्यया च भीतो देवराज इन्द्रो गुरुं योगिराजं गोरखनाथमाक्रान्तवान् प्रीत्यर्थभोजन–व्यवस्थापकं चित्रसेनञ्च अपहृतवान् । स च गुरुणा गोरखनाथेन योगबलेन पराजितः । आखेटक्रियया जन्तुमारणरतस्य भर्तृहरेरुद्बोधनादिवृत्तञ्चात्र वर्णितं वर्त्तते ।

एकादशे च परिमले भारतस्य दक्षिणप्रान्तस्य कस्यचन शमसाराभिधेयस्य राज्ञो वर्णनं विलसति । स हि पूर्वं शमशीलः सच्चरित्रश्चासीत् ।तस्य राज्यं समृद्धं सुखिप्रजञ्चासीत् । तस्य पत्न्या नाम मन्दाकिनी इत्यासीत् । तद्युगलमनपत्यमासीत् । तौ दम्पती स्वराज्यभारं सचिवेषु निधाय तपस्तप्तु वनं जग्मतुः । तत्र कठिनं तपस्तप्त्वा भगवत आशुतोषात् पुत्ररत्नमधिगतवन्तौ । तत्रत्यायाः कृष्णाया नद्यास्तटे तपतोस्तयोः पुत्रस्य प्राप्त्या स कृष्णागार इति नामितः । गच्छति काले स बालो वयसा विद्यया विनयेन च सम्पन्नो बालचन्द्र इव ववृधे षोडशवर्षीयश्च जातः । तदवधावेव तन्माता राजपत्नी चासाध्येन रोगेण ग्रस्ता दुर्दान्तकालकवलायिततां प्रयाता ।

शमसारस्य दुर्दिनानि प्रारब्धानि । गच्छति काले मन्त्रिभिरमात्यैश्च बोधितः परामृष्टश्च चित्रकूटस्य राज्ञो भुजकवचस्य कन्यां विवाहितवान् । पुत्रःकृष्णागार इदानीं विवाहिता द्वितीया पत्नी च समानवयसावास्ताम् । कृष्णागारः शमसारेण पित्रा स्वपत्न्या नवोढाया तन्मातुर्बलात्कारस्यारोपेणावास्तविकेन दुर्दान्तेन दण्डेन दण्डितः । तस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पाणिपादं खण्डितम् । स एव गुरुगोखनाथकृपया छिन्नाङ्गोऽपि साङ्गःसन् चौरङ्गिनाथः संवृत्त इत्यादि महाकाव्याध्ययनतोऽवधेयम् । द्वादशे परिमले च तस्यैव चौरङ्गिनाथस्य वृत्तं तस्य पाङ्गूलसम्प्रदायस्य प्रवर्त्तकत्वं वनदेवीवृत्तवर्णनञ्च विलसति ।

त्रयोदशे च परिमले द्रव्यसाहस्य गोरक्षनाथकृतानुग्रहवर्णनं तस्य कृते गोरखाराज्यस्य प्राप्तेः समाश्वासनं रामसाहस्य साफल्यानुक्रमवर्णनञ्च वर्त्तते । तदर्थं मात्स्येन्द्री–धर्मावत्योस्तटे सिद्धस्य लक्ष्मणथापामहोदयस्य सक्रियतायां कर्त्तृत्वे च यज्ञानुष्ठानं कृतं तन्मया कविकर्मतां नीतम् । तत्र मनःकामनाया रामपत्नीरूपाया अप्युपस्थितिः । तत्र रामसाहस्य सफलतायै तत्कृत–मानप्रस्थादि–व्यवस्थासम्पत्त्यै च ससहमतियज्ञस्य विसर्जनादिवर्णनं विराजते ।

चतुर्दशे च परिमले रामसाहीयायाः सुशासन–मान–व्यवस्थाया लक्ष्मणथापामहोदयस्य सिद्धताया विवृतिश्च वर्णिता वर्त्तते । पञ्चदशे च परिमले नेपालनृपाणां तज्जनतायाश्चेष्टदेवतात्वेन मतानां गोरखनाथगुरूणां सैन्यसम्मानवर्णनं विहितं लसति अपूर्वम् ।षोडशे च परिमले पृथ्वीनारायणस्य तत्कृते तन्मातृकर्तृकस्य नेपालैकीकरणस्य उपदेशस्य च वर्णनं श्लोकितम् ।

सप्तदशे च परिमले पृथ्वीनारायणस्योपनयनविवाहादिवर्णनं तदनु तत्कृतनेपालैकीकरणस्य च वर्णनं कविकर्मतां नीतम् । अष्टादशे, प्रकृतस्य महाकाव्यस्य चरमे च परिमले कृतैकीकरणस्य परिपक्वतां गतस्य परिणतवयसश्च पृथ्वीनारायणसाहस्य राज्ञो यथार्थानुभव–रूपस्योपदेशस्य भावानुवादो वर्त्तते । पृथ्वीनारायणेनानुभूतो राज्यसञ्चालनविधिरयं वर्त्तते । इमे चानुभवा दिव्योदेशा अप्युच्यन्ते । राज्यसञ्चालने एकीकरणस्य संरक्षणे तद्व्यापने चात्यावश्यकत्वाद् दिव्यत्वं तेषाम् । राष्ट्रनिर्मातुः पृथ्वीनारायणसाहस्य ते चोपदेशाः इदानीमपि स्वतन्त्रदेशविक़ासोन्मुखाः, सनातनसंस्कृत्यनुकूलाः, राष्ट्रवादानुकूलाः, अत्रत्यवातपानीयमृत्तिकानुकूलाः, महिमालयीय–हिमालयीयसंस्कृत्यनुकूलाश्च वर्तन्त इत्यत इदनीमपि पालनीया व्यवहरणीयाश्च सन्ति ।

काव्यमिदं प्रा.रामहरिदाहालमहाभागेन डा. नवराजकट्टेलमहोदयेन सहप्राध्यापकेन भीमप्रसादकण्डेलमहाशयेन च सायासं पठित्वा विमर्शो दत्तः। प्राध्यापकेन रामहरिणा आवश्यकेषु स्थलेषु संशोधनं प्रस्तुत्य काव्यमनुगृहीतम् । काव्यानुबन्धिमन्तव्यं लिखित्वा चापरोऽनुग्रहो विहितः । कट्टेलमहोदयेन च परिमलानां व्यवस्थापने महत्त्वपूर्णः सह योगःकृतः । अथ च महाकाव्यस्य सङ्घटन संशोधनेन टङ्कनं संशोध्य स्थिरीकरणेन च महान् सहयोगः कृतः इति ते स्पृहणीयाः प्रशंसनीयाश्च सन्ति । नेपालीभाषामाध्यमेन भूमिकालेखनेन च महाकाव्यमिदं प्रसिद्धौ नीतञ्च तेन । सँस्कृतप्रणयिनस्ते सँस्कृतरचनायां

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बद्धपरिकरा धन्यवादार्हाः । काव्यसम्पादनसन्दर्भे साहित्यविषयकाणां प्राध्यापकानां लब्धविद्यावारिधीनां श्रीजीवनाधिकारिमहोदयानामविस्मरणीयं योगदानं वर्तते । छन्दःसम्पादने, परिमलानां परस्परसम्बधने काव्यसमाप्तिसूचककवने च सुधारसङ्केतो वर्तते तेषामिति तेषाङ्कृते ऽनेके सन्ति धन्यवादाः । व्याकरणविदुषा कण्डेलमहाभागेन च तत्र तत्र प्रयुक्तेषु कतिपयेषु पदेषु रेखाङ्कनं विधायाहं सावधानः कृत इति ते ऽपि धन्यवादार्हाः । प्रकृतमहाकाव्यप्रकाशिका जयतु सँस्कृतमिति संस्था चातीव धन्यवादपात्रम्,या खलु सँस्कृत-सँस्कृतिसंरक्षणे बद्धपरिकरा वर्त्तते । सँस्कृतरचनायां सँस्कृतज्ञान् प्रेरयति पुरस्कारप्रदानादिनेयं संस्था । प्राच्यप्रतीच्योभयविद्याविज्ञेनास्याः संस्थाया अध्यक्षमहोदयेनापि प्रेरितोऽहमत्र काव्यकरणे इति तेऽपि धन्यवादार्हाः ।

प्रकृतमहाकाव्यकरणे गृहसम्बन्धि-वातावरणानुकूलन-पूर्वकं काव्य-प्रणयनावसरप्रदात्र्यै धर्मपत्न्यै विमलादेकाटाभिधायै अथ च स्वास्थ्यक्षेत्रे स्थापत्यक्षेत्रे च कार्यं कुर्वद्भ्यां चिन्तनशीलाभ्यां पुत्राभ्यां डा. सन्देशदेवकोटा-सन्तोषदेवकोटाभ्यां पुत्रवधूभ्यां दीप्तिदेवकोटा-सुषमादेवकोटाभ्यामपि प्रेरणायै सहयोगाय च धन्यवादाः सन्ति । मम काव्यविषये संज्ञानं लब्ध्वा मां ये प्रोत्साहिवन्तस्तान् प्रेरणादातॄन् सर्वान् प्रणम्य इतो नाधिकं विलिखन् विरमामि-

भगवदनुग्रहाकाङ्क्षी विद्वद्विधेयश्च-
प्रा.डा. विष्णुप्रसादो देवकोटा
कलङ्कीस्थानम्, काष्ठमण्डपः -१४ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालगौरवं महाकाव्यम्

मङ्गलाचरणम्

हिमवन्मुकुटाभिख्यां पर्वतस्तनमण्डलाम् ।
तराईपदपीठस्थां नुमो नेपालमातरम् ॥१॥

सनातनेन धर्मेण संस्कारैः प्रथया पुनः ।
सनातन्या च संस्कृत्या सम्पन्नां मुनिवृत्तितः ॥२॥

समन्वयात्मिका बुद्धिः पुनर्जन्मदृढाशयः ।
प्रशस्ताध्यात्मसम्पूर्णा विश्वबन्धुत्वभावना ॥३॥

संस्कारा देवताप्रीतिर्भ्रातृता च सहिष्णुता ।
वर्णाश्रमव्यवस्था च फुल्लन्ति यत्र तां नुमः ॥४॥

सदैव धर्मसापेक्षामधर्मेण ह्यनाकुलाम् ।
सत्याग्रहेण सम्पन्नां दुराग्रहविवर्जिताम् ॥५॥

पञ्चशीलस्य सिद्धान्तान् निर्वहन्तीमलग्नकाम् ।
सर्वेषां सहसत्तायां मुखरां प्रकृतिप्रियाम् ॥ ६॥

सूर्योऽपि नाभवदस्तो यत्र चाङ्ग्लीयशासने ।
तत्रापि चापराधीनां नुमो नेपालमातरम् ॥७॥

पृथ्वीनारायणैः साहैस्तदपत्यैरखेदनैः ।
साहसश्रमनिष्ठाभिरेकतां प्रापितां नुमः ॥ ८॥

कदाचित् काँगडाव्याप्तां तिष्टां पूर्वत्र गामिनीम् ।
दौर्भाग्यात् सीमितामद्य लघ्वीं तां प्रणुमो वयम् ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्राप्यदूरदर्शित्वादविवेकितया पुनः ।
मिषेण गणतन्त्रस्य भाज्यमानाञ्च तां नुमः ॥१०॥

कृशितां बलशालिभ्यां प्रस्तरान्तस्तरूलवत् ।
अधुना गणराज्यैश्च वृथाभाज्यां तु दुःखिताम् ॥११॥

संवैधानिकतद्भागैरसन्तुष्टैः पुनश्च त्वम् ।
स्वार्थाय भङ्क्तुमिच्छद्भिर्मार्गरोधेन पीड्यसे ॥१२॥

तव सन्ततयोऽप्यत्र निर्घृणं सम्प्रपीडिताः ।
देशान्तरं प्रयोज्यापि तैस्ते ग्रीवा निपीडिता ॥१३॥

निकृष्टस्वार्थसम्पत्त्यै देशस्वार्थमुपेक्ष्य च ।
दुष्टान्तरप्रयोगश्च कृतस्तैर्यो विनिन्द्यते ॥१४॥

देशान्तरस्य वर्गस्य क्षुद्रस्वार्थस्य साधकः ।
स च सम्पूर्णदेशस्य सङ्कटे कारणायितः ॥१५॥
अस्थायिसर्वकारेण चादूरदृष्टिभिः पुनः ।
नेतृभिः पीड्यसे नित्यमियं नैयतिकी स्थितिः ॥१६॥

निरङ्कुशैश्च राणाभिर्विकासस्य विरोधिभिः ।
प्रताडितापि भो मातर्गणतन्त्रेऽपि पीड्यसे ॥१७॥
सम्पन्नतानिजालम्बौ न त्वदीयौ विनिर्मितौ ।
सत्तायै वित्तवित्त्यै च कालः क्षिप्तोऽप्यमूल्यकः ॥१८॥

जात्या च भाषया वस्त्रैर्वर्गतो भूस्थितेरपि ।
भाज्यमानासि दुर्बुद्ध्या दुःखयसे दुःखिता वयम् ॥१९॥

पञ्चैव तव प्रोन्नत्यै क्षेत्राण्यत्र कृतानि च ।
तान्यद्याप्युपयुक्तानि मातस्तेभ्यो न रोचते ॥२०॥

परावलम्बिनेतारस्त्वामन्येष्वाश्रयन्ति च ।
शोषणं तव कुर्वन्ति शुष्कातः पोषणं कथम् ? ॥२१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देशे सम्भाव्यवस्तूनि चेत्क्रीयन्तेऽन्यदेशतः ।
स्वदेशगतवस्तूनां प्रयोगो न विनिर्मितिः ॥२२॥

परावलम्बव्यालेन ग्रस्यसे त्वं दिने दिने ।
सुदिनानि प्रतीक्षस्व वीरा धीरासि त्वां नुमः ॥२३॥

नित्यं स्मरामि तव पूतपदारविन्दं
पुष्टञ्च दक्षिणकरं मम मस्तकस्थम्।
वित्ताढ्यताकृतसमस्तप्रपुष्टदेहम्
उल्लासवद्वदनकं स्मितितश्च रम्यम् ॥२४॥

मातस्तवास्तु मुकुटे सततं प्रकर्षः
पुष्टे च वक्षसि पयांसि सुधायितानि ॥
पादेषु शक्तिदृढताकुशलानि सन्तु
सर्वाङ्गकेषु विलसन्तु च मङ्गलानि ॥२५॥
मातुः पयांसि बलजीवनदानि पीत्वा
तत्पुत्रकैः प्रसवजार्त्तिरुजो निरास्याः ।
यच्चात्र चोन्नयक्रियाप्रविधानजातं
तत्कुर्वताऽखिलजनेन सता हि भाव्यम् ॥ २६॥

राष्ट्रस्य राजनयपद्धतिका निमित्तं
तस्योन्नतौ भवति सर्वकृतिस्तु मुख्या ।
तत्रापि चार्थिकपवित्रतया निरन्तरं
योगो भवेज्जननि! तेन विजेष्यसे त्वम् ॥२७॥

इति नेपालगौरवमहाकाव्ये मङ्गलाचरणं नाम प्रथमःपरिमलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयः परिमलः

विकासचिन्तनम्

वित्तसम्पन्नता देशे स्वोत्पादस्य प्रयोगता ।
यावत्सौविध्यपूर्त्तिश्च विकास उच्यते बुधैः ॥१॥

यातायाते च स्वास्थ्ये च सूपभोगे हि वस्तुनः ।
ज्ञानविज्ञानयोश्चैव वृद्धिश्चात्र समीहिता ॥२॥

सन्तस्त्वत्पुत्रका एव तद्विधातुं समर्थकाः ।
तेभ्यः कर्मठताबुद्धी देहि मातस्त्वदाश्रिते ॥३॥

कर्मचोरणकं तेषां परोपजीवनं तथा ।
क्रयणं परवस्तूनां निरास्यं दासताप्रदम् ॥४॥

तथात्वे निजतन्त्रा त्वं विकासान् भोक्ष्यसे स्वयम् ।
नो चेत् पारक्यसामग्र्या परतन्त्रा भविष्यसि ॥५॥

प्रयत्ने तादृशे जाते चानुकूल्यं भविष्यति ।
प्रपुष्टस्तव देहश्च पयसा तर्पयिष्यति ॥६॥

कर्मठाः सच्चरित्राश्च राष्ट्रवादप्रवर्धकाः ।
त्वत्पुत्राः सम्भविष्यन्ति त्वन्मुखोल्लासकारकाः ॥७॥

भौतिकेन विकासेन पथा त्वाध्यात्मिकेन च ।
सर्वाङ्गीणविकासेन तवोत्कर्षो भविष्यति ॥८॥

राजमार्गा रेलमार्गा भविष्यन्ति च सर्वतः ।
समृद्धे तव भूभागे विकासान् लोकयिष्यसि ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चरणादिषु चाङ्गेषु दुर्गमेष्वपि ते सदा ।
सर्वैरनन्यभावेन सेविता त्वं भविष्यसि ॥१०॥

हिमवन्तं तु निकषा मार्गेषु चाटनप्रियाः ।
दर्शं दर्शमटिष्यन्ति रममाणा स्वकैः सह ॥११॥

शिरसोऽङ्घ्रितलं यावदङ्गजातं न दुर्गमम् ।
तव, सर्वत्र सर्वेषां सेवा प्राप्तिश्च सम्भवा ॥१२॥

तव सर्वेषु भागेषु यातायाते प्रचालिते ।
ऋद्धे पर्यटनोद्योगे प्रादक्षिण्यञ्च ते भवेत् ॥१३॥

त्वदीयोत्पादजातानां निर्यातस्य तु सम्भवात् ।
वर्धिष्यन्ते हि वित्तानि चायात्याः स्थापनं भवेत् ॥१४॥

धार्मिकाटनवृद्ध्या च मुक्तिनाथादिदर्शनात् ।
जनानां शान्तिलाभः स्यात् तत्त्वे तूभयसम्भवः ॥१५॥

धनादिकं धर्मफलं धर्मश्चाऽर्थफलः पुनः ।
कामे च तदधीने चेत्ततो मुक्तिः प्रवर्त्तते ॥१६॥

क्वचिच्छाया क्वचिद् घर्मः क्वचिद् धूमश्च वर्षणम् ।
दृश्यते विविधं दृश्यं क्व ते श्रृङ्गात् सुसम्भवम् ? ॥१७॥

इमां विविधतां द्रष्टुमायान्ति बहुदेशतश्-
चाटकास्तत्क्रयात् त्वत्का मञ्जूषा सम्भरिष्यति ॥१८॥

भौतिकाध्यात्मिकक्षेत्रे विकासस्तव वाञ्छितः ।
तस्याभावेन त्वं मातः क्लिश्यसे वयमप्युत ॥१९॥

रूपं नैकविधैर्दृश्यैः तव मातः सुशोभनम् ।
तत्र सर्वेषु चाङ्गेषु विकासोऽस्मदभीप्सितः ॥२०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वप्नेऽपि तव दैन्यानि पश्याम्यन्यत्र किं पुनः ।
अशक्तोऽपि शुभं काङ्क्षे तन्निरासाय नित्यशः ॥२१॥

उपाया विविधाः सन्ति सर्वकारेण सम्भवाः ।
परिश्रमोऽर्थशुद्धिश्च योग्यानामनुपेक्षणम् ॥२२॥

कृषौ विविधताऽऽनेया तत्र पर्याप्तता भवेत् ।
परनिर्भरताऽपास्या सा च देशार्बुदायिता ॥२३॥

दैनिकान्युपभोग्यानि नैव क्रेयाणि चान्यतः ।
विक्रेयाणि च वस्तूनि तेषामाकर्षणानि च ॥२४॥

खनिजादतिरिक्तानि सम्भवान्यल्पकालतः ।
अवधिं परिकल्प्यैव समुत्पाद्यानि यत्नतः ॥२५॥

उपादानानि वस्त्राणां प्रायेण कृषिजानि च ।
तानि मातः सदैव स्युस्त्वज्जातानि बहूनि मे ॥२६॥

पेट्रोलेन्धनजातानि सञ्चरन्ति पयो यथा ।
तवाङ्गेषु, न प्राप्नुमः परनिर्भरतारुजा ॥२७॥

यदा वत्सलताधिक्याच् श्च्योतिष्यति तु स्तन्यवत् ।
तदा लप्स्यामहे नैजमिति लोभेन जीव्यते ॥२८॥

मातरः पञ्च सङ्ख्याताः स्वस्य पत्न्याश्च मातरौ ।
गुरोर्मित्रनृपत्योश्च पत्न्योऽन्तर्भूयसे नहि ॥२९॥

अतस्त्वं सर्वमातासि मातुर्मातेति मन्यसे ।
अतःपरममाता त्वं सर्वैर्नंनम्यसेऽनिशम् ॥३०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मातस्त्वदतिरिक्तास्तु लोभमोहादिनाकुलाः ।
आगमापायशालिन्यस्त्वन्तु तेभ्योऽतिरिच्यसे ॥३१॥

कर्षणे दूषणेऽगाधदारणे भारवर्धने ।
विक्रियां नोपलभसे हसन्ती सहसेऽनिशम् ॥३२॥

उत्साहश्रमनैयत्यैः कुर्वद्भ्यः कर्म नैजकम् ।
अमृतान्नानि स्वर्णानि पयांसि सम्प्रयच्छसि ॥३३॥

कुरूपकरणे मूत्रैर्विष्ठादिविषमीकृतौ ।
सर्वं त्वं सहसे नित्यं यतः सर्वंसहोच्यसे ॥३४॥

विविधानि वसूनि त्वमसमाप्यानि नित्यशः ।
ददासि निजपुत्रेभ्यस्तेन वसुमतीत्यसि ॥३५॥

रसषट्कस्य मूलत्वाद् रसा त्वमसि सम्मता ।
विश्वेषां भरणाच्चापि त्वं हि विश्वम्भरा मता ॥३६॥

भूतानां श्रमशीलानां पूजानां प्रापणादपि ।
महीति कथ्यसे मात मेंदमस्तीति वा पुनः ॥३७॥

जलीयस्रोतस्सम्पूर्णा पर्वता गोत्रनामकाः ।
तेषां सत्त्वेन त्वन्नाम गोत्रेति कथितं बुधैः ॥३८॥

गर्भधारणकष्यानि शिशुरक्षात्मिकानि वै ।
जननी सहते सत्यं निःस्वार्थमखिलानि च ॥३९॥

सर्वैर्देशै–र्बहुसमयतो भौतिकः प्राग् विकासः
चक्रे चौद्योगिककरणता ह्यार्थिकी प्रोन्नतिश्च ।
देशैः तेषां क्षितिविषयकं नास्ति शिष्टं विधेयं
हेतोरस्माद् ग्रहगणगतिं तत्स्थितिं शोधयन्ति ॥४०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्मद्देशे जननि ! सततं बाधते क्षुत्पिपासा
शिक्षादीक्षाप्रविधिरहिता शिल्पसामर्थ्यहीना ।
मातः ! कस्मात्तव विकसनं तुल्यतां यातु तेषाम्
आधिश्चायं तुदति हृदयं त्वद्विकासाच्चिकित्स्यः ॥४१॥

अन्नोत्पादे खनिजविषये शिल्पशैलीप्रयोगे
वस्तूत्पादे जनविकसने स्वावलम्बक्रियायाम् ।
आयातानां विरमणविधौ नित्यनिर्यातितायां
न्यस्ताङ्घ्रिः स्या जननि ! यदि भो गौरवं मेऽभिप्रेतम् ॥४२॥

चेक्रीय्यन्ते परजनिजुषश्चाऽन्नवस्त्रादिभोग्याः
नानाश्यन्ते निजसफलताशिल्पशैल्योऽतिमूल्याः ।
अन्यासक्तान् प्रतिनिधिजनान् तादृशान् देशजाँश्च
मातः स्वीयान् कुरु सपदि नः स्वावलम्बाग्रगण्यान् ॥४३॥

देशोत्थाने विविधप्रतिभासम्प्रयोगोऽस्ति मुख्यः
कष्टं नित्यं व्रजति नितरां सा तु सम्पन्नदेशान् ।
अस्मद्देशे न हि बहुविधोद्योगजातं प्रवृत्तं
तस्मान्नास्ति प्रचुरधनभुक् प्रातिभः सम्प्रयोगः ॥४४॥

सेवादक्षा बलविलसिताः सम्यगुत्साहवन्तः
पुत्रा नित्यं तरुणवयसश्चापि देशं त्यजन्ति ।
औदासीन्यं प्रकृतविषये दृश्यते नेतृवर्गे
मातस्त्वत्को विकसनविधिस्तत्कथं पूर्त्तिमेतु ॥४५॥

देशे स्थायी प्रभवतु दृढः सर्वकारः पवित्रः
प्रज्ञावन्तो विदधतु नवान् शिल्पराशीन् प्रयुक्तान् ।
उत्साहेन क्लमविरहिता नित्ययुक्ता युवानः
संयोज्यन्ते यदि तव हिते स्यात् सदा ते विकासः ॥४६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मातस्त्वत्का धुनिधमनिका पूरिता सत्पयोभिः
प्रायः शक्तिर्भवति पयसः सा हि तेजः समिन्धे ।
विद्युच्छक्तौ जगति धनिका सम्मता त्वं द्वितीया
किन्तूत्पादे शिथिलिततया मज्ज्यसे चान्धकारे ॥४७॥

खाद्यान्नादावपि जनबलोत्पादनीये विनष्टे
विद्युच्छक्तौ सति जलचये साधु नोत्पादितायाम् ।
मातर्दीना त्वमसि तवकाश्चापि दुख्यन्ति नित्यम्
अन्ने वस्त्रे व्यवहृतिविधावन्यदीयान् श्रयन्ते ॥४८॥

दैनन्दिन्यां निजजनतया दक्षया भोग्यजाते
यानादीनामथ बहुविधे चेन्धने स्वार्जिते हि ।
आत्मालम्बं, विविधविषयं चापि विक्रीतिदक्षं
मातस्त्वत्कं मुखकमलकं प्रेक्षितुं चातुरोऽस्मि ॥४९॥

दैन्यात्कस्मिन्नपि च समये याचना ते नचास्तु
सर्वं देयं भवतु परकै र्याच्यमानन्तु तेभ्यः ।
विक्रीतेऽन्यैर्यदि भवति चेत्तुच्छनक्रादिबन्धो
मातस्त्वत्तोऽपि च सपदि स्याद् विद्युदादेस्तु रोधः ॥५०॥

ज्ञात्वाऽवस्थां तव, विकसनं नेतृभिर्नो व्यधायि
भूभागानां स्थितिमनुहरन् नैव तेषां प्रयासाः।
तत्तद्भूमेः स्थितिमनुसरन् स्यात्त्वदीयो विकासो
मातस्त्वं स्याःसपदि तुलिता साधु सम्पत्तियुक्तैः ॥५१॥

अस्मद्दैन्यात् लघुविषयके याचने सम्प्रवृत्तेः
क्षुद्रैःस्वार्थैर्बहुविषयकैर्ग्रस्ततायाश्च सत्त्वात् ।
साधून्नत्यै समुचितदृशो दक्षताया अभावाद्
दीना हीनाःपरशरणगाः पीडिता मार्गरोधैः ॥५२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिक्षा नित्यं प्रविधिविधिदोन्मुक्तिभुक्तिप्रदात्री
त्वत्सेवायै विविधविषये वर्धने चोत्सुका स्यात् ।
त्वत्पुत्राणां तव विकसने सर्वदैवैकता स्यात्
त्वत्खेदाय प्रभवतु न वा मानसेनापि दुष्टा ॥५३॥

भावत्केऽथो खनिजनिचये दोहिते सत्प्रयुक्त्यै
संस्कारादौ निजविषयके रक्षिते वर्धिते च ।
हैमे चापि भ्रमणसुलभे वारिस्रोतःप्रयोगे
बुद्धादर्शे जनकचरिते ख्यापिते गौरवं ते ॥५४॥

जलानि सम्पदो मातः'श्वेतस्वर्णं' मतं तव ।
तस्य सम्यक् प्रयोगश्चेत् सम्पन्ना सम्भविष्यसि ॥५५॥

खनिर्हि श्वेतस्वर्णस्य प्रायेण हिममूलिकाः ।
कौशिकी गण्डकी काली कर्णाली च समीरिताः ॥५६॥

इमा हि प्रथमा नद्यो विद्युच्छक्तेर्जनिप्रदाः ।
आसु वृष्ट्यववृष्टौ च प्रायो वेगो न हीयते ॥५७॥

सत्यां हि सर्वकारस्य दक्षतायां धने श्रमे ।
भूमीनां बहुसंख्यानामाभिः सेकोऽपि जायते ॥५८॥

पर्वतप्रभवा नद्यो मेची राप्ती च वाग्वती ।
अन्याश्चैतादृशःसेके विद्युच्छक्तौ द्वितीयका ॥५९॥

चूरेभाबरतो जाताः सेके नद्यो हि सम्मताः।
वृष्टौ च बाडविध्वंसजनिकास्तास्तृतीयकाः ॥६०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हैमपर्वतजातानां नदीनां जलवेगतः ।
सहस्राणां त्रिरशीतिर्मेगाशक्तिः प्रकल्पिता ॥६१॥

जलवेगस्य वेत्तारश्चान्ये वित्तीयदृष्टितः –
सहस्राणां द्विचत्वारिंशन्मेगा निर्मेयतां गताः ॥६२॥

मतद्वयाद् दूरतमा इदानीं निर्मिता हि सा ।
मेगानामल्पसाहस्रं प्रयोज्यत्वेन कल्पिता ॥६३॥

अस्मादेव हि देशेऽत्र विद्युतां भारकर्त्तनम् ।
चतुःपञ्चदशघण्टा व्याप्नोद्धि सुरसायितम् ॥६४॥

वर्षैकस्य द्विवर्षस्य व्येयद्रव्यव्ययेन च ।
जलीयविद्युतां स्थूला योजनाः सन्तु निर्मिताः ॥६५॥

जलोपयोगतः सर्वाः समुत्पाद्या हि शक्तयः ।
यातायातप्रकाशादिः सञ्चारो यासु सम्भवः ॥ ६६॥

तमोनाशकमात्रो हि प्रकाशस्तैलजोऽभवत् ।
इदानीं प्राणिजातानां प्राणानां सा प्रकाशिका ॥६७॥

विद्युदुत्पादनं पूर्वं कर्त्तव्यं बहुमात्रकम् ।
निर्यात्यापूर्त्तिके कार्ये पणनैयून्यहारिके ॥६८॥

बहूनां भोग्यवस्तूनां क्रीतिर्नास्मत्स्वरूपिणी ।
भुजौ सम्पात्य मेदिन्यामदनं स्वानुरूपकम् ॥६९॥

स्वल्पकैर्वस्तुभिर्नित्यं दैनिक्याःपरिचालनम् ।
नेपालजनतायाश्च वैशिष्ट्यं गौरवान्वितम् ॥७०॥

भुजौ वा सबलौ न स्तो हतभाग्यस्य यस्य वै ।
स परैर्जीव्यतां यातु जीव्यन्ते हस्तिना परे ॥७१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वानुरूपो भवेद् भारो भाराय न गणादिकम् ।
जनानां करतस्तेषां व्यवस्थामात्रकं भवेत् ॥७२॥

न तत् कार्यं प्रकर्त्तव्यं येन न स्याज्जनोन्नतिः ।
राजनीतेर्व्यवस्थायै व्ययिते केन सा भवेत् ? ॥७३॥

अवशिष्टेन स्वल्पेन वित्तेन जनतोन्नतिः ।
कल्प्यते यदि चेत् सा तु हास्या कूर्मायिता भवेत् ॥७४॥

राजनीतिव्यवस्था सा जनताहितकारिणी ।
स्वव्यवस्थापनकार्ये हि न्यूनं व्येति च या सदा ॥७५॥

प्रशासननिकायानां बहुत्वे त्वमितो व्ययः ।
मितव्ययेन सिद्धौ च शिष्टेन जनतोन्नयः ॥७६॥

एकस्यानेककरणमपि विघ्नायितं भवेत् ।
अनेकेषां तु चैकत्वं निर्विघ्नं स्याद् व्ययेऽल्पकम् ॥७७॥

विकेन्द्रीकरणं ग्राह्यं निम्नवर्गसमुन्नतौ ।
ग्रामतश्च विकासःस्यात्तेन व्यर्थं विभाजनम् ॥७८॥

मातस्त्वं सर्वदैकासि नैकीकरणतः पुनः ।
गणकल्पनजान् भागान् कथं तदनुमन्यसे ॥७९॥

स्वल्पायास्तव भागेषु विवादान् सम्प्रवर्त्तितान् ।
दर्शं दर्शं मनो मातरनभीष्टानि शङ्कते ॥८०॥

कृशायास्तव गात्राणि दुर्भाग्यात् स्युस्तनूनि चेत् ।
त्वत्पुत्राणाञ्च नेतॄणां दौर्भाग्यमटलं भवेत् ॥८१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वदाशीर्वादतो मातर्नेतारो दूरदर्शिनः ।
नान्यानुकरणे सक्ता भवेयुर्देशदर्शिनः ॥८२॥

विकृत्यां वर्त्तमानायां तत्सुधारोपकल्पनम् ।
याथार्थ्यं तस्य मन्तव्यं सर्वमन्यद् हठायितम् ॥८३॥

हठाद् दुराग्रहाद्वापि याथार्थ्यं दूरतो यदि ।
तेन हानिर्भवेन्मातर्नायकास्तत्र कारणम् ॥८४॥

पुष्टानि तव चाङ्गानि प्रसादो मुखमण्डले ।
आकारे पूर्णता सन्तु समृद्धिरनपायिनी ॥८५॥

नेपालिनाञ्च मातासि त्वमस्माकं समीपगा ।
प्रथमा पाठशाला च नानिष्टं तव सर्वतः ॥८६॥

तव सेवाप्रवृत्त्यर्थं जननीजन्यतात्मकम् ।
सम्बन्धं समुपेक्ष्यैनं विकर्त्ता हतको भवेत् ॥८७॥

संस्कृतं तव पुत्राणां दृढैक्यस्य प्रवर्त्तकम् ।
संस्कारपुरुषार्थानां संस्कृतेश्च निरूपकम् ॥८८॥

परं तत् सर्वकारेण व्यक्तिशिक्षालयेन च ।
उपेक्ष्यमाणं तव गीस्त्वद्वदश्रूणि मुञ्चति ॥८९॥

संस्कृतस्योपयोक्तृत्वं समभागादिवासिनाम् ।
इत्येकतासूत्रमिदं पठ्यं पाठ्यञ्च नित्यशः ॥९०॥

शिक्षायाः प्रथमं लक्ष्यं शीलवृत्तप्रमार्जनम् ।
नैतिकत्वविकासश्च सर्वं त्वद्गीः प्रकाशते ॥९१॥

अनेकदेवतावादः पुराणेषु प्रवर्त्तते ।
तेनैवानेकदेवानां पूजानेकैर्विधीयते ॥९२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इदमप्येकतासूत्रमनादिकालतो मतम् ।
परलोके च विश्वासः पुनर्जन्मनि निश्चयः ॥९३॥

समन्वयात्मिका बुद्धिश्चेति हैक्यं दिशन्ति न ? ॥
तस्मादनेकताऽपास्या देश एको वयं तथा ॥९४॥

सकलजनक्रियासु जायमानासु नित्यं
बहुविधविषयाणां रोधनैरायतेश्च ।
खनिजनिकृषिजानां विद्युतां विक्रयाच्च
भवति विपुलवित्ता मातृभूरस्मदीया ॥९५॥

विकासेन सदा साकं देशसौन्दर्यरक्षणम् ।
कर्तव्यमिति चाग्रे हि तत्सौन्दर्यं विचिन्त्यते ॥९६॥

इति नेपालगौरवमहाकाव्ये विकासचिन्तनं नाम द्वितीयः परिमलः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयः परिमलः

मातृभूसौन्दर्यादिवर्णनम्

हिमालयानां महिमालिशालिनां गीर्वाणवाण्याः बहुला व्यवस्थितिः ।
सदा भवाः संस्कृतिधर्मवासना भवन्ति नेपालकगौरवायिताः ॥१॥

परेण केनापि पराजिता न त्वं परं परस्मिन् विजयस्तु विश्रुतः ।
स्वनिर्मितिः प्राकृतिकीच्छटाऽमला मातर्भवत्या गुरुतां ब्रुवन्ति हि ॥२॥

ग्रामादधो वारिचयो हि नित्यशश्चरद्गवां शाद्वलभूस्तदालयः ।
सुशीतला ग्रामटिकेति तावका उपर्यधो नित्यमनुव्रजन्ति ॥३॥

'ब्रेसी' वेशन्तबाहुल्यात् 'गाउँ' ग्रामस्य भ्रंशनात् ।
'गाउँबेसी' संस्कृतिर्या मातस्ते गौरवायिता ॥४॥

गोदोहनी दुग्धचयैः प्रपूरिता दध्ना कलश्यो मधुना सुपूरिताः ।
ग्रामेषु पाकालयसम्प्रयुक्ता विशिष्टतां ता अनिशं वदन्ति ॥५॥

पयोदधीनां प्रचुरप्रयोगाद् बालाः प्रपुष्टाश्चपला दृढाश्च ।
भारोन्मितौ कूर्दनकेऽप्यधीतौ वैचारिके कर्मणि चाग्रगण्याः ॥६॥

गौराङ्गिकाः प्राकृतरूपवत्यः कुमारिका उन्नतयौवनाङ्कुराः।
स्वाभाविकाद् हिण्डनतश्च गोरसैश्शैत्येन पुष्टाश्च मनो हरन्ति ॥७॥

समे वसन्तोऽपि सदा विवाहे चैतादृशीः सुन्दरिकाः श्रयन्ते ।
युद्धादिकार्येऽथ च प्रत्ययात्मके चिन्वन्ति यूनः परदेशजास्तव ॥८॥

नेपालिनो न्यायपरास्तपस्विनो विश्वासपात्राणि निरस्तकैतवाः ।
वैदेशिकैश्श्रद्धितकर्मपाटवा जेतार आजेरपि शक्तिशालिनः ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नीलाश्च नद्यो बहुवक्रतां गता गिरिव्रजैर्विघ्नितनैजमार्गाः ।
शिलोच्चयानां शिखरान्निरीक्ष्य ता मुह्यन्ति लोकाः सततं रसन्तः ॥१०॥

कायस्त्वदीयो बहुपर्वतात्मक उच्चानि कूटानि च तद्भवानि ।
मुदा समारुह्य च दर्शका भृशं दृश्यानि रम्याणि विलोकयन्ति ॥११॥

नारङ्गजातीयफलानि कुत्रचित् विभिन्नरोहीणि च रक्तपत्रकम् ।
पक्वानि धान्यानि बहुत्र दूरतो गृहाणि प्राच्यानि च सँल्लसन्ति ॥१२॥

शीतं जलं पर्वतगर्भमूलं शुद्धञ्च वातं बलदं सुसेव्य ।
शैलालयाः पर्यटकाश्च मुग्धा वसन्ति चायान्ति च मोदमानाः ॥१३॥

समासु निम्नासु च भूमिषु स्थिता दूरेषु दृश्येषु निरुद्धदृष्टयः ।
शिलोच्चयेऽधिष्ठितकास्त्वनन्तरा रम्याणि पश्यन्ति च दूरगान्यपि ॥१४॥

अबिन्धनादावथ दर्शनाटने फलोद्यमे चौषधिवीरुधाप्तिके ।
मातस्तवायं कृशकोऽसमश्च यो देहः सदास्मासु सुधायितो भवेत् ॥१५॥

विकासकार्याणि भवन्तु शीघ्रतः क्षेत्रेषु सर्वेषु च सून्नतिर्हिता ।
भुवोऽप्यवस्थां प्रसमीक्ष्य सम्प्रति संवर्धिका नोऽस्तु समुन्नयक्रिया ॥१६॥

समीकृतौ ध्वंसनपातनादिकेऽविवेकपूर्णे प्रकृतेर्विमर्दने ।
सरोषयाऽनर्थकरेण ध्वंसितं धनं जनान्नाशमकल्पितं नयेत् ॥१७॥

भुवो विभिन्नाकृतयोऽपि रक्ष्यं वनञ्च स्रोतांसि विभिन्नवीरुधः ।
सतोपयोगेन च शोधनेन विक्रीय वित्तार्जनकं भृशं भवेत् ॥१८॥

वनौषधीनां क्षमताभिवृद्धये संशोधनार्थं स्तरनिर्णयाय च।
विशिष्टशोधालयरक्षणालयाः संस्थापनीयाश्च समस्तभेदशः ॥१९॥

विनैव शोधस्तरमापनाभ्यां विक्रीतिभाजस्तरुमूलवीरुधः ।
न्यूनानि मूल्यानि न लाभदानि सदैव ग्राह्याणि च रोपकैरिह ॥२०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मृतसञ्जीवनीत्याख्यं लक्ष्मणोज्जीवकं महत् ।
हैमं वन्यौषधं चान्यद् रक्ष्यं नित्यं प्रयत्नतः ॥२१॥

शिलानां जतुषाऽनेके रोगा नाश्यन्त उग्रकाः।
अन्येषां तदुपादानं तेन रक्ष्यं प्रयत्नतः ॥२२॥

हिमालयेषूच्चहिमालयो महान् अबिन्धनादेः प्रचुरा ह्युपस्थितिः ।
सदौचिती पर्यटनोद्यमादिषु भवन्ति मातस्तव ख्यापका भुवि ॥२३॥

रोगापहा ओषधिवीरुधस्तथा वनस्पतीनां विविधा च संस्थितिः ।
सनातने धर्मपरम्परे शुभे ब्रुवन्ति नेपालभुवो विशिष्टताम् ॥२४॥

सदैकतासूत्रतया जनैर्मतं समन्वये यस्य सदैव चिन्तनम् ।
विमुक्तये चाभ्युदयेऽपि विश्रुतं विशेषकं संस्कृतवाङ्मयं तव ॥२५॥

न येन नेपालकभूर्विलेकिता नचाशिता गीर्मधुरा सुसंस्कृता ।
न राजतश्वेतहिमोच्चश्रृङ्खलाः विलोकितास्तस्य जनिर्वृथा गता ॥२६॥

व्यक्तेः समाजस्य च मध्यपातिनी स्थितिर्मता यास्ति च पारिवारिकी ।
तया च वृद्धा नितरां प्रसेविताः सुखेन जीवन्ति तवेह कुक्षिगाः ॥२७॥

विदेशजः कश्चन पृच्छ्यते यदि विनैव सङ्कोचलवेन वक्ति सः ।
मदीयमाता शुनकद्वितीयका पिता च मे मार्जरिकासनाथकः ॥२८॥

द्वारि स्थिताः श्वानवराः समन्ततो गृहस्य सम्पत्तिचयस्य रक्षकाः ।
अन्नस्य वस्त्रस्य च रक्षिका भवेन्मार्जारिका मूषकमारणे रता ॥२९॥

नवीनशिक्षाचरणैश्च नैतिकशिक्षाविहीनैर्व्ययने तु शौण्डकैः ।
अर्थेषु कामेषु च सक्रियां गतैरनम्रकैः सा विकृतिर्विकीर्यते ॥३०॥

अर्थस्य कामस्य च दासताङ्गतैराचारनीत्योर्विमुखैस्तु पुत्रकैः ।
तवापि मातर्जरया प्रभाविताः प्रतीक्षणे हा मरणाय चेरिताः ॥३१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विकारजाते नहि कारणं जनः परं तदीयास्ति तु शिक्षणक्रिया ।
अतोऽविलम्बं विनयाक्तनीतिकासम्पन्नशिक्षा प्रचलेद् हितावहा ॥३२॥

उत्कर्षदं संस्कृतवङ्मयं महद् गुणैः प्रपूर्णं समदर्शितादिभिः ।
महत्तमानामनुभूतिसङ्कुलं समन्वये दत्तपदञ्च शङ्करम् ॥३३॥

मातस्तव, संस्कृतवाङ्मयस्य, वृत्तस्य, नीतेर्नियतक्रियायाः ।
समुन्नतिः सर्वप्रकारिका स्याद् यया समेषां हसितं मुखं भवेत् ॥३४॥

परावलम्बो न कदापि देशे देशोऽन्यदीयस्त्वयि लम्बितः स्यात् ।
सदैव सर्वत्र च जागरा भवेद् धर्मार्थयोः खेलनचत्वरं स्यात् ॥३५॥

स्वदेशतावादसमुत्थकर्मभिः सदा जनाः सञ्चलिता भवेयुः ।
मिताभिधायित्वमथामितस्य कृत्त्वं भवेन्नेतृषु सत्यता च ॥३६॥

दलेष्वनेकेष्वपि चैकलक्ष्यता समन्वयेनैव च कार्यकारिता ।
दलस्य कस्यापि पराभवो न लक्ष्यं परं देशदरिद्रतायाः ॥३७॥

दरिद्रतायां तव दुःखदायां पराकृतायाञ्च समृद्धतायाम् ।
समागतायां, तत एव द्रुत्या विकासभाजो नर इत्यकाट्यम् ॥३८॥

अस्त्युत्तरस्यां दिशि चीनको महान् अन्यासु च दिक्षु महच्च भारतम् ।
ताभ्यां न दर्पेण बलेन वर्त्तनं युक्तन्तु नित्यं जनदैन्यकर्त्तनम् ॥३९॥

सन्नायकानामिदमस्ति कार्यं देशस्य सीमा ह्यभिरक्षणीया ।
ततो द्वितीयन्तु विभावनीयं दैन्यं ह्यशिक्षा द्रुतितो निरास्यम् ॥४०॥

सरस्वती श्रीर्महिता च कालिका सुबोधवित्ते ददतीह शक्तिम् ।
ददासि भूदेवि ! सदैव जीवते क्रियाङ्गणं क्रोडनिभं समाश्रयम् ॥४१।

अभावयुक्ते वितते धरातले बलस्य वित्तस्य धियश्च भाजनम् ।
किमाश्रयं स्वस्य कृतीर्निवर्त्तये-दतोऽसि मातः शरणं तु जन्मिनाम् ॥४२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भवेऽसि सर्वात्मवतां निमित्तं स्थितिस्त्वदायत्तिमया समैः श्रिता ।
लयेऽपि त्वत्क्रोडगतः समाश्रयः अनन्यतायामिति त्वं प्रभुर्मता ॥४३॥

पुराणके शास्त्रचये पुनर्भवः सम्वर्णितोऽसौ कथमन्यथा भवेत् ।
मदीयसत्कर्मभवाद् भवो यदि स्वतन्त्रखण्डात्ययनेऽस्तु तेऽमले ॥४४॥

सुरालयश्चार्जितभोगभूमिका निजेन लब्धस्य लये तु नास्ति सः ।
रसा तु लब्धेन सहैव चार्जने स्थलीति मातस्तव चार्थनीयता ॥४५॥

सुरालये वासविधौ न मोक्षता तदीयसम्प्रापणकर्म नात्र च ।
अनन्यभावेन तदीयलब्धये त्वमेव भूदेवि ! मया विनिश्चिता ॥४६॥

त्रिविष्टपे नैव हिमालयो महान् न नागवल्या लुठिताश्च निम्नगाः ।
अन्ये च सञ्जीवनिका युता नगाः न बुद्धगोरक्षविदेहभूमयः ॥४७॥

न यत्र दीपावलिसच्छटायुता ग्रामावलिः पर्वततुङ्गराजिता ।
न शारदार्चाकृतटीकनाशिषौ नाहं समीहे भुवनं तथाविधम् ॥४८॥

जलञ्च शीतं पवनोऽपि तादृशःगिरेश्च शृङ्गे वसतानुभूयते ।
अनेकदृश्यानि विलोक्य कैरपि त्वदीयशोभा न विहातुमिष्यते ॥४९॥

मदीयसत्कर्मचयेन तेऽजिरे जनिर्ममाभूदिति तेन हर्षितः ।
कष्टाधिके सत्यपि भाविजीवने तवैव मातृत्वमहं प्रकामये ॥५०॥

तथैव उच्चावचता तवाकृतौ शृङ्गाग्रतः सर्वहिमानि दृष्टिषु ।
दृश्यान्यनेकानि च सर्वदिक्षु द्रष्टुर्मनोहारितया लसन्तु ॥५१॥

तदेव गोचारणकं मनोहरं भृगौ वने खर्बटके च कूर्दनम् ।
नम्राङ्कुराणां मदनस्य सञ्चयः फलान्तराणामपि यत्र लम्भनम् ॥५२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुन्नागतिन्दुद्रुमशीर्षकादिषु वितायमानासु लतासु जालिनाम् ।
सवृन्तपत्रात्मकपीठिकास्थितः कर्त्तास्मि तत्त्रोटनभक्षणे पुनः ॥५३॥

भुवो विकासः परिपूर्णको भवेद् यस्मिन् समुद्योग-सुयन्त्रनिर्मितिः ।
निजावलम्बो बहुवस्तुविक्रयो विकासमाप्तेषु समुन्नता स्थितिः ॥५४॥

पुत्राश्च ते साक्षरतारता भुवि चरित्रनीत्योरवलम्बकाः स्वतः ।
विधौ प्रवीणाः प्रविधावपि स्फुटा भवन्तु नेपालजनास्तदातनाः ॥५५॥

जनास्तदानीन्तनकास्तु संस्कृते हृदा सदा चाध्ययनाय सूद्यताः ।
वदन्तु जानन्तु च तत् सदाभवं यथा विशिष्टा निजचातुरी भवेत् ॥५६॥

न मे तदानीं जननी मनोव्यथा–दरिद्रता–ऽभाव–क्षुधाऽऽमयाविला ।
न नक्रबन्धेन निपीडिता भवेत् अकारणं कोऽपि न बाधको भवेत् ॥५७॥

अनेकनक्रादिपिधानतो वयं सुशिक्षिताः स्याम सदात्मलम्बने ।
तथाविधा नैव पिधानराक्षसी प्रभाविणी स्यादिति चोद्यतिर्भवेत् ॥५८॥

विशालयोर्वित्तविकासयुक्तयोः समृद्धयोर्भारतचीनदेशयोः ।
हितार्थमेलेन निरोधसम्भवान् निजावलम्बो नितरामपेक्षितः ॥५९॥

कृषिर्विकास्या पशुपालनञ्च जलीयविद्युद्विपुला विधेया
भौमेन्धनं साधु विदोहनीयं समेषु सम्पन्नतमेषु नो भयम् ॥६०॥

स्वयंप्रभुर्मे प्रभुसत्तया युता अखण्डिता चैकमयी पुरातनात् ।
केनापि दुष्टा न मतिर्विधीयतां विधायकश्चेत् स हि दण्डितो भवेत् ॥६१॥

शैलाग्रतो रुचिरदर्शनकाङ्क्षिणःस्युर्देशोन्नतिर्भवतु शास्त्रसमुन्नतिश्च ।
दैन्यं पराभवतु दुर्गमता गतास्तु मातस्त्वदीयजनतास्तु हि कर्मयोगा ॥६२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मातर्विभिन्नविधभूतसमुन्नतिःस्यात्
सेवा च त्वद्विषयिणी सकलैः कृता स्यात् ।
त्वां दुर्गमां समवधार्य न चात्मजास्ते
हित्वा त्वदीयचरणौ न हि यान्तु दूरम् ॥६३॥

स्वास्थ्ये कृषौ विविधमार्गविधेर् ऋजुत्वे
वृत्तेश्च सर्वसुलभत्वकृतौ समर्थे ।
देशान्तरस्य गमनस्य निरोधनेन
त्वत्पुत्रका जननि ! तावकसेवकाः स्युः ॥६४॥

कार्यं प्रियं भवति वित्तविकासकं चेद्
देशोन्नतावपि तदेव हि तेन योज्यम् ।
संस्कारसंस्कृतजना हि च तत्र योग्याः
स्युरेव ते जननी शीघ्रविकासकाश्च । ॥ ६५॥

इति नेपालगौरवमहाकाव्ये मातृभूमिसौन्दर्यादि- वर्णनं नाम तृतीयः परिमलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चतुर्थः परिमलः

संस्कारगौरवम्

सनातनेऽत्र नो धर्मे संस्कारा गुणवर्धकाः ।
बुद्धिपाटववंशाणुरक्षकाः कर्मणे हिताः ॥१॥

पापमोचनतो जाता गुणाधानाच्च सम्भवाः ।
योग्यता यैः प्रजायन्ते संस्कारा नो विशेषकाः ॥२॥

यथाकालं तु सम्पन्नैः संस्कारैर्गौरवायितैः ।
गोत्रप्रवरतः शुद्धैर्विवाहैः पातिव्रत्यतः ॥३॥

सनातनार्यसंस्कारजात्यादेःपरिरक्षणम् ।
भवतीत्यवधातव्यं कर्त्तव्यञ्च तथा समैः ॥४॥

जातसंस्कारतः पापमोचनं सा च योग्यता ।
तेन गर्भाशयस्थस्य वीर्यस्य चैनसोऽत्ययः ॥५॥

व्रतबन्धेन होतृत्वे वेदानां पठने तथा ।
पाचकत्वे च विप्राणामधिकारश्च जायते ॥६॥

चत्वारिंशद्धि संस्कारा गौतमस्य मते मताः ।
व्यासस्य, जातुकर्ण्यस्य मते षोडशकाश्च ते ॥७॥

व्यासाभिमतसंस्कारा एव नेपालसम्मताः ।
गर्भाधानादितोऽन्त्येष्टिपर्यन्ता एव ते मताः ॥८॥

तत्र नामविधानञ्च शुभान्नप्राशनं तथा ।
व्रतबन्धो हि साङ्गश्च विवाहान्त्येष्टिके पुनः ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सोत्सवं विधिमाश्रित्य विधीयन्ते समैर्जनैः ।
मुख्यत्वादनिवार्यत्वान् नान्ये कालार्थसंक्षयात् ॥१०॥

अन्नप्राशादिसंस्काराः क्रियन्तेऽद्य यथा तथा ।
प्रदर्शनन्तु वित्तस्य सामर्थ्यस्यात्र लोक्यते ॥११॥

एवं शिक्षितवर्गैश्च सन्देहेन विना समे ।
सम्मान्यन्ते ऽनया दृष्ट्या गौरवायैव ते मताः ॥१२॥

सति जन्मनि जातस्य जरायोः कर्त्तनात्परम् ।
घृतं मधु च सम्प्राश्य स्तन्यं मातुः प्रपाय्यते ॥१३॥

जातकर्म च मन्त्राणां प्रयोगेण विधीयते ।
बृहदारण्यकादौ च विस्तरो ह्यस्य प्राप्यते ॥१४॥

पश्चाच्च जातकस्याद्यं कर्म नामविधानकम् ।
क्रियते विधिना तत्तु द्विजानां नास्ति लोपितम् ॥१५॥

व्यवहारश्च व्यावृत्तिर्नाम्नो लाभौ प्रकीर्त्तितौ ।
यज्ञादेर्विनियोगादौ कर्त्तृत्वेऽप्यनिवार्यता ॥१६॥

संस्कारोऽयं तु नेपाले एकाधिकदशे दिने ।
विधीयतेऽथवा पुण्यतिथौ नक्षत्रके शुभे ॥१७॥

ब्रह्मविष्णुमहेशानां नाम्नो नुस्तद्विधीयते ।
नारीणां देविकानाम्न इति नेपालगौरवम् ॥१८॥

वैदेशिक्याश्च शिक्षायाः प्रभावाद् विकृतेस्तथा ।
कलुषीक्रियमाणानि कर्माणि नोऽद्य विद्महे ॥१९॥

देशस्य जनतायाश्च स्वाभिज्ञानं परं मतम् ।
निजाया धर्मसंस्कारसंस्कृतेः साधु पालनम् ॥२०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धर्मादीनां विशिष्यानां तत्त्वानां विरहेऽशुभे ।
राष्ट्रियताऽपि तद्देश्या सदैव दुर्बलायते ॥२१॥

दुर्बला यस्य राष्ट्रस्य मूलं राष्ट्रियता भवेत् ।
यथा रिक्तो वातकुम्भो वात्यायां साधु सम्पतेद् ॥२२॥

एवं स्वलक्षणार्थञ्च संस्काराः समपेक्षिताः ।
गुणाधानेऽथ पात्रत्वे प्रोक्ता आवश्यकाश्च ते ॥२३॥

वैयाकरणमूर्धन्यपाणिनेः सूत्रणेऽपि च ।
संस्कारा भूषणत्वेन कल्पितास्ते विशिष्टकाः ॥२४॥

अन्नप्राशनसंस्कारः सोत्साहमत्र देशके ।
क्रियते विधितः सर्वैर्योजनावित्तपूर्वकम् ॥२५॥

अन्नञ्च भोजनं प्रोक्तं कलौ प्राणास्तदाहिताः ।
जातानां प्राणदेहानां रक्षा पुष्टिश्च तद्भवे ॥२६॥

अन्नं तु भोजनं ज्ञेयं चाशनं तस्य खादनम् ।
प्रकृष्टमदनं प्रार्थो विधिना प्रथमाशनम् ॥२७॥

आहारशुद्धिजा सत्त्वशुद्धिरेषान्नसंहिता ।
तेनैव भोजने तस्य क्रियायां शुद्धिरीप्सिता ॥२८॥

तस्य प्रारभणं चास्मात् संस्काराज्जातकस्य हि ।
भाविजीवनकं तस्य सफलं पालनाद् भवेत् ॥२९॥

बालाश्च त्रिविधा उक्ताश्चरकेणायुषो विदा ।
दुग्धाशी च पयोऽन्नाशी चान्नमात्रस्य चाशकः ॥३०॥

अन्नप्राशनतो बालो दुग्धान्नाशी विधीयते ।
प्राप्तसंस्कारकस्ताभ्यां पुष्टो धीमांश्च जायते ॥३१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्नाशनेऽपि बालस्य मातुः स्तन्यं न लोपयेत् ।
वर्षद्वयादूर्ध्वमपि सम्भवे तत् प्रपाययेत् ॥३२॥

पुष्टेन च शरीरेण धिया संस्कृतया पुनः ।
पुरुषार्थस्य सम्प्राप्तिर्ध्रुवेति तत्र कल्प्यते ॥३३॥

बालानां षष्ठके मासे बालिकानाञ्च पञ्चमे ।
तद्देहरचनादृष्ट्या पूर्वं बाला तु प्राश्यते ॥३४॥

अन्नानां प्राशनं नैव सुधास्तन्यनिषेधनम् ।
पूरकं जातसम्पुष्टेर्विकल्पः सङ्कटेऽथवा ॥३५॥

जीवनावधिव्यापिन्या अनिवार्यान्नसन्ततेः ।
प्रारम्भो मङ्गलायत्तः शुभदोऽत्रेति काम्यते ॥३६॥

कर्णवेधोऽपि नेपाले बालानां संविधीयते ।
तृतीये पञ्चमे वर्षे कुलाचारेण वा पुनः ॥३७॥

पूर्णस्य पुरुषत्वस्य स्त्रीत्वस्य चापि तादृशा ।
सम्प्राप्तिरिष्यतेऽनेन श्राद्धस्य कर्तृतापि च ॥३८॥

वेधोद्भूतेषु च्छिद्रेषु प्रविष्टैरर्करस्मिभिः ।
क्रियन्ते बालकाः पूतास्तेजोवन्त इति श्रुतिः ॥३९॥

देवान् सम्पूज्य सूर्यस्य सम्मुखं बालकर्णकौ ।
स्वर्णरजतसूच्या वै वेधयेत् श्रद्धया जनः ॥४०॥

बालस्य प्रथमं दक्षे कर्णेऽस्य वेधनं भवेत् ।
ततो वामस्य वेधः स्यादिति शास्त्रपरम्परे ॥४१॥

बालिकायास्तु प्रथमं वामस्यानन्तरं शुभा ।
दक्षिणायाश्च नासायास्तादृशीच्छेदनक्रिया ॥४२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नासायां मौक्तिकं नार्याः कर्णयोः कर्णभूषणम् ।
शोभयेते च ता नित्यं वैशिष्ट्यं वर्धयन्ति च ॥४३॥

नासायां फुल्लिका रम्या कर्णयोः कर्णिके पुनः ।
प्रमदाः प्राणहारिण्यः पुष्टैः तारुण्यकाङ्कुरैः ॥४४॥

पौरस्त्यानाञ्च नारीणां वैशिष्ट्यस्य प्रकाशकम् ।
हस्तयोश्चूडिकाश्चैव सीमन्ते नागसम्भवम् ॥४५॥

संस्कारोऽयन्तु बालानां जन्मर्क्षे दक्षिणायने ।
रात्रिकायाञ्च विदुषा न कार्य इति निर्णयः ॥४६॥

उपनयनम्-
उपोपसर्गान्नयतेर्ल्युटि व्युत्पाद्यते पदम् ।
उपनीतिस्तथाचार्यसमीपे संस्कृतिर्वटोः ॥४७॥

विहिते विधितश्चास्मिन् वेदाधीतौ च याजने ।
पाकक्रियायामन्येषु वटोर्भवति पात्रता ॥४८॥

अनेनैव च संस्कारवरेण द्वितयं जनु-
र्भवतीति द्विजातीनां पूर्वं मैथुनमात्रजम् ॥ ४९॥

मैथुनी मानवी सृष्टिः पशुसाधारणी मता ।
तत्राहारो भयं निद्रा व्यवायो लक्ष्यते सदा ॥५०॥

उपनीतिभवो बालो योग्यत्वाच्छ्रुतिसम्पदाम् ।
धर्मदर्शनस्वाचारान् बोद्धा पालयिता भवेत् ॥५१॥

विधिना यज्ञसूत्रस्य धारणं जपनं तथा ।
श्रुतिस्मृत्युक्तकृत्यानां योग्यताऽस्मिन् कृते भवेत् ॥५२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अशक्तैरपि सोत्साहं ससम्भारं द्विजादिभिः ।
क्रियते व्रतबन्धोऽयं नेपाले गौरवायितः ॥५३॥

व्रताधिकारदानेन व्रते नियमनात् पुनः ।
निषिद्धवारणाच्चापि व्रतबन्धोऽयमुच्यते ॥५४॥

जपपूजादिकृत्यञ्च व्रतत्वेनाभिधीयते ।
तत्र प्रवृत्तिरन्यत्राप्रवृत्तिर्व्रतबन्धता ॥५५॥

व्रतादेशस्वरूपत्वादस्य संस्कारकर्मणः ।
व्रतबन्धेति नेपाले स्वल्पज्ञैरपि बुध्यते ॥५६॥

संस्कारोऽयं त्रिधाऽऽख्यातो नित्यः काम्यो निमित्तजः ।
अष्टमादिषु निर्दिष्टे विहितो नित्यको मतः ॥५७॥

ब्रह्मवर्चसकामस्य पञ्चमादिष्वनुष्ठितः ।
विशिष्टकामनाजत्वात् काम्योऽयं समुदाहृतः ॥५८॥

प्रायश्चित्तात्मपापापनोदनायै पुनः कृतः ।
धर्मसंस्कारभीग्रस्तैः क्रियते यो निमित्तजः ॥५९॥

नित्योऽपि द्विविधः प्रोक्तो मुख्यगौणप्रभेदतः ।
मुख्यस्तु प्रथमं प्रोक्तो गौणोऽतिक्रान्तकालिकः ॥६०॥

कर्मचालकसंस्कारे जाते स्वाचारदृष्टिमान् ।
वटुः सामाजिकश्चास्मिन् जायते गौरवायितः ॥६१॥

चूडोपनयने वेदारम्भस्वावर्त्तने अपि ।
अन्तर्भाव्यैव नेपाले संस्कारोऽयं विधीयते ॥६२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चत्वार एव संस्कारा विधातव्या अलग्नकाः ।
तथाप्यर्थस्य कालस्य क्षीणत्वेन समं कृताः ॥६३॥

संस्कारलोपलोपाय कलिना बाधितोऽपि सः ।
आपत्कालिकवत्सर्वैरिदानीं परिपाल्यते ॥६४॥

स्वाचारशिक्षणाभावात् परानुकरणादपि ।
संस्काराणाञ्च सर्वेषां कर्मकाण्डात्मता स्थिता ॥६५॥

चूडा नाम शिखा बोध्या साचाधिपतिमर्मणि ।
शिरोमध्ये द्विजातीनां विधिना क्रियते शुभा ॥६६॥

वपनं मुण्डनं क्षौरं चूडाकरणमुच्यते ।
शिखास्थापनकर्मेदं मातस्ते गौरवायितम् ॥६७॥

चूडाकर्म च हिन्दूनां चिह्नं सांस्कृतिकं मतम् ।
शोभासम्पत्तिदीर्घायुरधिकारप्रदायकम् ॥६८॥

प्रकृष्टायै च सन्तत्यै पराक्रमप्रवृद्धये ।
विद्योत्पादनशक्तिभ्यां संस्कारो यजुषोहितः ॥६९॥

तृतीयात्सप्तमं यावत् स्वकुलाचारतोऽथवा ।
चूडाकरणसंस्कारः क्रियते मुण्डनात्मकः ॥७०॥

चूडा जूडात्मतां प्राप्ता हिन्द्याम्, चूल्ठोऽथ टुप्पिका –
नेपाल्यां तव पुत्रैस्तु प्रोच्यते तद्भवे मुदा ॥७१॥

अन्नपाचनसम्पत्त्यै दीर्घायुष्ट्वाय सृष्टये ।
सौन्दर्यवीर्यवृद्ध्यादिलब्धये यजुषोहितम् ॥७२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वेदारम्भः–

उपनीतस्य बालस्य मेधाजननकर्मतः ।
प्रज्ञाश्रद्धे क्रिया भक्तिः काम्यन्ते तद्धिते रताः ॥७३॥

श्रीगणेशञ्च वाग्देवीं प्रपूज्य समये शुभे ।
सदाचार्येण वेदस्य स्वारम्भोऽमृतदो मतः ॥७४॥

तत्त्वज्ञानस्य दाता च तदङ्गेषु प्रवेशकः ।
ब्रह्मचर्याश्रमे साध्यो वेदारम्भोऽस्ति ज्ञानदः ॥७५॥

वेदारम्भेण रिक्तन्तु ज्ञानं वैषयिकं समम् ।
पुण्यप्रयोजनं नैव केवलं वृत्तिदं भवेत् ॥७६॥

हवनाचारशौचानि सन्ध्योपासनकर्म च ।
शिक्ष्यन्ते गुरुणात्रैव सफलो यैर्वटुर्भवेत् ॥७७॥

इदानीं व्रतबन्धाख्ये कर्मण्येव तु दीक्षकैः ।
तस्याभिनयनं कृत्वा तदारम्भः समाप्यते ॥७८॥

समावर्त्तनम्–

समावर्त्तनसंस्कार एकोऽन्यतमताङ्गतः ।
वेदाध्ययनतः पश्चाद् गृहागमनबोधकः ॥७९॥
इदानीं व्रतबन्धाख्ये गायत्रीं श्रुतवान् वटुः ।
समावर्त्तनसंस्कारं पूरयित्वैति स्वं गृहम् ॥८०॥

अत्र कर्मणि मुख्यत्वं स्नानस्येति धिया बुधाः ।
वेदस्नानमिमं स्नानसंस्कारञ्चाहुरुत्तमम् ॥८१॥

अभिमन्त्रितकैरष्टकलशैर्विधिपूर्वकम् ।
वटुकः स्नाप्यते तस्मादसौ वेदस्य स्नातकः ॥८२॥

समाप्य पूर्वकृत्यानि गुरुर्दीक्षयते वटुम् ।
सत्यं समुच्यतां धर्मे स्वाध्याये न प्रमाद्यताम् ॥८३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सन्तानोच्छेदनं नैव पित्रतिथिषु चादरः ।
अनिन्द्याचरणं कार्यं यथावित्तं ददातु च ॥८४॥

जिज्ञासुना सदा भाव्यं स्वावलम्बनशीलिना ।
अविच्छिन्नतया कर्म कुर्वतैव हि जीव्यताम् ॥८५॥

विश्वविद्यालये चाद्य चलद्दीक्षान्तकर्मणि ।
दीक्षावाक्यतयैवैषामुपदेशोऽभिनीयते ॥८६॥

वेदवेदाङ्गवेत्तारं द्विजं स्वाचारचुञ्चुकम् ।
श्रद्धावन्तं गुरुं कुर्याज्जनकं वा तु नैष्ठिकम् ॥८७॥

दीक्षितो दीक्षकश्चापि स्यातां मर्यादयान्वितौ ।
मर्यादोत्पादकस्यास्य तदा सार्थक्यगौरवे ॥८८॥

संस्काराङ्कनदीप्त्योर्वै चाभिवृद्ध्यै तु माणवे ।
सदाचारश्च विद्वाँश्च गुरुरुपनये भवेत् ॥८९॥

सर्व एव हि संस्कारा विधिना श्रद्धयान्विताः ।
क्रियेरन् यदि सम्बद्धैरस्मद्वैशिष्ट्यबोधकाः ॥९०॥

इदमप्यस्ति नेपालमातुर्गौरववर्धकम् ।
विशेषयति चान्येभ्यः समुन्नयति सत्पथे ॥९१॥

संस्काराः गुणवर्द्धका विधिमया मेधाविचारोन्नया
अस्मज्जातिविशेषकाश्शिवकराः सूक्ष्मेक्षिकोत्पादकाः ।

वेदाद्यध्ययनेषु चाध्वरविधौ पाकादिकेऽप्यर्हतां
यच्छन्तो निगमागमैश्च विहितास्ते वै विवाहादयः ॥९२॥

इति नेपालगौरवमहाकाव्ये संस्कारगौरवं नाम चतुर्थः परिमलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पञ्चमः परिमलः

विवाहसंस्कारः

विवाहसंस्कारवरोऽस्त्यनादितो नरस्य नार्या सहधर्मबोधकः ।
कृत्यानया निर्मितमेव युग्मकं विधानतः कामकलासु सम्मतम् ॥१॥

तयो रतिः सन्ततिसूतिसत्कृतिः सहोषितिर्यज्ञक्रियाविनिर्मितिः ।
परस्परं संसरणे समर्थितिर्- विधेर्जनस्यापि च तासु सम्मतिः ॥२॥

नरश्च देशोन्नतिकारको नयान् नरत्वयुक्ता नरधर्म्यताङ्गता ।
हिताय देशस्य नरस्य सार्धगा भवेच्च नारी पुरुषेण वाहिता ॥३॥

विप्रस्य चाग्नेः पुरतो विवाहो विधीयमानोऽतिशयं बिभर्त्ति ।
रतेः प्रशान्तिर्नहि केवलं फलं प्रजाततेर्धर्मचयस्य वर्धनम् ॥४॥

विवाहतः सन्ततयो भवन्ति तास्- तथापि पत्नी परिवारनामभाक् ।
यतो हि सा वारयते पराङ्गनाःपतिं स्वकीयञ्च परासु चोद्यतम् ॥५॥

विवाहितो नापि विवाहितापि च खेदापनुत्यै न रमेत नित्यशः ।
समार्त्तवात् शुद्धिमये त्वनेहसि तोकेच्छया शास्त्रविधानतश्चरेत् ॥६॥

रजो हि नार्या बलबुद्धिदायकं नरस्य वीर्यं ह्यपि शक्तिदं परम् ।
क्षुद्रेण चानन्दमिषेण लुब्धकं न पातयेत् तद् मनसापि युग्मकम् ॥७॥

स्वतन्त्रभावेन रतिः प्रयोजिता समृद्धराष्ट्रेषु च 'एड्स'नामकम् ।
चिकित्सयाप्यप्रतिकार्यताङ्गतं गदं जनोद्वेगकरं हि कुर्यात् ॥८॥

विचारशीलः पठनेऽथ लेखने रतः सदा स्वीयसमाजसून्नतौ ।
गृहे स्थितश्चापि विवर्जयेन्मुदा समानशय्यामपि कामवर्धिकाम् ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्माद्विवाहो विधिपूर्वको भवे-दनन्यता चापि विवाहितद्वये ।
तयैव खेदापगमः सुसन्ततिः समुन्नतिः श्रेयसि पात्रताऽऽगतिः ॥१०॥

रतिप्रयुक्ते ह्यविवेकभाविते नरेण नार्या सहसा परिग्रहे ।
सवर्णताभिन्नसमानगोत्रके कृशाः सुमन्दाः सरुजाश्च तद्भवाः ॥११॥

पशावपि सन्निकटाश्च वंशजाःप्रसूतये वापविधौ निषेधिताः ।
कथं मनुष्येषु समानगोत्रजाविवाहने योग्यतमा भवेयुः ? ॥१२॥

अतश्च पौरस्त्यविवाहपद्धतौ व्यवस्थितिर्ज्येष्ठजनैः कृता शुचिः ।
हिताय दाम्पत्यसुखार्थिनां भवे समुन्नतेश्शान्तिततेः प्रवर्धिनी ॥१३॥

स्वयङ्कृतं रूपवयोऽर्थकृत्रिम-समाचरैः सुन्दरताप्रदर्शनैः ।
विवाहनं प्रेमिजनैस्त्वरातुरै-र्यथार्थतायां विफलायितं भुवि ॥१४॥

समृद्धदेशेषु विवाहकर्मणि स्वतन्त्रता, मैथुनकर्मणि प्रिया ।
परस्परं विश्वसितेरभावातो विवाहहाने प्रतिघस्रभाविनी ॥१५॥

परस्परं त्यागभयाभिशङ्क्या सदैव वातावरणैः प्रदूषितैः ।
बालास्तदीया अनिशं प्रभाविताः समाश्रयन्ते निजदेशशासनम् ॥१६॥

पतीन् द्वितीयान् वरयन्ति सार्भकाः यदा च या बालविवर्धनाय ताः ।
पत्युश्च पूर्वस्य हि नित्यदोहनै-र्विलासितायां व्यतियन्ति जीवनम् ॥१७॥

विकारजातेन सदैव बुद्धिमत् सुशिक्षितं स्याच्च परम्परां वहत् ।
प्रयोजनावाप्तिदिशे समुन्मुखं स्वकीयसंस्कारहिताय युग्मकम् ॥१८॥

रतिस्तु गौणं विबुधैः फलं मतं स्वकीयदेशोन्नयनन्तु मुख्यकम् ।
विचारयन्ताविति दम्पती सदा वरौ मतौ स्तुत्यतमावभीप्सितौ ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धनञ्च सौन्दर्यकुले सुविद्यता विवाहकृत्ये प्रभवन्ति योजकाः ।
कुलेन विद्यावसुना विवाहनं तयोस्तु विद्या चयने सुकारणम् ॥२०॥

गिरा प्रदानं वरकन्ययोर्मिथः सुकन्यकादानमथास्ति नागज-
प्रदानकं सन्ततिजन्मशिक्षिका चतुर्थिकोद्वाहकृतौ च मुख्यकाः ॥२१॥

पुरा विवाहो ह्यभिभावकैर्जनै-र्विधीयते स्मेति द्वयेऽप्यबोधके ।
शनैः प्रपुष्टे ह्युभयोस्तु यौवने प्रणीयतेऽन्योन्यजनः स्म युग्मकैः ॥२२॥

परं त्विदानीं समवाप्तयौवनैः परस्परं प्रेम विधाय सत्वरम् ।
विवाह्यतेऽथापि तथानुरागो न दृश्यते तत्र परप्रभावतः ॥२३॥

अतश्च पित्रादिकचेष्टया कृतं विवाहनं साधु फलाय कल्पते ।
यतो हि तत् पक्वपरीक्षणाद् भवं न निष्फलं याति समेष्वपावृतम् ॥२४॥

विवाहभेदः परिगण्यतेऽष्टकस्- तत्रास्ति ब्राह्मश्चलितस्तु वैदिकः ।
वृत्वाथ सत्कृत्य च धीमते पिता ददाति कन्यां प्रयतोऽत्र संस्कृताम् ॥२५॥

परोऽस्ति गान्धर्व इति प्रचालितो निजेच्छया कामनया च भावितः ।
परस्पराकर्षणमैथुनेच्छया ह्युपेक्ष्यते ज्येष्ठजनश्च सुस्थितिः ॥२६॥

अयं तु विप्रेतरकेषु दृश्यते परन्तु शिक्षाप्रभवोऽस्ति व्यत्ययः ।
सगोत्रिका चाप्यसवर्णिकाङ्गना रतेः प्रशान्त्यायुपयम्यते चलैः ॥२७॥

विवाह एषोऽस्ति विनैव साक्षिकः कुचोरुजाकर्षण-रूपसम्भवः ।
कृतः स्वसाक्ष्येण मदप्रकर्षतो विशीर्यमाणे शिथिलश्च निष्फलः ॥२८॥

स्वकस्य चेच्छाचरणं निरुन्धे विप्रानलौ तोषयते समर्चया ।
शुभावसथ्येऽथ जुहोति हव्यकं विवाह एषोऽस्ति बुधैरुरीकृतः ॥२९॥

अयं विवाहाग्निरपीर्यते बुधैः स चापि वध्वा सह भर्त्तुरालयम् ।
प्रवेश्य पाकादिककृत्यस्मार्त्तकं विधीयते विप्रजनैर्दिवानिशम् ॥३०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गृहे स्थितानां सह कर्मस्मातकैः श्रुत्युक्तकर्माण्यपि चोदितानि ।
ततश्च भिन्नाग्निषु कर्म वैदिकं विधीयते त्वग्निषु गोपितेषु ॥३१॥

त्रयोऽग्नयो दक्षिणगार्हपत्यकौ शुभाहवाग्निश्च मता हविर्मुखाः ।
तत्रैव युक्तं हवनादि पुण्यदं विधित्सितं शास्त्रचयेन नैत्यिकम् ॥३२॥

राज्यं निरस्यापि, निजस्य स्वामिन ऋणस्य शैव्यापकृतौ तु पत्निका ।
स्वयं च विक्रीय मुमोच शङ्कुजं तस्मात् सदादर्शमयौ मतावुभौ ॥३३॥

नलोऽनलो वैरितृणेषु रूपवान् गुणैः प्रविष्टो दमयन्तिकाहृदि ।
वनेऽपि स्वस्याः पटुताप्रदर्शिनी दाम्पत्यभावे युगलं तयोः परम् ॥३४॥

यमस्य पाशादपि मुक्तिदा सती धवे च श्रीसत्यवते पतिव्रतात् ।
सुखे सदा दम्पतिजेऽनुकार्यौ वधूवराभ्यामधुनापि तावुभौ ॥३५॥

सतीशिवादर्शमयौ च दम्पती सदानुकार्यौ भवतो वधूवरैः ।
अमानशोधाय च यत्र पत्यु- श्शरीरहोमेऽपि समुद्यता सती ॥३६॥

परीक्षणे चाग्निमयेऽथ जानकी फलान्वितारण्यमयेऽपि राघवान् ।
शुभाभिलाषान् दधती हृदा सती पतिव्रते सा शिखरायिता भुवि ॥३७॥

विवाहसंस्कारकृतैकदेहौ स्वभाविनि प्रोज्वलकामनायुतौ ।
परस्परानन्यतया जिजीविषू तथाविधौ प्रीतियुतौ स्मरेताम् ॥३८॥

प्रभावितास्तादृशयुग्मगौरवात् सुशिक्षिता युग्मचयाः स्वदेशजाः ।
प्रणीतिका स्त्रीपुरुषैः परस्परं विधीयतां नोन्नतदेशजैरिव ॥ ३९॥

मदीयपुत्रा विनयेन भूषिताः समुन्नतिस्तैः सह जन्मभूमिजा ।
द्रुतं भवेदित्यभिशंसनं नृणां नेपालमातुर्विशिनष्टि गौरवम् ॥४०॥

न षोडशीयास्तनुजाश्च हृद्या धनार्जने मैथुनकेऽपि चोदिताः ।
भवन्ति पित्रादिजनैस्तु रक्षणं सुशिक्षणं तेन वितीर्यते सदा ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रभूतनैजानुभवेन शिक्षितौ हितेच्छुकौ पुत्रसमुन्नयोन्मुखौ ।
विवाह- वृत्तिचयनोपयुक्ततां प्रबोध्य साफल्यमयान् विधत्तः ॥४२॥

दृढानुभूत्या विरहे तु यूनां विवाहने वृत्तिचयेऽपि पातः ।
सुसम्भवस्तेन न दूरणं मतं स्वसन्ततेः किन्तु निजाभिरक्षणम् ॥४३॥

अनेन तथ्येन निजैः प्रयोजितो विवाहसंस्कार इहास्ति चालितः ।
कृतोऽविवेकात् सहसा करग्रहो निजं वयः साधु न चाप्नुयादपि ॥४४॥

विधिप्रयुक्तं बहुधा विचारितं विवाहनं स्वाग्रजनैः समर्थितम् ।
तथा समाजेऽत्र च पारिवारिकी स्थितिस्त्वदीया जनिके ! विशेषिका ॥४५॥

धमार्थकाममोक्षेषु विज्ञाः कर्मनिरालसाः ।
स्वावलम्बेन संयुक्ता भवन्तु च विवाहिताः ॥४६॥

पातिव्रत्येन पत्नी च पत्नीव्रततया पतिः ।
सन्तुष्टौ भवतां देशे सर्वाङ्गीणविकासकाः ॥४७॥

देशो ददाति चास्मभ्यं प्रणानाश्रयणं तथा ।
अस्माभिस्तन्मुखोल्लासो देयो दम्पतिभिस्सदा ॥४८॥

विशेषाधायकत्वाच्च नेपालगौरवायिता ।
अन्त्येष्टिर्वण्यते चाग्रे विवाहानन्तरं क्रिया ॥४९॥

इति नेपालगौरवमहाकाव्ये विवाहसंस्कारवर्णनं नाम पञ्चमः परिमलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

षष्ठः परिमलः

अन्त्येष्टिसंस्कारवर्णनम्

निषेकनामा प्रथमोऽस्ति बैजिको ह्यमोघतायै गुणितोपलब्धये ।
विमुक्तिहेतुर्मृतकस्य चान्तिमाश्रुत्यादितोऽन्त्येष्टिरभूत् प्रवर्तिता ॥१॥

सुजन्मसंस्कारवतां नृणां सदा सुजीवनोत्कर्षणकारकं मतम् ।
मृतिर्हि चान्तेष्टितया सनाथिका तस्यैव प्रेतत्वविमुक्तिकारिका ॥२॥

मृताय तस्मै तु विमुक्तिदानतः, प्रबाधिताः स्वीयजना भवन्ति नो ।
तया विना बम्भ्रमणेन दुःखितः स्वयं स्वकान् वायुमयः स बाधते ॥३॥

मृतस्य पापस्य फलस्य भुक्तये प्रकल्पिता प्रेतमयी च योनिका ।
विना च शास्त्राभिहितैस्तु कर्मभिर्न मुच्यते किन्तु चिराय सीदति ॥४॥

जले प्रमग्नो ज्वलनेन दग्धवान् स्खलँश्च वृक्षात् गरलेन घातितः ।
अनश्नुवन् प्रेमनिरोधपाशितः स्वकर्मणा प्रेततया विजृम्भते ॥५॥

मृतात्मना वायुमयं तदाप्यते ततः समीहा धनभूगृहादिषु ।
अथो परीवारनिजान्वयोत्सुकस्तेनैव तानात्ममयाञ्चिकीर्षति ॥६॥

ततश्च वायुप्रचुरेण वर्ष्मणा यदीययोनिं मनसा समीहते ।
तदाप्य गोसर्पलुलायमूर्त्तिभिः प्रपीडनं बन्धुजनेषु रच्यते ॥७॥

प्रशान्तये प्रेतसुपीडनाद् बत प्रमुक्तये तत्स्थितितश्च दुख्यतः ।
परम्पराप्राप्तविधानसम्मता समैर्विधेया चरमास्ति संस्क्रिया ॥८॥

मनुष्यतो भिन्नगवादिषु पुनर्न पञ्चकोशा उदयं प्रयान्ति ते ।
ततस्तिरश्चां वपुषि प्रतर्षणं न जायते तेन न चान्त्यकर्मता ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विवाहिताया उपनीतकस्य च मुखाग्निदानं तनयादिकर्त्तृकम् ।
जनेन तेनैव सपिण्डनान्तिका क्रियापि कार्या प्रयतेन निष्ठया ॥१०॥

मृतस्य पुत्रैरथ जायया पुनः समासु चाशौचिमयैः प्रभूयते ।
सितेन वासाचरणेन निष्ठया तदाब्दिकं शास्त्रदिशा विधीयते ॥११॥

सितानि वस्त्राणि सदाचरक्रिया मृतस्य मासादिभवञ्च श्राद्धकम् ।
कृतज्ञतातर्पणमात्मजादिभिः कृतञ्च मातस्तव गौरवायितम् ॥१२॥

संसारचक्रस्य गतेः प्रवृत्तये जनिर्मृतिश्चापि निरन्तरायिता ।
एकापि वैषम्यमयी यदा सृतौ विधेर्व्यवस्था विषमायिता भवेत् ॥१३॥

विना च मृत्या जननं यदा भवेद् विश्वम्भरा चापि भवेन्न धूर्वहा ।
जनिं विना यापि मृतिः सदा भवेद् वसुन्धरेयं वसु किङ्कृते धरेत् ? ॥१४॥

जनिर्मृतिश्चेति ध्रुवं सदा स्थिते जनौ च सत्यां मरणं ध्रुवं मतम् ।
इति स्थितेर्मृत्युवतां तु तृप्तये प्रेतत्वमुक्त्यै च मृतान्त्यकर्मता ॥१५॥

सुजन्मता भाजनता गुणान्वयः कृतैस्तु संस्कारवरैरवापिताः ।
भवन्ति, चान्त्येष्टितया तु नैजिका प्रमोचनी प्रेतभयापहारिका ॥१६॥

प्रयाणकाले मरणोन्मुखानने जलञ्च गाङ्गं तुलसीदलान्वितम् ।
पुत्रादिजङ्घां कृतसूपबर्हणं शनैर्जलं भावमयेन पाययेत् ॥१७॥

जने च मृत्योर्वशताङ्गते स्वके शवात्मकं स्नापितकं विधाय ।
नवानि वस्त्राणि च धापयित्वा विभूष्य दाहाय नदीं समाश्रयेत् ॥१८॥

शवीयवस्त्रेण च तं विभूषितं शिवाक्षवृन्दादिचयेन संयुतम् ।
शिखां शिखीकृत्य च सोपवीतिनं ह्युदक्शिरस्कं समिधां चये न्यसेत् ॥१९॥

पवित्रवर्त्त्यादिभवो हि चौरसपुत्रेण सापिण्ड्यवतापि गोत्रिणा ।
प्रदक्षिणीकृत्य शवं त्रिरावृतं मुखानलो भावमयेन दीयते ॥२०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जलस्थलीयाग्निमयाः समाधयः जनात्यये तस्य विलीतिकारिणः ।
समाधिकश्चाग्निमयो गुरुर्मतस्तदन्यकौ नैव शवांशशेषतः ॥२१॥

शवे जलीये प्रवहे प्रवाहिते तदस्थिषु प्रेतनिवेशसम्भवात् ।
तदस्थिकान्वेषणदीनताङ्गतः प्रेतो हि दुःखयेत स्वकाँश्च शातयेत् ॥२२॥

स्थले समाधावपि तादृशी गतिः मृताभिलाषस्य चिरेण वर्त्तनात् ।
पुनः पुनस्तत्र निवेशकाङ्क्षया बम्भ्रम्यमाणेन सदैव पीड्यते ॥२३॥

समाधिके चाग्निमये तु प्रेतकाधिष्ठाननाशात्परिवर्त्तनादपि ।
ततश्च गाङ्गेयजलप्रवाहणाद् दग्धस्य तद्रूपमयस्य सम्भवः ॥२४॥

तथा च देहस्य च पूर्वकस्य सम्बन्धनाशात् स्थिरतां गतः सः ।
विधिप्रयुक्तैरपि पिण्डनक्रियाश्राद्धात्मकैः प्रेतमयात् प्रमुच्यते ॥२५॥

षट्कोषनिष्पन्नविशालविग्रहे कामादिदे भौतिकभोगभागिनि ।
अनेकवर्षाणि रसन् स जीवो न तं त्वनायासतया जिहासति ॥२६॥

स्थविष्ठदेहाद् बहुकालिकालयात् कष्टेन निर्याति स सूक्ष्मविग्रहः ।
वातात्मकः सोऽपि स एव वीतो लघुर्द्रुतः सर्वनिवेशदक्षः ॥२७॥

इमां हि चान्त्येष्टिमयीं विना लघुः पुनः पुनर्वातमयो विचेष्टते ।
पुरातने स्वाभिनिवेशचालितस्तदङ्गमात्रेऽपि निवस्तुमीहते ॥२८॥

सनातनश्चाग्निसमाधिरुत्तमस्ततश्च पिण्डादिमयेन कर्मणा ।
स्थविष्ठविच्छिन्नपुरातनान्वयः प्रमुच्यते प्रेततया न बाधते ॥२९॥

यतेस्तु सन्न्यस्तगृहस्थकर्मणो विभौ सदानन्यतया समर्पणात् ।
स्थविष्ठदेहाभिनिवेशनाशतः समाधिको नाग्निमयो विधीयते ॥३०॥

फलानुरागस्य सदैव हानतो नितम्बिनी–पुत्र–गृहेष्वनादरात् ।
क्रियापि श्राद्धादिमयी न तस्य प्रमुच्यते शुक्लपथः स्वकर्मतः ॥३१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जडं शरीरं न यतेः प्ररोचकं गृहादिवस्तुप्रियता न वासना ।
ततो यतीनां नहि यागकल्पना मुखाग्निदाहोऽपि न पुत्रकादिभिः ॥३२॥

जले समाधिश्च स्थलेऽथवा स प्रशस्यते तेन सदैव लिङ्गिनाम् ।
उभौ च तौ शास्त्रचयानुमोदितौ परम्परातोऽप्यभियुक्तचालितौ ॥३३॥

शरीर–भोग्येषु च तुच्छभावतो विधातरि स्वाभिनिवेशदार्ढ्यतः ।
मृतेऽथ देहे परमाणुकेऽपि च प्रवेष्टुकामो नहि वीत ईहते ॥३४॥

दृढानुरागादघहारिपादयोर्धनादिके नाशितवासनामलात् ।
शरीरतो निर्गतवान् तदात्मा प्रयाति शैघ्र्येण शुभेन कर्मणा ॥३५॥

शरीरवादस्य क्षयेण पूर्वतः प्रयोजिकाया क्षयतश्च तत्र च ।
अद्वैतिनां ब्रह्मविदां न कल्प्यते सुतृप्तये यागकृतिश्च पुत्रकैः ॥३६॥

समर्पणात् कामजकर्मणां पुनः फलस्य त्यागात् कृतकर्मणामपि ।
परात्मसाम्यात् परमानुरागतो विरक्तिमान् शुक्लपथेन मुच्यते ॥३७॥

सदाभवायां निजधर्मसंस्कृतौ स्तनन्धयानाञ्च न दाहकर्मता ।
भुवः समाधिः समकैः प्रदीयते पित्रादिभिर्हृच्छकलेभ्य आहतैः ॥३८॥

जनिः सदाऽऽनन्दमयी समैर्मता लयश्च दुःखानलदो वियोगदः ।
उरस्यनाशो बहुदुःखदः पितुरलब्धिरस्मादनुभूयते वरा ॥३९॥

सदा प्रभो सन्ततयो भवन्तु नश्चिरं श्वसन्त्यो न तु यान्तु शैशवे ।
इतोऽन्यथा स्याद्यदि यस्य कस्यचिद् दुर्भाग्यतस्तन्मरणाय कल्पते ॥४०॥

अथापि गर्भस्य कुपोषकारणात् जनौ च रोगानुगुणाऽचिकित्सया ।
पित्रादिके जीवति तद्विलोकिता यमालयं यान्ति पयोऽनुजीविनः ॥४१॥

स्तनन्धयानां ममतादिवासना–शरीरसम्बन्धविबोधशून्यता ।
तदीयगेहादिषु नात्मभावना न जायते तेन न वीत ईहते ॥४२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्थविष्ठदेहे सपदि प्रविष्टवान् प्रगाढता तस्य न जायते तदा ।
मृतस्य जीवो निजकर्मभावितः प्रयाति तेनास्य न पावकक्रिया ॥४३॥

स्थले समाधिश्च मतो हि शैशवः स चापि क्षीरिद्रुमपार्श्वतो भवेत् ।
स एव दुग्धं पिबतां समाश्रयः सुतृप्तिदश्चापि मृतात्मनां मतः ॥४४॥

त्वदीयसूत्सङ्गगतिश्च वत्सला मृतेऽपि किं नास्ति विवेकसम्मता? ।
तवैव वैशिष्ट्यविवोधनक्षमा समस्ति मातर्नहि भूमिशायिता? ॥४५॥

फलीति राजादनकार्कनामभिर्जनैरभिज्ञाततरुः प्रयुज्यते ।
विशेषतोऽन्त्येष्टिचणैर्विधीयते स्तनन्धयानां निखनक्रियेदृशी ॥४६॥

वयस्तु वैद्ये त्रिविधं विभावितं शिशुत्व–बाल्ये चरमञ्च वार्धकम् ।
शिशुत्वमाद्यं त्रिविधं प्रकल्पितं पयस्तदन्नान्नमयस्य भोजनात् ॥४७॥

पयः पिबन्तोऽथ पयोऽन्नभोजिनः प्रभूतभक्तादिमयेन जीविनः ।
विभागमाप्तेषु च बालकेषु स्तनन्धयानां मरणे भुवि स्थितिः ॥४८॥

स्वजन्महेतुं परिहाय मातरं भूमातरं ह्याश्रितवान् स्तनन्धयः ।
अनन्तकालं स्वपतीह निद्रितः सांसारिकाद् दुःखचयाद्वियोजितः ॥४९॥

अपूर्वसिद्धिं त्वभिलक्ष्य तापसा यथा तपस्यन्ति तरोरधः स्थिताः ।
पुनर्भवे तेऽपि महोदयाप्तये तपश्चरन्तो ध्रुववद्विभावये ॥५०॥

सुदीर्घमायुर्विभवे विशालता धिया च रूपेण च न्यक्क्रियान्यता ।
पुनर्जनिः स्यान्नयपालकाजिरे इतीह लक्ष्याणि तपस्यतश्शिशोः ॥५१॥

हिमालया दृष्टिपथे लसन्तु नः श्वासाश्च नेपालसमीरतश्चलाः ।
स्वदेशमृद्वारिषु खेलने रतिरधीतिगोचारणकर्षणे गतिः ॥५२॥

अथापि चोत्पाद्य मृतिस्तु शैशवी ह्यजातबोधस्य तवास्ति मूढता ।
अवश्यकर्तव्यतया यदीष्यते तदाप्यजन्मैव वरं मतं विधे ! ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वियोगदावानलदग्धमातृकस्तनावुभौ श्च्योतत एव नित्यशः ।
स्तन्यप्रसिक्ता अपि चोलिका पुनर्दृगम्बुनार्द्रा नहि त्वां निषेधतः ? ॥५४॥

जनिञ्च मृत्युं विदधासि विश्वसृड् तदन्यथाकर्तुमपीह चेशसे ।
ततोऽर्भकान् मातृहृदोऽशकायितानमारयित्वा जहि गर्भमेव तु ॥५५॥

नवस्य जातस्य तु विश्वदर्शनं त्वपूर्वकार्याणि च तद्भवान्यपि ।
सुसम्भवानीति च युक्तिमत्तया ह्यकालकं तन्मरणं विगर्हितम् ॥५६॥

विधिः सुपूर्णं प्रददातु चायुषं प्रशासनं साधु कुमारभृत्यकम् ।
नवाय जाताय सदा तवालये तथा हि बालाधिकृतिश्च रक्ष्यते ॥५७॥

जनेषु सर्वेषु च पूर्णतायुषो भवेन्न कस्यापि च दुर्मृतिः सदा ।
निजेन संस्कारचयेन संस्कृतो न कोऽपि नाशाय ह्यलं भवेज्जनः ॥५८॥

सन्न्यासभाजः प्रभवन्तु नैष्ठिकाः संसारमग्नान् प्रदिशन्तु तत्त्वकम् ।
मातर्नवा देशहिताय सर्वथा पूर्णायुषा तावकसेवकाः सदा ॥५९॥

ज्येष्ठानुभूतिसहितप्रणवप्रयोगै-र्देशे विकासलतिका लसतादबाधम् ।
अत्युच्चहैमशिखरायितवित्तसत्ता जागर्त्तु ते जननि ! दीनविदेशदेया ॥६०॥

धर्मार्थकाममोक्षाणां प्राप्तिर्मानवलक्षणम् ।
तदाप्तिः संस्कृतेनैव चान्त्येष्टिनाथितेन च ॥६१॥

धर्माधीनतया मान्यौ चार्थकामौ सुसंस्कृतैः ।
संसारहेतुभूतौ तौ वैपरीत्ये विसङ्गतिः ॥६२॥

स्वतन्त्रे चार्थकामे च पाशवी संसृतिर्भवेत् ।
संस्कृतैरपि नावाप्तिर्लक्ष्यस्येति व्यवस्थितिः ॥६३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कारजातविभवेन हि बुद्धनाथः
राज्यश्रियं परिजहौ परमस्य वित्त्यै ।
हिंसाविकारसमनाय च पञ्चशील–
संस्थापनाय सफलः किल तैर्बभूव ॥६४॥

इति नेपालगौरवमहाकाव्येऽन्त्येष्टिसंस्कारगौरववर्णनं नाम षष्ठः परिमलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सप्तमः परिमलः

बुद्धोपदेशगौरवम्

मातस्त्वदीयपदपङ्कजमस्ति धर्म्यं
तेन प्रभूरि च विभूतिवरैरभावि ।
बुद्धोऽपि दीप इव चोत्तमकुक्षितस्ते
प्रादुर्बभूव कपिलाख्यया प्रसिद्धे ॥१॥

शाक्यीयवंशलतिका प्रबभूव तत्र
शुद्धोदनो जगति जातयशाः शशास ।
तत्पत्निका पतिपरायणताप्रसिद्धा
मायाख्यया मतिमती विदिता च साध्वी ॥२॥

षड्विंशतेश्च शतकात् पुरतो भवायां
योगादिगौरवसमन्वयसंयुतायाम् ।
सर्वर्क्षयुक्तिलसनेन समर्घतायां
बुद्धस्त्वदीयतनयः समभूत्समायाम् ॥३॥

शुद्धोदनाख्यजनकः खलु शाक्यवंश्यो
मायाख्यया च लसिता जननी तदीया ।
वैमात्रभावमभजच्च हि सा प्रजाख्या
सा पालिका समभवन् मृतमातृकस्य ॥४॥

आकाशतो धवलहस्तिवरः सुगौर-
मब्जं दधत् प्रविशतीति निजोदरं यत् ।
राज्ञी निशीथसमये स्ववलोकते स्म
तेनैव गर्भविभवेन सनाथिता सा ॥५॥

दिष्ट्या तु पुष्टसत्त्वाया मनोऽभून्मातृकालये ।
राजानं प्रार्थयामास सत्त्वस्थित्या प्रहर्षितम् ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महाराजस्तु सेनाभिः सखीभिश्च समन्वितां
राज्ञीं सम्प्रेषयामास देवदहसमुद्यताम् ॥७॥

पथि सालकवृक्षाणां वनं लुम्बिनिनामकम्
शुशुभे हरितं सान्द्रं तेन सा हर्षिता भृशम् ॥८॥

यदा रम्यलतां नम्रीकर्त्तुं प्रारभते स्म सा।
वेदना प्रासवी जाता तयैवासावि सूनुकः ॥९॥

ईशाब्दकादथ च विक्रमवत्सराद्वा
त्रिषष्टिकादधिकपञ्चशतात्तु पूर्वम् ।
शौद्धोदनिर्जगति जात इति ब्रुवन्ति
शून्यं जगत्त्विति दिशन् शुशुभे धरायाम् ॥१०॥

सरोहिणी लुम्बिनिका तु भूरियं
नेपालजा बुद्धप्रसूर्मता समैः ।
अशोकभित्त्यङ्कितलेखनादिभिः
प्रपोष्यते सा च पुराविदग्रजैः ॥११॥

यथार्थतत्त्वं ह्यपलापयज्जनाः
पराञ्च सीम्नो धरणिं वदन्ति ताम् ।
अतथ्यकं तथ्यविकासमाध्यमै-
र्द्रुतं निरास्यं सुधिभिः प्रशासनैः ॥१२॥

जनित्वैव तु जातेन चलितं पदसप्तकम् ।
कथितं चापि जीवानां हिताय जातवानहम् ।१३॥

बोधाय जनितश्चाहं स एव रक्षको महान् ।
चरमं जन्म जानीत इदं, पितृगृहान् व्रज ॥१४॥

अयं त्वलौकिको बालश्चक्रवर्त्तित्वलक्षणः ।
अथवा स महाज्ञानी भवितेति तु लिङ्गिनः ॥१५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ब्रह्मज्ञानधुरीणेन असिताख्येन लिङ्गिना ।
समूचे तव पुत्रोऽयं बुद्धश्छेत्स्यति बन्धनम् ॥१६॥

चक्रवर्त्तित्वसंश्रुत्या ब्रह्मज्ञानितयापि च ।
प्रसन्नश्चिन्तितश्चासीद्राजा शुद्धोदनस्तदा ॥१७॥

नामकरणतः पूर्वं माता प्राणान् मुमोच ह ।
राज्ञो जातस्य दौर्भाग्यात् स्वार्जितस्य च कारणात् ॥१८॥

विमात्रा पट्टराज्ञ्या च प्रजावत्या स पालितः ।
स्वात्मजत्वाविशेषेण स्नेहात् स्तन्यप्रयोगतः ॥१९॥

मातुस्तनन्धयस्यापि जीव्यजीविकयो र्बत ।
मरणं वज्रपातोऽस्ति जनसामान्यके गृहे ॥२०॥

किं पुनः पुत्रकाम्यायां लक्ष्मीसाम्राज्यसंयुते ।
मातुर्मृतौ हि पानार्थं रोदनं राजसद्मनि ॥२१॥

जनन्यां साधु स्वस्थायां परीतिर्जातकस्य च ।
असह्यां दुःखदां मन्ये विधे तत्त्वं न वेत्सि त्वम् ? ॥२२॥

जातकस्मृतिमात्रेण मातुर्द्रवति मानसम् ।
तेन स्तन्याश्रुसम्पातौ जनानां हृद्विदारकौ ॥२३॥

केवलं जनिमात्रं हि मदायत्तं ब्रवीषि चेत् ।
अकालमारणे तर्हि यमराजं नियन्त्रय ॥२४॥

प्रारब्धात् सर्वमेतच्चेत् फलान्यं तत्र कल्पय ।
अजन्मत्वञ्च वन्ध्यात्वं ज्यायसी तदपेक्षया ॥२५॥

गौतमात् प्रकृतात्पूर्वमूनत्रिंशत्तमा मताः ।
बुद्धा इतीतिहासज्ञा अयं त्रिंशत्तमो मतः ॥२६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लिङ्गिलक्षणयुक्तत्वात् खिन्नो नामितवान् नृपः ।
सर्वार्थसिद्धयेऽन्वर्थं सिद्धार्थ इति विश्रुतम् ॥२७॥

सिद्धार्थगौतमो बुद्ध इत्येव नाम पूर्णकम् ।
गौतमस्तत्र गोत्रं स्यात् बुद्धेत्यौपाधिकं पदम् ॥२८॥

अयञ्च बालाद् वयसो दयान्वितः प्रपीडनाद्धिंसनतः पराङ्मुखः ।
पितृव्यपुत्रेण च विद्धहंसकः प्रपातितश्चापि च तेन रक्षितः ॥२९॥

पितृव्यजातश्च हि देवदत्तकाभिधानभाङ् क्षत्रियकर्मणि स्थितः ।
दयां प्रदर्श्यैव च विप्रकर्मवान् बुद्धो हि हंसस्य ररक्ष जीवितम् ॥३०॥

शरीरतः शिक्षणतो गुणाहितेर्बभूव योग्यः पुरुषार्थचिन्तने ।
रहःप्रियश्चिन्तनशीलताङ्गतस्तथागतो जागतिकेषु निःस्पृहः ॥३१॥

तदीयवैराग्यमयं समीक्ष्य सः,कुमारिकां कोलियवंशजां वधूम् ।
यशोधरां हेमलतायितां रतिं विवाहयामास नृपोऽनुरूपिणीम् ॥३३॥

ततश्च शुद्धोदनपुण्यतस्तथा कालेन तद्दम्पतिभाग्यतोऽपि च ।
लतासु पुष्पोद्भववद्धि सूनुको बभूव बालेन्दुनिभो यथेप्सितः ॥३३॥

विचारशीलः परमार्थतोन्मुखो विलासितायाः परमो विरोधकः ।
सुपुण्यपुष्पेण च नैव हर्षितश्चकार सोऽन्वर्थकनाम राहुलम् ॥३४॥

भवाटवीं दुःखमयीं विभाव्य च परञ्च तत्त्वं मनसावधारयन् ।
नृपासनं राज्यबलञ्च जातकं प्रमन्यते राहुमयं नवाङ्गनाम् ।३५॥

नवप्रजातस्य शिशोर्मुखोत्पले यशोधरायौवन–राजसम्पदि ।
मनो न रेमे सुगतस्य सौधके यन्नैव शुद्धोदनकाय रोचते ॥३६॥

बलेन केनापि विवाहितं मनः प्रयाति बाह्यं नृपरोधनं स्थिरम् ।
स्थितिद्वयाच्चञ्चलमानसो हि स मनो दधौ नागरदर्शने नवे ॥३७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रथेन गच्छन् सुषमां दिदृक्षुकः प्रणष्टदन्तावलिकुब्जकं नरम् ।
बलेन रूपेण च हीनतां गतं ददर्श बुद्धो मनसो विचालकम् ॥३८॥

वयोऽनुसारेण जरापरिप्लुतौ बलेन रूपेण च नाथितस्य मे ।
प्रणष्टसौन्दर्यगतेश्च सा स्थितिर्धिगीदृशे जन्मनि मे वृथा रतिः ॥३९॥

निवृत्तवान्, अन्यदिनेषु नागरीं छटां प्रपातुं गतवान् स रोगिणम् ।
ददर्श रुग्व्रातबलेन मूर्छितं मृतञ्च मस्तिष्कमनोविदारकम् ॥४०॥

संसारदावानलसम्परीक्षणे भुवं कृषाणोऽपि प्रकृष्टभास्करे ।
अदर्शि तेनैव ततश्च दुःखितो भवाटवीं हेयतमाममन्यत ॥४१॥

दिने परे नव्यसमीक्षणोत्सुको बुद्धस्तु सन्यासिवरं सुतेजसम् ॥
प्रमुक्तिकामं जरयाथ मृत्युना प्रभीतकं चेक्षितवान् मनोरमम् ॥४२॥

रुजान्वितज्येष्ठमृतादिदर्शनात् संसारतो निःस्पृहतां गतस्य च ।
समन्तभद्रस्य मनोऽभवद् दृढमलौकिकान्वेषणतत्प्रचारणे ॥४३॥

शवेन वृद्धातुरकादिदर्शनैः स्मितेन तेजस्वितया च लिङ्गिनः ।
कृतौ च तत्कारणभावतायां प्रादर्शि दोषो व्यभिचारनामकः ॥४४॥

यत्रास्ति संसारतरुर्न सौख्यकं सुखञ्च यत्रास्ति न तत्र संसृतिः ।
कृतौ च हेतौ व्यभिचारतोऽस्मात् तत्याज सौधं ह्यखिलार्त्तिभाजनम् ॥४५॥

ततः शुचेः पूर्णिमयान्विते दिने तथागतः प्रोच्चसुयोजनान्वितः ।
जगाम दार्ढ्यादमृतत्वलब्धये महाभिनिष्क्रान्तिरितीयमुच्यते ॥४६॥

चलाचलाया द्विविधात्मसम्पदोरभीप्सवः सन्ति निजा महीतले ।
परन्तु धर्मस्य परोपकर्मणः कृते न दायादकतां वहन्ति ते ॥४७॥

असारतां संसरणस्य चिन्तयन् निरञ्जनातीरमुपास्य तप्तवान् ।
समाश्च षट् तत्र तपस्यया गतास्तथापि लाभो न तनोस्तु तन्विता ॥४८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ततोऽपि लक्ष्योत्सुकतां वहन्नसौ गयां गतो बोधितरोरधः स्थितः ।
समास्य शास्ता ह्यपराजितासने जुघोष संज्ञानमथात्र लप्स्ये ॥४९॥

तपस्यता तत्र च तेन सेहिरे समन्तराया विविधा अपूर्वकाः ।
सरीसृपैर्मारकतद्दुहितृभिः प्रणुत्तविघ्नान् पिचुवन्निरास सः ॥५०॥

समुत्थितेश्चिन्तनतोऽप्रमादात् संसारपीडा प्रशमायते त्विति ।
अपूर्वमष्टाङ्गमयं प्रवेद्य स प्रसारयामास हिताय जन्मिनाम् ॥५१॥

जना हि हिंसाप्रमुखांश्च यागकान् व्यधुस्तदा गोनरघातकानपि ।
विकारमालापि च कर्मकाण्डता ह्यहिंसनं तेन तदा प्रवर्त्तितम् ॥५२॥

विहिंसनं भेदमयञ्च वर्त्तनं परस्य पीडा परवित्तचोरणम् ।
सुरोपयोगो रतिकर्मसाधनं बभूव प्राक् बुद्धजनेरसीमितम् ॥५३॥

निरासितुं प्रोक्तविकारसंहतिं तथागतोऽजायत भूषयन् भुवम् ।
निजोपदेशैरतिवादसञ्चयाः प्रवाहिता येन सतर्कवाग्बलैः ॥५४॥

जनेहितं कर्म पपार नैव सः सनातनश्चापि प्रचारितो नहि ।
स्वर्गस्य मूलं नहि साध्वपावृतं न मुक्तये लोभयति स्म मानवान् ॥५५॥

अपूर्वकं चेङ्गितवानसौ जनान् परञ्च यत् स्वौषधरूपतां गतम् ।
अहिंसनञ्चोपकृतिञ्चरित्रतां तपश्च त्यागञ्च मनोनियन्त्रणम् ॥५६॥

शान्तिश्च धर्माचरणे विचालता स्वपेक्षणं तर्कणबुद्धिवादयोः ।
अजातशत्रुत्वमथात्मसंयमस्तथागतस्येष्टतमाश्च देशनाः ॥५७॥

अनिग्रहाद् दूषणग्रस्तवर्ष्मणा प्रकल्पिता विग्रहपूजनादिका ।
न श्रेयसे साधु फलाय कल्पते विशुद्धवाक्कर्ममनःसु कल्पते ॥५८॥

स्मृतौ समाधौ वचने च कर्मणि विलोकने चिन्तनजीविकादिषु ।
समञ्चनं, चाष्टविधाऽस्ति पद्धतिर्मुमुक्षुमुक्त्यै प्रभवेन्न चान्यकः ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निजोपदेशान् प्रचिचारिषुर्जिनो रत्नत्रयं कल्पितवान् भविष्यदृक् ।
स्वयंस्वते प्राथमिकन्तु रत्नकं सङ्घोऽस्ति भिक्षामटतां द्वितीयकम् ॥६०॥

तृतीयकं चाद्वयवाक् स्वधर्मता त्रिरत्नकं तत्प्रचचार सौगतम् ।
अतो हि जापानविशालचीनकादयश्च देशास्तदनन्यतां गताः ॥६१॥

जनेषु देशेषु च पञ्चशीलता सहास्तितायामुभयोर्निदानकम् ।
विभाव्य सत्यं ह्यविहिंसनादिकं त्वचोरणं वीर्यसुरक्षणं मतम् ॥६२॥

विदेशनीतिर्नयपालभारते समाधृता तत्र च पञ्चशीलके ।
समर्थराष्ट्रेण च प्रौढवादके निरासिते साधु फलाय तद् भवेत् ॥६३॥

अहिंसनं नाम परानतिक्रमः सत्यञ्च तथ्यादपलायनं ततः ।
चलाचलानां छलतो न हारणं ह्यचोरणं, नाऽऽसवनं विकारतः ॥६४॥

मनोविचालस्य निषेधनं ततः विकारजाते विविधास्त्वनर्थकाः ।
धनादिनाशः समयस्य हापनं विदूरणं नैजजनाच्च दुःखदम् ॥६५॥

सुनिष्ठया वीर्यरजः प्ररक्षणं तदेव नृणां विदिता हि वर्णिता ।
दुःखञ्च तत्कारणतन्निरोधौ सृतिश्च याष्टाङ्गमयी विबोधिता ॥६६॥

नवानि चत्वारि जिनोपवित्तान्यथार्यसत्यात्मतया व्यभासिषुः ।
जनिश्च मृत्युर्वयसश्च हानिर्वियोगरोगोत्थगतिश्च दुःखम् ॥६७॥

तृष्णादितत्कारणपुञ्जतां बुधा द्वितीयकं चार्यकसत्यतां विदुः ।
तृतीयकं दुःखनिरोधसत्यकं तन्नाशको वैषयिको विरागकः ॥६८॥

सृतिश्च ह्यष्टाङ्गमयी तुरीयं तदार्यसत्यं जनमुक्तिदायकम् ।
यथार्थताज्ञानवशेन जन्तवो विमुक्तितां यान्ति न रूढिमाश्रिताः ॥६९।

समन्वयं स्थापयति स्म गौतमः पटाशनप्रीतिजभोजनादिषु ।
यतो हि तच्छिष्यजनेषु भूपतेः कुमारका आढ्यजनाश्च दीक्षिताः ॥७०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पटत्रयं भिक्षुजनैः प्रयुज्यतां ततोऽल्पकं कष्टकरं विभाव्यताम् ।
तत्रापि कामाचरणं ततोऽधिके निषेधनं मारजितस्य बुध्यताम् ॥७१॥

मदीयसम्भ्रान्तकुलीनभिक्षवः समाढ्यसद्मादिषु वस्तुमर्हाः ।
नरेन्द्र–वित्ताढ्यनिमन्त्रणादिषु गन्तुञ्च भोक्तुं ह्यपि ते स्वतन्त्रकाः ॥७२॥

स्वकीयसामर्थ्यसमाप्तितो जिनाः सुभोजनं भक्षयितुं समर्थाः ।
न राजसं भोजनकं निरासितं जनौघवृद्धौ विहितः समन्वयः ॥७३॥

यं सर्वज्ञ इति ब्रुवन्ति कवयो ज्ञेयावसानात्ततः
सुष्ठुज्ञानतया च सैव सुगतो बुद्धश्च तत्त्वज्ञतः ।
मारस्यापि जयेन मारजिदथो लोके जयाल्लोकजि–
दव्याद‌द्वयवादितामपि भजन् नेपालचूडामणिः ॥७४॥
सर्वज्ञस्य समन्वये कृतधियो बुद्धस्य चौदार्यतो
व्यग्रीभूय विरोधने समभवद् यो देवदत्ताभिधः ।
नित्यं बद्धसुमुष्टि–राजसकृतिर्भ्रातापि पितृव्यजः
सङ्घं तत् परिहाय सानुचरकः सङ्घं ह्यघोषीन्नवम् ॥७५॥

इति नेपालगौरवमहाकाव्ये बुद्धोपदेशगौरववर्णनं नाम सप्तमः परिमलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अष्टमः परिमलः

देवदत्तस्य बुद्धविषया विरोधिता

पितृव्यपुत्रो निजशिष्यतां गतः सखाप्यभूद् यो हि च देवदत्तकः ।
समन्वयं साधु जिनोपदिष्टकं व्यरुन्द्ध धाष्टर्यात् कठिनव्रती हि सः ॥१॥

जुघोष दाढर्येन च देवदत्तकः पटस्य चैकस्य वरं प्रधारणम् ।
ततोऽधिकं कामयमानभिक्षुको न भिक्षुकः साधु गृहात्पलायितः ॥२॥

जिनानुयानं रचयद्भिरक्तकैर्मूले तरूणां वसतिर्विधीयताम् ।
ततोऽन्यथा हर्म्यवरे समासनं दृढं हि नैजं ह्युपहासभासकम् ॥३॥

जिनानुगैश्चापि हि देहधारणे सुभिक्षितान्नं नियमेन भुज्यताम् ।
रसेषु खाद्येषु च मिष्टकेषु हि विलुब्धकैर्हर्यमृतता न लभ्यते ॥४॥

न चाढ्यके नापि च राजसद्मसु वणिग्गृहे नैव च भिक्षुभक्षणम् ।
तथाविधाता यदि बौद्धको भवेद् बहिष्कृतः स्याच्च स दैवदत्तकैः ॥५॥

जिनानुगच्छद्भिरनन्यभक्तकैर्न राजसं मांसमयञ्च भोजनम् ।
सदा विधानीयमलं तु तादृशैस्तथाविधाता च बुधोऽपि वञ्चकः ॥६॥

मतञ्च भिन्नं सदृढं प्रदर्श्य स, ह्यलग्नसङ्घं व्यरचद्धि भेदकः ।
जिनस्य शिष्याः शतपञ्चकान्वितास्तमन्वयान् तथ्यविचारकातराः ॥७॥

तदर्थमत्रैव हि देवदत्तकः सुदीक्षितुं दीक्षणसत्रमाह्वत ।
निमन्त्रितस्तेन हि तान् सुदीक्षितुं श्रावस्तिको भूपतिबिम्बसारकः ॥८॥

निमन्त्रणं तद्धि स दैवदत्तिकं प्रगाढनिष्ठः सुगते निषिद्धवान् ।
अदक्षिणश्चागतिशीलको हि सः, चुक्रोध तं पातयितुं जुघोष च ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स बिम्बसारो हृदयेन सौगतो, विवेकनैरुज्यतया शतार्हकम् ।
अनेकवर्षाणि च शासितुं क्षमं विलोक्य कौमारमनश्च विव्यथे ॥१०॥

अजातशत्रुस्त्वरितो नृपासने तं प्रेरयामास स तस्य पातने ।
कुचक्रतो बिम्बनृपं स्वतातकं समित्रकं बन्दिगृहे न्यपातयत् ॥११॥

न मातरं बन्दिगृहे प्रणुत्तवान् यतो हि सायोध्यकराजपुत्रिका ।
केनापि योद्धुं न शकेति या मता, प्रसेनजिन्नामनृपश्च तत्पिता ॥१२॥

प्रतापशाली बलवैभवान्वितस्तदातने योधनकौशलाञ्चितः ।
प्रवञ्चकानुत्पथगामिनश्च हि निरासितुं दण्डधरो बभूव सः ।१३॥

तदीयभीकम्पितमानसो हि स अजातशत्रुर्न बबन्ध मातरम् ।
नृपायनं तस्य ह्यकालकेऽपि सत् समर्थ्यते चेति वदन् स मोचितः ।१४॥

अजातशत्रुः स च देवदत्तकः, उभौ हि विद्रोहमये सलक्ष्यकौ ।
परस्परं प्रेरयतः स्म दुष्कृतौ कुकर्मणे तेन रतश्च दत्तकः ॥१५॥

मतान्तरं नाशयितुं प्रयत्नवान् विचारविश्लेषणतः पराङ्मुखः
समूलमुन्मूलयितुं कुबुद्धितः स गौतमं विघ्नकरं बुबोध च ॥१६॥

अजातशत्रोर्गुरुतां गतो हि सः विदूरयन् कार्य -विवेक -सुस्थितीः ।
कुबुद्धितो बुद्धविनाशनात्मकं संचक्लृपे दुष्टतमाऽभिसन्धिकम् ॥१७॥

स प्रेषयामास च सायुधं जनं विश्वासपात्रं सुगतालयं बत ।
शयान एवाभवदर्कबन्धुकः तदाशृणोदङ्घ्रिकयोश्च चापकम् ॥-१८॥

यदा दिशं लोकयते स्म तत्स्थितां नवञ्च हस्तायुधकं ददर्श सः
धृतायुधं चालयितुं निरुद्यमं स्वस्यातितेजस्वि पिबन्तमाननम् ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ततश्च बुद्धेन स पृच्छ्यते स्म हि त्वं कोऽसि कस्यै कृतये समागतः ।
त्वदीयसम्प्रेषयिता च को भवेत् किं हेतवे वत्स दधासि हेतिकाम्? ।२०॥

ममास्ति सम्प्रेषयिता च दत्तकः त्वहं हि तेन प्रहितो वधाय ते ।
परं मदीयौ नहि सक्रियौ करौ न मानसं चादिशदस्ति ते वधम् ॥२१।

वधस्त्वदीयो नहि मेऽस्त्यभीष्टको ममास्ति तेनैव वधो विनिश्चितः ।
स्थितिद्वयेनात्र च बाधितोऽस्म्यहं किमत्र कुर्यां वद मेऽनुकम्पिन् ॥२२॥

विनिन्दिते देशिकमारणोद्यमे समादिशन्मामयनान्तरेण हि ।
निहत्य चायाहि तदैव रक्षितो भविष्यसीत्येव समादिशच्छलम् ॥२३॥

दुरध्व आसीत् स हि निर्जनोऽपि च सहेतिको मारयिता च दत्तकः ।
समास्य तत्रैव हि प्रेष्यमारणे रहोमयं स्यादिति तत्तथाकरोत् ॥२४॥

जिनश्च दुष्टं ह्यभिसन्धिकं समं बलेन योगस्य विवेद तत्क्षणम् ।
उवाच तं मारयितुं समागतं त्वयाऽऽगतेनैव नियोज्य गम्यताम् ॥२५॥

जिनोपदिष्टं विदधद्धि किङ्करश्छलं तिरस्कृत्य जगाम तत्त्ववित् ।
ततः स आयोध्यकभूपशेखरं प्रसेनजिन्नामकमाप रक्षकम् ॥२६॥

जिनानुयायी स च सेवकाय हि समग्रसौविध्यसमेतरिक्थकम् ।
प्रदाय संरक्षितवान् सहर्षं विधेर्विधानेन न हिंसितावुभौ ॥२७॥

जिनस्य सर्वस्य समन्वयात्मिकामुदारतां ध्वंसयितुं पुरःकृता ।
कुबुद्धिसंयोजितदुष्टयोजना तदीययोगस्य बलादपासिता ॥२८॥

जिनोपदेशैर्भुवनं सनाथितं ततोऽपि पञ्चात्ममयैस्तु शीलकैः ।
विदेशनीतिर्नयपालकादिभिः प्रचाल्यते तेन विभूतिरस्ति सः ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स पौर्णमास्यामजनिष्ट, बोधितामवाप निर्वाणमयीञ्च सद्गतिम् ।
त्रयं हि बोधस्य प्रकाशरूपतां प्रवक्ति बुद्धस्य च तस्य लक्ष्यताम् ॥३०॥

स एशियाया दृढदीपकायितो मदीयमातुश्शिखरायितात्मजः ।
विभूतिषु ज्ञानबलाच्छिखायितो जहौ शरीरं सहसा त्वशीतिके ॥३१॥

जिने सुदीपेऽथ गते स्वधामनि तदीयसत्यान्युपदेशनानि तु ।
सदा भविष्यन्ति च तेषु पुञ्जाः समुज्ज्वलास्तैरथ जीव्यतां समैः ॥३२॥

चरित्र-वित्तीयपवित्रताक्रियाविनाशनैरद्य भृशं प्रपीडितैः ।
जिनोपदिष्टैर्ह्यप्रमादचिन्तनैर्विरोधदूरीकरणैर्विकास्यताम् ॥३३॥

जिनोपदेशा अपि तस्य भक्तका विलुप्तिमाप्ता अधिभारतेऽधुना ।
अतोऽपि तज्जन्मस्थलीं विकास्य च तदीयबोधाः प्रसरन्तु सर्वतः ॥३४॥

दृढास्थया चापि समर्पणान्वितास्तद्भक्तका बोधगयामुपेक्ष्य च ।
जिनस्य जन्मस्थलदर्शने सदा समुत्सुकास्तेन च तद्विकास्यता ॥३५॥

न चापि कौशी नगरी तथाविधा न सारनाथोऽपि तथाविधो मतः ।
यथाविधं जन्मदकं तदादिमं श्रद्धातिरेकात् सुगते प्रमन्यते ॥३६॥

तथागते प्रीतिमथाप्यनन्यतां प्रकाशितुं तज्जनिभूविकासनम् ।
ततश्च तीर्थाटकवर्धनेऽपि तद् विभाव्य सर्वैर्यतनीयमस्ति नु ॥३७॥

सर्वस्य बोधेन तवाभिधानकं समस्ति सर्वज्ञ इदं यथार्थकम् ।
प्रशस्तबुद्ध्यादिभवेन बुद्धकः शिवात्मबुद्ध्या च समन्तभद्रकः ॥३८॥

स्मरस्य जेतेति तवाभिधानकं प्रवर्त्तितं मारजिदीदृशं पुनः ।
मनोविबोधादपरस्य प्राक्तनस्मृतेन षण्णां समभिज्ञकोऽसि भो ॥३९॥

तवाप्यनेकानि भवन्ति विष्णुवन् नामानि कृत्यादिभवानि भिन्नशः ।
स्ववाङ्मये तैश्च सदैव बोध्यसे प्रत्येकवाच्याय हि ते नमो नमः ॥४०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सङ्कीर्णचिन्तनविधिर्न कदापि कार्यो
देवालयादिषु नचेश्वरकः पिधेयः ।
जिज्ञासुभिर्जगति चेश्वरकेऽपि भाव्यं
सम्भावनाकृतगवेषणयार्त्तिनाशः ॥४१॥

शान्तिः सदैव च सुशान्तिकदा भवेऽस्मिन्
क्रान्त्या कदापि नहि शान्तिमयश्च जीवः ।
नास्तीश्वरः समय एष न तस्य बोद्धा
नैवास्ति दृष्टिविषयो मम चेति तथ्यम् ।४२॥

ध्यानेन साधकहिताय हि रागनाशस्तेनैव शान्तिविरहस्य विनष्टिरेव ।
तन्नाशने तदतिरिक्तसुकर्मयोगे गेहश्च्युतिं ह्यविगणय्य जलाञ्चनेव ॥४३॥

अस्तेयता–विरति–जीवचयाविनाशा मिथ्योक्तिताविरह–मद्यपदार्थत्यागौ ।
श्रीगौतमोक्तजनजीवनपालनीयास्ते व्यावहारिकसुशिक्षणशिक्षकाश्च ॥४४॥

एवं प्रशिक्षितजनः परमस्य बोद्धा निर्वाणमेति जगतो न पुनर्भवाय ।
एभिर्विना तु नहि तत्त्वमुपैति जन्तुस्तस्मादसत्यवचनादिविधिर्न कार्यः ॥४५॥

ध्याने शरीरगतये च बलं ह्यपेक्षितं तस्मात्कलेवरबलं तपसा न हेयम् ।
अन्नाम्भसोः करणनिग्रहणाय योग्यश्चास्तु प्रयोग इति
तत्त्वधिकोऽतिवादः ॥४६॥

तृष्णाक्षयोऽस्तु ह्यभिमानगतिर्गतास्तु सज्जागृतिर्भवतु चात्मपदेऽनुरक्तिः ।
संसारबन्धनविषे समके गते च हृत्पुष्करे कृतपदस्य भवेत्स साक्षी ॥४७॥

शून्यञ्च शास्त्रविषयं प्रतिपाद्य शास्ता
चावश्यकादितरसङ्कलनं निनिन्द ।
तत्त्वानुसंहितिविधिर्ह्यनिशं प्रचाल्यश्–
चाष्यङ्गको जनतयापि सदा सुपाल्यः ॥४८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आर्याणि सत्यलसितानि विचार्य धीमान्
ध्यायन् भवेत् परमलक्ष्यमयश्च भिक्षुः ।
प्राणान्नियम्य ह्यपि नासिकया श्वसँश्च
ध्याता सदा भवतु नैकटिकश्च योगी ॥४९॥

ध्यानञ्च यद्यपि तृषं मरणञ्च हन्ति रूपान्तरञ्च विदधाति सदैव तस्य ।
तत्त्वेऽपि हेयपतनस्य हि सम्भवेन ध्याता समाधिमयतां किल तन्नयेत ॥५०॥

ध्यानं सदैव गिरिरोहणदुर्गमायते पातोऽपि सम्भवति तत्र त्रुटेः सुसम्भवात् ।
रूपन्तु तस्य च समाधिमयं हि जातं शैलीयतुङ्गसमभूमिगतिं ह्यवेहि ॥५१॥

दीपो यथा ज्वलति तैलसमूहपानात् निर्वाणतां व्रजति तस्य ह्यशेषभावात् ।
एवं समाधिदहनो गतवासनश्च निर्वाणतां समधिगच्छति योगयुक्तः ॥५२॥

केचिद्वदन्ति मनसो दमनेऽदमे च
दुःखं प्रगर्जति च तेन त्वसारतास्य ।
केचिच्च वित्तविषमाद् भवतीह दुःखं
बुद्धो ब्रवीति जनितो मरणाच्च दुःखम् ॥ ५३॥

भोगे रोगभयं सुखे क्षतिभयं वित्तेऽपि राज्ञो भयं
स्पर्धायां कलिभीस्तपे करणभीर्विद्यास्वनीतेर्भयम् ।
इष्टे शोकभयं यमान्मृतिभयं प्राप्तावप्राप्तेर्भयं
तस्माल्लक्ष्यविधौ दृढास्तु जनता संविन्मयं निर्भयम् ॥ ५४॥

नेपालस्य हि गौरवाय समभूद् बुद्धोऽपि बोधोदये
हिंसारोधनकं विधाय सफलश्श्रीपञ्चशीलान्वये ।
एवं गोरखनाथसिद्धिविहितं चैकत्वसम्पादनं
नित्यं गौरववर्द्धकं समभवन् नेपालमातुः परम् ॥५५ ॥

इति नेपालगौरवमहाकाव्ये बुद्धभ्रातुर्देवदत्तस्य बुद्धविरोधिता नाम अष्टमः परिमलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नवमः परिमलः

गोरखनाथतदुपदेशगौरवम्

वृष्टेर्देवो जनमनसि यः श्वेतरक्तस्वरूप-
इत्यास्थाभिर्भुवि कृतपदश्चास्ति नेपालपूज्यः ।
मेघं रुद्धं रचयति दृढं गोरखे चात्र देशे
मत्स्येन्दोऽभूद्रचितरचनो वर्षणे साधु चेष्टे ॥१॥

मृत्योर्ग्रासीकरणविपदो रक्षणान् मत्स्यराशे-
र्मत्स्येन्द्रोऽभूत् सुकृतिविभवादज्ञवंशेऽपि जातः ।
दीक्षाप्राप्त्या प्रथितयशसि ज्ञानदे नाथमार्गे ।
ख्यातिं यातो जगति विपुलामात्मकृत्याच्च शिष्यात् ॥२॥

योग्यशिशिष्यो भवति हितकृत् ख्यातिलब्ध्यै गुरूणां
शिष्यख्यात्यै गुरुविषयिणी योग्यता सा तथैव ।
तथ्यस्यास्य प्रकटनविधौ गोरखोऽभूद् विनेयो
मत्स्येन्द्रोऽभूत् कुशलगुरुको योगिराजस्तदीयः ॥३॥

गोरक्षाख्यः प्रकृतजनवन् नैव जातो धरायां
नायं गर्भे वसति जननीपीडनं येन वै स्यात् ।
इष्टेर्भूतिर्ह्यवितथबला गोमयानान्तुराशौ
क्षिप्ता सोऽभूत् सकलगुणवान् द्वादशैरेव वर्षैः ॥४॥

काचिन्नारी द्विजवरगृहेऽजातवत्सा बभूव
खिन्ना भिक्षाटनकृतिविधौ मत्स्यनाथेन दृष्टा ।
म्लाना योषा कृशतरवपुश्चाधिग्रस्तापि दीना
क्रोडं रिक्तं वदति सहसा तं यतिं श्रोतुकामम् ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुत्रप्राप्तिं युतिबलकृतां भष्मना चेक्षमाणस्-
तस्यै चेन्द्रो वितरति गवां तच्च दुग्धैः प्रपातुम् ।
मूढाऽवत्सा प्रकृतविषयेऽजातविश्वासिका सा
चिक्षेपासौ निकटरचिते गोमयानां निकाये ॥६॥

योगर्षीणां ह्यविकलवचस्त्वेन गोविट्समूहे
पुत्रो भूत्वा समुचितरुचिः साधु चाविर्बभूव ।
मत्स्येन्द्रं तं निजजनिकरं तत्र बुद्ध्वा स बालो
रक्ते वस्त्रे विकलगतिमान् प्राव्रजत् तेन साकम् ॥७॥

शिक्षां दीक्षां गुरुवरकृतां नामतो गोरखो ऽसौ
लब्ध्वा तप्त्वा युतिबलकृतां सिद्धताञ्चाकलय्य ।
लोके सिद्ध्या बहुविधकृतिं साधु सम्पाद्य चित्रां
मृत्युं जित्वा नरनृपकृतौ योगदानं व्यधत्त ॥८॥

तेजस्विनं प्रकृतितो गिरिशायितञ्च
गोरक्षकं हठितयोगविशेषदक्षम् ।
सिद्धं परं प्रणतपालनदत्तचित्तं
नेपालतन्नृपगुरुं प्रणमामि नित्यम् ॥९॥

श्रीद्रव्यसाहनृपतो नयपालपूज्य-
मेकीकृतावथ तदीयसमाढ्यतायाम् ।
सायासकं हितकृतौ च सदा प्रमग्नं
योगर्षिसाधकवरं ह्यपि सद्विभूतिम् ॥१०॥

श्रीश्रावणे मधुमये च विशेषतश्च
श्रद्धालुभिर्विविधरोटसमर्पणार्चा ।
भिक्षार्थिभिश्च निजभिक्षणवाचि नित्यं
गोरक्षनाथ इतिमात्रमुदीर्यतेऽत्र ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कण्ठावलम्बितुलसीस्रगलङ्कृतास्यं
रक्तेन वस्त्रयुगलेन च शोभमानम् ।
हस्तस्थितेन च कमण्डलुना सनाथं
शूलत्रयं शमयितुं निदधत्त्रिशूलम् ॥१२॥

लोकोपतापयुगलं प्रतिकर्त्तुकामं
नाथीयसिद्धनिवहोपकृतौ प्रवीणम् ।
मत्स्येन्द्रतः समधिगम्य हिताय तत्त्वं
विस्तारकं हृदि धरामि गुरुं कृपालुम् ॥१३॥

पात्रप्रयोजनरुचीः प्रसमीक्ष्य योगान्
तीव्रातितीव्रमृदुमध्यमयान् दिदेश ।
यैश्चातुरा हि जनता हठ–मन्त्र–लीति–
राजाभिधानयुतितो हि गतव्यथाऽभूत् ॥ १४॥

भस्माङ्गता जटिलता करकुण्डिता च
कर्णे च कुण्डंलयुतिर्वसने सुरागः ।
पद्मासनं त्रितयपुण्ड्रन–योगयुक्ति–
र्मुद्राभया च शिवगोरखतां व्यनक्ति ॥१५॥

गोरक्षनाथहठयोगिवरश्चिराय
सञ्जीवतीति बहुशास्त्रगिरो लसन्ति ।
तेनैव तस्य कृतकादिषु सम्भवत्वं
तत्त्वे भवन्ति विविधानि तु कारणानि ॥१६॥

पाञ्चालके समुदितः सुयुगे तु सत्ये
गोरक्षके पुरवरे च युगे द्वितीये ।
पश्चात्तने प्रथितगुर्जरजूनदुर्गे
तुर्ये तु कूटशिखरे स हि गोरखीये ॥१७॥

गोरक्षराजनिवहैरतिमानदानात्
तेनापि योगबलतो युधि योगदानात् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राज्याप्तमन्दिरसमर्चनसैन्यमानस्-
तुर्ये कलावववततार हि गोरखायाम् ॥१८॥

तीर्थत्रयं समभवद्धि तदा विशेषान्-
नैपालकं किल बभूव हि नाथयुक्तम् ।
श्रीमुक्तिनाथ-गुरुगोरखनाथयुक्तं
प्राणांशदः प्रथितनाथयुतं तृतीयम् ॥१९॥

श्रीगोरखाजनपदश्च हि देशमूलो
मुख्यालयेऽत्र नृपका न्यवसन् तदीये ।
कैलासकूटभवनस्य समीपतश्च
रम्ये च गह्वरवरे तपति स्म नाथः ॥२०॥

तेषां दिदृक्षुजनता बहुशः समायन्
तीर्थेषु तेषु युति-मुक्ति-चिदर्थनायै ।
श्रीनन्दमिश्रबुधकःकिल काशिकश्च
योगाप्तये शिवगुरुञ्च ददर्श मित्रैः ॥२१॥

श्रीनीलकण्ठसमधिष्ठितदेवखातं
गोसाइकुण्ड इति भारतकेऽपि वित्तम् ।
तीर्थञ्च गोरखगुहां पशुपञ्च नाथं
द्रष्टुं ह्यवस्थिवरकोऽपि समाययौ च ॥२२॥

सिद्धोऽप्यसौ निजसुसंस्कृतिधर्मवेत्ता
वाराणसीमधिवसन् नयपालवेत्ता ।
आशीर्वचांस्यथ च खड्गवरञ्च राज्ञे
पृथ्वीतिनामलसिताय ददौ विशिष्टम् ॥२३॥

तद्धेतिना निजविरोधिजनाः हताश्च
सीमासुरक्षणदलञ्च हतं तदीयम् ।
नारायणो नृपवरः कृतकृत्यकश्च
देशैकतोन्मुखकृतिं विदधच्चकासे ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिद्धस्य गोरखगुरोश्चरमे युगेऽत्र
प्राकट्यतो जनजगद्धितसंविधानात् ।
तज्जुष्टतीर्थमयता खलु गोरखायास्-
तेनैव श्रद्धितजना अधुनापि यान्ति ॥२५॥

कालान्तरे च हितकामनयापि देवी
श्रीरामसाहनृपतिं न्यवदच्च सुप्तौ ।
मिश्रञ्च दीक्षणविधौ गुरुतां वहन्तं
मन्त्रार्थसिद्धिसहितं सुगुरुं विधत्स्व ॥२६॥

मिश्रोऽपि देविकृतसूचनतः प्रसन्नः
श्रीरामसाहनृपतिं बहुमन्यमानः ।
दीक्षां प्रदाय विजयाय वचांसि दत्त्वा
वृत्तिं समाप्य नृपतोऽत्र समास धीरः ॥२७॥

रामाभिषेकसमये गुरुगोरखश्च
प्राकारितस्त्रिकयुगे तपनेन नाऽऽयात् ।
आशीर्वचांसि विविधार्थमयानि तेन
सम्प्रेषितानि च हृदा शुभशंसनानि ॥२८॥

यातेऽथ द्वापरयुगे तु स जूनदुर्गे
नैवाभवत्तपसि,योगविधीन् विचिन्वन् ।
श्रीशौरिरुक्मिणिविवाहमहोत्सवाय
चामन्त्रितः समुपगत्य शुभं शशंस ॥२९॥

गोरक्षपीठवैशिष्ठ्यम्-

गोरक्षनामनगरे किल तत्समाधौ
भव्यं गुरोः स्मरणपूजनहेतु पीठम् ।
त्रेतायुगे समभवद्धि समस्तवास्तु
चाक्रान्तृभिस्तु यवनैर्वत नाशितं तत् ॥३०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एकोनविंशतितमे किल ऐशवीये
भव्यं बभूव भवनं भुवि तद्भवायाम् ।
संस्कारधर्मनिजसंस्कृतियोगमार्ग-
मूलोद्भवं जनतया नतया प्रगीतम् ॥३१॥

कैलासकूटभवने खलु घर्मकाले
शीते तताप किल गोरखपीठधाम्नि ।
श्रीदेविपत्तनभुवि प्रथितेऽपि दाङे
कालान्तरे च स तताप इतीतिहासः ॥ ३२॥

गोरक्षनाथशुभविग्रहशोभनानि
मूर्त्यन्तराणि च लसन्ति मुदां प्रदानि ।
भीमस्य भारजनितेन च गर्त्तकेन
निष्पादितेन सरसात्र विवर्धितानि ॥३३॥

धर्मेण विग्रहवरेण समात्तराज्यैः
श्रीपाण्डवैः सवनकर्म समारुरोहे ।
तत्रैव गोरखगुरुं ह्यनुरोद्धुमागतः
प्रत्यैक्षतात्र युतिनिष्ठमुनिं हि भीमः ॥३४॥

गोसेवनं हवनकर्म सदाव्रतानि
स्तोत्रादिपाठभजनानि च नित्यपूजा ।
विद्याश्चतुर्दश च पाठयितुं प्रयासो
गोरक्षपीठसुकृतानि सदाभवानि ॥३५॥

शिक्षानिवाससुचिकित्सनवस्त्रदानं
संस्कारतायुतिविशेषसुशिक्षणञ्च ।
जात्यादिवर्गनिरपेक्षतयापि सेवा
विश्वे चिरादुपहसन्ति च साम्यवादम् ॥३६॥

पीठस्य चादिमगुरुर्वरदाख्यनाथो
गोरक्षनाथ इव शास्त्रविधासु दक्षः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्यैव वृत्तहठयोगविधौ विनेयः
पीठोन्नतौ रचनया कृतसूत्रपातः ॥३७॥

पीठस्य चाधुनिकयोगविदस्तु मुख्याः
श्रीब्रह्मनाथ इति दिग्विजयोऽपि नाथः ।
योगात्मदर्शनचणश्च, अवेद्यनाथो
धर्मेण संस्कृतितपश्चरणैश्च वित्ताः ॥३८॥

पीठोन्नतौ जनहिताय युतेर्हिताय
पीठप्रकर्षविविधाङ्गविकासनाय ।
आदित्यनाथ इति योगिवरा महान्तो
वैराग्यमूर्त्तय इहाभिनवं चरन्ति ॥३९॥

पीठोन्नतावपि च राजनये विकासो-
ऽत्यावश्यको भवति तथ्यमिदं विचार्य ।
श्रीभाजपादलमयं वृतवान् मनस्वी
सन्तोषयन् जनमनांसि जिगाय नित्यम् ॥४०॥

पीठप्रभावितभुवीह विजित्य षट्कं
सर्वोच्चसंसदि बभूव युवा सदस्यः ।
तस्यानुकूलकृतितो मुदिता त्रिवारं
ते मुख्यमन्त्रिपदके तमचैषुराप्तम् ॥४१॥

उ.प्रोऽस्ति देशविषये ह्यपरप्रदेशात्
स्थूलायितो जनतयाप्यथ क्षेत्रतश्च ।
तं चोत्तमं सपदि चोत्तरनामकं तं
मुख्यो हि योगिशिखरो विदधीत शीघ्रम् ।४२॥

तस्मिन् समुत्तमवरेऽखिलभौतिकाङ्गै-
र्वृत्तार्थतोऽपि शिखराणि च चुम्बमाने ।
तल्लग्नको विविधभौमिकवस्तुयुक्तो
नेपालकोऽप्यतिजवेन समुन्नतः स्यात् ॥४३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नायं क्रमो विकसनस्य, विपर्ययोऽपि
नेपाल–भौतिक–चरित्रविकासकृत्यैः ।
तल्लग्नदेशसहिता अपि तत्प्रदेशा
मूलानि चोन्नतिविधेः सहसाऽऽप्नुवन्ति ॥४४॥

वीरुज्जलाटनविधेर्विपुलाद् विकासान्
नेपाललग्नसकलापरदेशवृद्धिः ।
स्यादेव चोत्सजगतः प्रविकासवारि
यात्येव निम्नभुवि चेति यथार्थतास्ति ॥४५॥

एवञ्च लोकपरलोकविकासदृष्टि-
रावश्यकी भवति देशविकासनेऽपि ।
श्रेयोऽस्ति रागसहितं जनताभिलाष्यं
सर्वाङ्गकं भवति तेन विकासलक्ष्यम् ॥४६॥

गोरखनाथयोगबलानि–
सिद्ध्या च योगबलतो नियमान्निरस्य
गोरक्षकः समभवद् ह्यतिकालिकश्च ।
सर्वातिवादपरिहारधिया बलिष्ठः
काल्या युयोध जगतः स्थितिरक्षणाय ॥४७॥

युद्धे च तां युतिबलेन विजित्य कालीं
निर्बन्धनं सपदि तेन तया व्यधायि ।
मातस्त्वया परमितो नृबलिर्न लेयो–
वित्तोपहारमवधार्य न भेदयेथाः ॥४८॥

सिद्धेश्च योगबलिनामपि साधकानां
वित्तैषणादिपरिहारवतां मुनीनाम् ।
नैवाप्यनादरतिरस्करणे विनिन्द्ये
एषा स्थितिश्चलतु भव्यभवाय नित्यम् ॥४९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गोरक्षकं विविधयोगबलेन पुष्टं
जेतुं प्रहारशतकं प्रविधाय काली ।
नैनं जिगाय, इति सा नरभक्षिकापि
भूत्वा विवेश हृदयं व्यशितुं हि तस्य ॥५०॥

तत्रापि सा समभवन्न लयाय तस्य
हृद्पावकेन तु परं परिदह्यते स्म ।
एवं हि दाहविकला परिक्रन्दमाना
स्वाहङ्कृतिं परिजहौ प्रशशंस योगम् ॥५१॥

नाहं ह्यतः कमपि योगिवरं विनिन्दे
नैजं च दर्पनिवहं परिहाय योग-
शक्तिं श्रयामि नहि सिद्धिबलं भनज्मि
प्रत्यायितेन गुरुणेति च तत्यजे सा ॥५२॥

एकोऽभवद् भुवि च भैरवनाथनामा
नागप्रियःसकलतान्त्रिकशौण्डिकश्च ।
वस्त्रैर्निजाभरणकेशकलापकैश्च
सन्त्रासकः सकलसज्जनहृद्प्रकम्पः ॥५३॥

मांसप्रियो मदिरया च सुमत्तचेष्टः
कृष्णाम्बरोऽसितसमुष्णिकया सनाथः ।
कृष्णक्रियो ऽसितकमण्डलुना द्वितीयो
रूपेण चोग्रतिमिरायित उग्रघोषः ॥५६।

भक्तायितो जगति कालिकया विशिष्य
प्राप्ताशिषं स्वभिनयन्नपि श्लाघमानः ।
सर्पप्रियो विविधनष्टगृहावशेषा-
दन्विष्य नागनिवहान् वशिनश्चकार ।५५॥

तान्नर्त्तयन् जनतया नतयापि दत्तं
द्रव्यं चकार पृथुलं व्ययने समर्थम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रीत्वा च तामसगुणोन्नयनाय योग्यं
प्रायुङ्क्त मत्तमनसा प्रविहाय सत्त्वम् ॥५६॥

तद्वेणुतो मधुमये जनिते निनादे
नागाः सरीसृपवरा अभवँश्च पुञ्जाः ।
तेभ्यो मणीन् समधिगन्तुमथोत्सुकोऽसौ
वेणोः स्वरान् बहुविधान् कुरुते स्म लिप्सुः ॥५७॥

तद्वाद्यकोदितनिनादसुधां प्रपीय
नागैः सुरम्यमणिभिः तमुपाश्रयद्भिः ।
पुच्छानि सुन्दरफणाश्च विचाल्यमानैः
नृत्यानि साधु परितस्तमुपाह्वियन्त ॥५८॥

नागाधिराजसुबृहन्मणिकं तु नागं
तत्रैककं मणिविसर्जनवर्जकाग्र्यम् ।
वश्यं चकार बत लुब्धकतान्त्रिकोऽसौ
तद्भार्यया बहुनुतोऽपि न तं व्यमुञ्चत् ॥ ५९॥

तत्राप्यसौ मणिमयो मणिपत्निकावान्
तं तान्त्रिकं ह्युपजगाम विधूतभीकः।
स्तौति स्म तञ्च बहुशो विनयेन गृध्नुः
पत्या च नागमणिपत्निकया निषिद्धः ॥६०॥

यत्ने कृतेऽपि नहि शेकतुरत्र रोद्धुं
तस्मादियाय मणिका गुरुगोरखाख्यम् ।
कन्यामयेन वपुषा विनयेन चोक्तं-
सम्पीडितास्मि भगवन् भव रक्षकस्त्वम् ॥६१॥

भक्तिप्रपत्तियुगलात्ततृपे स योगी
चाशीर्वचांसि मुदितः प्रददौ हि तस्यै ।
तत्सेवनावधित एव जनानुमोदः
प्राप्तश्च सर्पविषचोषणतः प्रयुक्तः ॥६२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रच्छन्नया बहुविधा मरणाद्विमुक्ता
ग्राम्याः सरीसृपसुदष्टजनास्तदीयैः ।
तं तान्त्रिकं सपदि भीषयितुं प्रवृत्तैः
संरक्षिता शिवगुरोः परिचर्यया च ॥६३॥

तत्रापि तान्त्रिकवरो मृगयन्नियाय
सम्प्राप्तवाँश्च बत नागमणिञ्च गुप्ताम् ।
ताञ्चाग्रहात् पुनरयाचत तान्त्रिकोऽसौ
श्रीगोरखो गुरुरशिक्षत तन्तु चैवम् ॥६४॥

याच्ञां विना विहितदानमथास्ति क्षीरं
दत्तं तु याचितमथो जलतां गतं तत् ।
आच्छिद्य यच्च हठतो विहितञ्च नैजं
तद्रक्तकेन समतां भजते हि निन्द्यम् ॥६५॥

तस्माद्धठेन मणिकं नहि कामयेथा
अस्त्येव रक्तसदृशं त्वधिपान्निषिद्धम् ।
वैराय साधु घटते च हि तुच्छकं तत्
तेनान्यलक्ष्यितजनेन त्वयात्र भाव्यम् ॥६६॥

दाने दाता ग्रहीताथ श्रद्धा चेत्यङ्गतामिताः ।
देयञ्च धर्मसंयुक्तमुचितौ देशकालकौ ॥६७॥

एभिर्विना च दानस्य नैव शास्त्रानुमोदनम् ।
तद्विना यत्तुदानं स्यात् तत्तु आदानमात्रकम् ।६८॥

तैर्विना यत्तु दीयेत गृह्णीयाच्चापि कश्चन ।
न तौ फलेन संयुक्तौ स्यातामिति विनिश्चयः ॥६९॥

नास्ति श्रद्धा च दातुर्वै ग्रहीतुः पात्रतापि च ।
देशकालौ न चैव स्तः कथं दानस्य सम्भवः? ॥७०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्मात्तान्त्रिक भद्रन्ते प्रतियाहि निजालयम् ।
त्यज नागमणेर्लिप्सां षड्भिरङ्गैर्नियन्त्रिताम् ॥७१॥

श्रीभैरवोक्ति–विषचोषणतो हि तस्या
नागात्मता सपदि सर्वजनैरबोधि ।
स्निग्धामभीतिवरतो किल नाथयित्वा
श्रीगोरखो गुरुरथो विससर्ज नागीम् ॥७२॥

तत्रापि तान्त्रिकहतो न जहौ मणीप्सां
साकञ्च नागयुगलेन मृधं चकार ।
सर्वाञ्च तन्त्रधिषणामपि सम्प्रयुज्य
साफल्यमाप न च नागमणेस्तु लब्धौ ॥७३॥

श्रीगोरखापचितितस्तरसा च युक्ता
युद्धं चकार तुमुलं हततान्त्रिकेण ।
सर्वाश्च तान्त्रिककृतीर्वितथं विधाय
सा तं जिगाय विजितस्त्रपयोपतस्थौ ॥७४॥

भो नागपत्नि ! तव शक्ति–मती अजेये
तत्रापि गोरखगुरोः प्रबला शुभाशीः ।
तन्त्रान्धता मयि रुरोह तयासि पीड्या
त्वां नौमि गोरखगुरुं ह्यथ योगशक्तिम् ॥७५॥

नैजं पराजयविधिं मनसा विचिन्त्य
गोरक्षनाथयुतिशक्तिचयं विभाव्य ।
सिद्धिं समर्थ्य च तदाचरणेऽपि लीनो
योगेन चार्त्तजनतां ह्यनिशं व्यसेवीत् ॥ ७६॥

इति नेपालगौरवमहाकाव्ये गोरखनाथतदुपदेशनामा नवमः परिमलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दशमः परिमलः

गुरुगोरक्षनाथादिन्द्रस्य पराजयः

श्रीगोरखो विविधयोगविधासु दक्षो
दक्षोऽभवद् भगवतो भजताञ्च तृप्त्यै ।
सङ्कल्पितं समशनञ्च हि तेन भक्त्या
देवर्षिसाधुगतवित्तसमर्हणाञ्च ॥१॥

आराधनास्थलमनेन विनिश्चितञ्च
गर्भगृहेति विदितं त्वधिगोधरस्थम् ।
गोपर्वतेऽपि बहुशः प्रवदन्ति भोजं
नैपालकेऽहितनयश्च ततापं यत्र ॥२॥

इच्छानुरूपभुजितोऽथ च दक्षिणातो
वस्त्रेण भोजनवरैरपि तोषयित्वा ।
देवर्षिसाधुसुजनाभ्युपपत्तिसिद्धा-
वादेशतो निजगुरोर्यजनं समैच्छत् ॥३॥

सग्धेः प्रबन्धनविधौ तपने समुत्सुकः
स्वं शिष्यकं प्रणिजगाद च चित्रसेनम् ।
भण्डारणे जनमनोरमणे च दक्षस्-
तं स्वीचकार हृदयेन समाश्वसच्च ॥४॥

गन्धर्वराज इह भोजननर्त्तनादौ
वासक्रियासु कुशलश्च हि शक्रशिक्षः ।
देवर्षिसाधुगतवित्तसमैस्तु रुच्य-
इष्टश्च नाथगुरुणा विनयी नियुक्तः ॥५॥

सर्वञ्च भोजनसमुद्यमकार्यभारं
तस्मिन्निवेश्य निजकिङ्करचित्रसेने ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आश्वस्तवान् निजकृतौ मनसा च तुष्यन्
योगस्य साधु गतये प्रययौ तपोऽर्थम् ॥६॥

प्राणान्निरोध्य च सुकुण्डलिकां प्रसाध्य
श्रीगोरखोऽरमत निष्कलब्रह्मरन्ध्रे ।
तद्भीकरं ह्यसुरदेवविचालकञ्च
श्रीनारदेन मुनिना त्रिदिवं समापि ॥७॥

एकत्र योगबलतः प्रसृता च कीर्त्ति-
रन्यत्र सज्जनकृतेऽशनयागशक्तिः ।
ताभ्यां सनाथ इति वासव ईर्ष्यमाणस्-
तद्भञ्जनाय वरुणानलकौ न्ययुङ्क्त ॥८॥

प्रीत्यर्थभोजनभुवश्चयनक्रियायां
मां चित्रसेनहतकः समुपेक्षतेऽतो ।
नैवास्तु सज्जनसपर्यया सनाथः
कार्यक्रमो भवतु तेन विनाशनीयः ॥९॥
श्रीगोरखो गुरुरतीव परोपकर्ता
सर्वस्य स्वास्थ्यसुखशान्तिधनाभिलाषः ।
स्वर्गेऽथवा किल पुनर्भवनेऽप्यलिप्सुः
किं पाकशासनपदस्य भवेत् स इच्छुः ? ॥१०॥

भोगप्रियाः सुरगणा मघवा ततोऽग्र्यः
मैरेयमैथुनरसान् प्रचुरान् रसन्तः ।
तल्लोपनं प्रतिदिनं परिशङ्कमाना
योगाशिषोर्बलमपास्यतमं विदुस्ते ॥११॥

नाकेन भोगभुवनेन हि भोगिनस्ते
भोगश्च मोक्षणविधिं विनिहन्ति नित्यम् ।
तस्मादनर्थकर आत्मविदां विचारात्
तत्रापि बिभ्यति सुरा मघवा विशेषात् ॥१२॥
स्वर्वेश्यया मदिरयापि सुसज्जमानो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नृत्यञ्च वाद्यसहितं ह्यतिरोचमानः ।
श्रीनारदोक्तिविषयेण च कोपयुक्त
इन्द्रासनापहरणं बत ! शङ्कते स्म ॥१३॥

इन्द्रः सदा ऋतुशतं ह्युपगम्यमानाद्
राजाधिराजमखतो युतिसाधकाच्च ।
आशङ्कते सपदि विघ्नततिं प्रयुङ्क्ते
चात्रास्ति योगबलतः परिशङ्कनञ्च ॥१४॥

श्रीनारदेन कथितो मघवाच्छलेन
प्रीत्याख्यभोजनसुयागभवाशिषा च ।
योगाप्तशक्तिविनियोजनतोऽपि तस्मै
श्रीगोरखाय पदवी तव रोचयेत ॥१५॥

नित्यं च भोगबहुलोऽप्सरसां प्रयोक्ता
तद्भावभङ्गिषु सदैव च लीयमानः ।
प्रीत्यर्थभोजनसुजातहितेष्टिनष्ट्यै
संयोजकं बत निरासयितुं समैच्छत् ॥१६॥

एकेन ह्येतिविभवेन हि लक्ष्ययुग्मं
संसाधितं हरिहयेन पदीयगुप्त्यै ।
संयोजनस्य विरहेण कुतस्तु सग्धिः ।
तद्विघ्नितस्य च गुरोस्तपनं कुतः स्यात्? ॥ १७॥

दूतौ स्वकौ मघवतोऽथ नियुक्तिभाजौ
गन्धर्वराजविफलाय समुत्थहस्तौ ।
पातालकं त्वहरतां किल चित्रसेनं
तद्रक्षकावभवतां च यथोपदिष्टम् ॥१८॥

श्रीचित्रसेनहरणस्य च नारदोक्तं
श्रुत्वा च गोरखगुरुर्विमना बभूव ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वृत्तान्तकार्यविदसौ सहसाप्यधस्तः
कुर्वन् मुखं युतिबलात् बलिसद्म चार्च्छत् ॥१९॥

तं वेगिनं परमभास्वरकान्तरूपं
श्रीगोरखं निजसमीपत आव्रजन्तम् ।
दृष्ट्वैव तौ सपदि चित्ररथापहारौ
स्वं बिम्बकं प्रतिनिधाय पलायितौ स्वः ॥२०॥

सम्प्राप्य चेन्द्रनिलयं त्वनलाप्पती तौ
कम्पेन सम्पुटितहस्ततयाप्यब्रूताम् ।
नाथीययोगबलधर्षितभग्नकार्या–
वावां प्ररक्षतु विभो ! यतिकोपभाजौ ॥२१॥

तौ भर्त्सितौ मघवता नु युवामसत्त्वौ ?
किं मृण्मयौ भवथ आशु गतं नु शौर्यम्?
तस्याऽऽगतिं बत विलोक्य पराङ्मुखौ वां
धिग् धिङ् ममाहितकरौ समरात् प्रभग्नौ ॥२२॥

अत्रान्तरे गुरुवरो निजयोगशक्त्या
स्वं प्रेष्यकं त्वतिविनीतकचित्रसेनम् ।
आनीय मर्त्त्यभुवनं प्रकृते प्रवर्त्तयन्
स्वं योगदानविषयञ्च तपश्चिचिन्त ॥२३॥

अत्रान्तरे गतमतिर्गततथ्यबोधः
स्वाहङ्कृतौ प्रचुरकं स्ववगाहमानः।
युद्धाच्च पूर्वकरणीयमपास्य दूर–
मिन्द्रोऽन्तिमां हितविरोधकृतिं बभाज ॥२४॥

कूटाञ्च नीतिशिखरां व्यपहाय पूर्वां
वस्तुस्थितेरपि यथार्थतया त्वविद्वान् ।
युद्धे धनं प्रतिभया सहितान् जनाँश्च
हन्त्येव सोऽपि परतः परिभूयतेऽथ ॥२५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

युद्धात् पलायितचरौ वरुणाग्निकौ सः
संवीक्ष्य देवगणकान् समुपेक्ष्य शक्रः ।
युद्धाय रुष्टमनसा करिणा द्वितीयो
वव्राज गोरखगुरुं बत तद्बलाज्ञः ॥२६॥

तद्गर्जनं युतिबलः सहसा निशम्य
स्वस्मिँश्च योगविभवे प्रहतिं विबोध्य।
वस्त्रद्वयेन तपसा च सनाथमानः
सव्याद्धि हस्ततलतो न्यरुणत् प्रहारान् ॥२७॥

यावत्प्रहारनिकरं करतः सुपुञ्जा
तेजस्ततिःशिवगुरोः क्रमशो ननाश ।
आक्रान्तिमेव शतमन्युकृतामरौत्सीत्
प्रत्याक्रमन्ति नहि योगबलास्तु शत्रून् ॥२८॥

ऐरावतं कृतसमासन इन्द्रियार्थी
बाणान् त्रिशूलसृगकास्त्रचयं हि वज्री ।
पर्यायतःशिवगुरोश्शमनाय तीक्ष्णान्
हेमाद्रितःकरिनिनादसमं ववर्ष ॥२९॥

ऐरावतीयनिनदेन च योगिवेगाद्
हुङ्कारतः सुरपतेर्नभसःप्रगर्जात् ।
पृथ्व्याः प्रकम्पजननाच्छरघर्षणाच्च
तत्राभवद्धि जनता नितरां प्रपीड्या ॥३०॥

सव्यात्करात् प्रसृतवैद्युतपुञ्जहेत्या
क्षेप्यास्त्र–बाणविभवं सहजं विनाश्य
शक्रं तदुत्तरयुधः कृतिता न वा स्यान्
नाथोऽत्र चिन्तनविधौ विवशं चकार ॥३१॥

सञ्चिन्त्य भोगचतुरोऽचतुरश्च योग–
शक्तावहङ्कृतिदवानलदग्धशक्रः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वज्रेण तद्युतिबले विजयं विभाव्य
चोत्थाप्य तच्छिवगुरावसितुं समैच्छत् ॥३२॥

श्रीगोरखः सपदि योगबलं प्रयुज्य
चोद्भाव्य तैजसलतामभिनन् महास्त्रम् ॥
मध्ये प्रभिन्नकुलिशं न्यपतच्च भूम्यां
शक्रो विवर्णवदनोऽप्यभवद् हृयधीरः ॥३३॥

शक्रस्थितिं शिवगुरोश्च परं प्रकोपं
दृष्ट्वा च मत्स्यगुरवः सहसाविरासन् ।
शान्तं विधाय निजशिष्यवरं हि नाथं
शक्रं जगाद नहि नाथवरोऽहिताय ॥३४॥

योगस्य योगिशिखरस्य च पोषणार्थं
लोकोपकारकतयास्य विवर्धनार्थम् ।
योगप्रमर्दचतुराय च शिक्षणार्थ-
माविर्भवन्ति मुनयः समये हितार्थम् ॥३५॥

सिद्धाश्च योगबलिनो न कदापि नाक-
मिच्छन्ति नैव च शचीपतितां तु शङ्क्याम् ।
अन्यच्च गायनसुनर्त्तनरागरक्तः
कालान् निरर्थमतिवाहयसेऽबुधस्त्वम् ॥३६॥

संज्ञान-वास्तवविलोपनतो ऽसि रुष्टो
नाथस्त्वदाक्रमणमात्रमिहास्ति रोद्धा ।
जम्भाख्यराक्षसवरस्य च ते हतस्य
दम्भोलिलग्नपरिमुक्तिरपीह हेतुः ॥३७॥

त्वं मेघवाहन ! दिवस्पतिरेव चाद्य
त्वद्भूमिरेव विनियोगविधौ तु चर्च्या ।
इच्छानुरूपभुजिकार्यविधिस्तु भूम्यां
सम्प्रार्थ्यसे नहि तदर्थमवेहि तत्त्वम् ॥३८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्मान्निरायुध इहासि सुनम्य नाथं
त्वं गच्छ, योगिवर आरभतां सुभोजम् ।
नैवाहितं क्वचन योगबलं विधत्ते
नेच्छन्ति योगिशिखरा:स्व:,परं विमुक्तिम् ॥३९।

नानान्तरायनिवहान् प्रशमय्य योगी
प्रीत्यर्थभोजमहनं कृतवान द्रढीयान् ।
इच्छानुरूपभुजितो वसनैः सुवित्ताद्
देवर्षिसाधुगतवित्तजनाःप्रसेदुः ॥४०॥

देवर्षिपूजनमिवेह जनैर्जनानां
सम्पूजनं सविधि सत्करणं समाजे ।
सा संस्कृतिस्तव च नैव विलोपनीया
तत्सिद्धये भवति योगिकृतोद्यमश्च ॥४१॥

योगोऽस्ति मानवहितस्तनितास्ति नाथः
स्वास्थ्याय दोषशमनाय च शास्त्रसिद्धः ।
प्रोत्साहकोऽस्ति नयपालनरेशकानां
देशैकतासु, स विभूतिवरोऽस्ति तेन ॥४२॥

भर्तृहरिगोरखनाथसंवादः

नाथश्च भर्त्तृहरिणा शतकत्रयस्य
कर्त्राष्टकीयपदशास्त्रविचक्षणेन ।
सम्बन्धबन्धनविधौ नितरां घनिष्ठस्-
तत्तीर्थतां हृदयतः कृतितो जगाम ॥४३॥

श्रीविक्रमोऽनुजवरः प्रवरो बभूव
यद्विक्रमो जगति रूढपदत्वमापत् ।
यद्विक्रमस्य परिसूचकवैक्रमाब्दं
नेपालदेशशरदां परिमाति चाङ्कान् ॥४४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रृङ्गार-नीति-विरती रसयँश्च राजा
चाखेटकेऽपि रुचिमान् गहनं स्म याति ।
वन्यान् मृगादिनिवहाननुधावमानो
नित्यं तदाहतित आप्तसुखो बभूव ॥४५॥

भर्त्ता हरिर्मृगयया परिकृष्यमाणो
वन्यं जगाम ननु चैकल उष्णभृत्यः ।
तत्कानने विविधजन्तुमृगाँश्च रम्यान्
दृष्ट्वा बभूव मुदितोऽधिकसक्रियश्च ॥४६।

तत्रैव तेन हरिणा विविधाः प्रदृष्टास्-
तेष्वेककं समतिशायिसुपुष्टि-रूपम् ।
चित्रं मृगं समवलोक्य वधाय तस्य
बाणान् मुमोच तृषया समपातयच्च ॥४७॥

विद्धःशरैर्मृगवरश्चलपाणिपादो
नेत्रद्वयेन निजपीडनसूचयन् सः ।
आखेटकाय परमां मुदमाकिरँश्च
शान्तो बभूव शिशुघासमुखावशिष्टः ॥४८॥

पूर्वं क्षणात्परमसुन्दरसक्रियाङ्ग
आकृष्टिधाम नयनाभिरतेश्च धाम ।
मांसात्मपिण्डमयतां गतवान् कुरङ्गो
मातुः क्षितेर्मृदुलवक्षसि चाशयिष्ट ॥४९॥

आखेटको नृपहरिश्च जगाम वीत-
मादातुमारभत पाणितलं प्रसार्य ।
तत्रैव गोरखगुरुः प्रकटो बभूव
तं मारकं प्रणिजगाद च हेयकृत्यम् ॥५०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राणाः समास्तव च मारितशम्बरस्य
तच्चेहसे मृगवरोऽपि मुदं सुदीर्घाम् ।
त्वज्जीवनस्य नहि साधनभूत एष
तत्केन भूपवरक ! प्रणिहन्स्यपापम्? ॥५१॥

चेत् कोऽपि दृप्तजनकः क्षमते न वीतान्
उज्जीवितुं जगति बुद्धिबलेन युक्तः ।
तन्मारणेऽपि नहि कश्चन पात्रताभाङ्-
नोन्मज्जकोऽस्यथ हि भूप कथं विहन्सि? ॥५२॥

सौन्दर्यभाजि जगतीह समेऽपि योग्याः
सज्जीवनेऽथ मुदिताप्तिविधौ च नित्यम् ।
तेनैव जीवहननं प्रबलेन वर्ज्यं
सृष्टिञ्च सौख्यलतिकां नहि कोऽपि भिन्द्यात् ॥५३॥

तन्मारको हरिरुवाच गुरुं सुसिद्धं
तत्सत्यमस्ति नहि लोपयितुं समीहे ।
किन्त्वत्र तथ्यमिदमस्ति मृतः कुरङ्गः
तत्किङ्करोमि मुनिवर्य कृतापराधः?॥५४॥

भो मारक ! त्वमसि चोज्जयिनीनरेशो
नो वर्तसे मृगवधोद्यतमूर्खमात्रः ।
तेनैव माऽऽदिशसि तत्स्वसनाय चेत्त्वं
योगाप्तशक्तिविभवेन करोमि सासूम् ॥५५॥

भो नाथ ! अद्यत इहास्मि च जीवकोऽहं
नाहं निहन्मि निजसौख्यधिया निरीहान् ॥
यद्धिंसनं मृगयया विहितं मयात्र
उज्जीवयात्र शमनं प्रविधाय योगिन् ॥५६॥

श्रुत्वा तु गोरखगुरुर्विनयान्वितं वचो
निर्हेतुके हतिविधावतिकातरः सन् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निर्मोघयोगबलपुञ्जितदीप्तिवल्या
सव्याद्धि मोचिततया मृगमुञ्जिजीव ॥५७॥

उत्थाय सो ऽपि गतरक्तचयश्च शीघ्रं
घासं मुखेऽनवसितं स्वदितं चचर्व ।
स्वान् सार्थवाहिहरिणान् मृगितुं चुकूर्दे
आश्चर्यमेव वनहिण्डनकैर्व्यलोकि ॥५८॥

असम्भवः सम्भवतां प्रयाति वै
सुदुर्लभो याति सुखेन लभ्यताम् ।
दुर्गोऽप्यनायासतयाथ गम्यते
ह्यसाध्यकं योगबलेन साध्यते ॥५९॥

त्वदीयपुत्रेण च गोरखेण हि
निजाशिषा त्वत्तनयाः सनाथिताः ।
अलौकिकाद्योगबलाच्च जीविताः
विभूतिरेकोऽस्ति यतश्च तावकः ॥६०॥

इति नेपालगौरवमहाकाव्ये इन्द्रपराजय–भर्तृहरिप्रबोधनामा दशमः परिमलः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एकादशः परिमलः

शमसारवृत्तकथनम्

राजा बभूव शमसार इति प्रसिद्धः
श्रीभारते प्रथितदक्षिणदिक्प्रदेशे ।
सर्वश्रिया शमितशत्रुतयापि युक्तः
सन्तानसौख्यरहितो मनसाऽपिपीडत् ॥१॥

सूर्येण चन्द्रकिरणैश्च सुदीपिता भूः
प्रासादसाधनधनादिनृपोन्मुखानि ।
तेनान्वभाविषत राजवरेण नित्यं
ध्वान्तावृतैस्तु सदृशानि विघातकानि ॥२॥

सर्वश्रिया लसितसौधवरोऽपि तस्य
गोमायुभल्लुकनिवासगुहायितोऽभूत् ।
शय्यासनादिमृदुसौख्यदसाधनानि
विध्यन्ति कण्टकमुखानि यथाविरामम् ॥३॥

मन्दाकिनीं नृपतिपाणिगृहीतिकाग्र्यां
पुत्रप्रसूतिवयसोऽत्ययतां गताञ्च ।
दृष्ट्वाथ, आधिरुजया ग्रसितेन तेन
सम्प्रार्थिताः सुरवराः पितरस्तदर्थम् ॥ ४॥

स्वाभाविकं निजकुलात्ययजं दृढाधिं
पिण्डावरोधकृतपैतृकतृप्तिनाशम् ।
राज्यश्रियश्च विधिसम्मतपात्रलोपं
सम्भाव्य राजयुगलं व्यथते स्म नित्यम् ॥५॥

एवं विचिन्त्य नृपतिः सचिवं प्रधानं
सम्बोध्य तत्र विनिवेश्य च राज्यभारम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आराधनाय गिरिशस्य सुताप्तये सः
पत्न्या सहैव विपिनं प्रययौ दृढाशः ॥६॥

दूरस्थघोरविपिनस्य तरूत्तमाधः
पद्मासने समुपविश्य च दम्पती तौ ।
ईशानदिश्यभिमुखौ मनसाऽऽशुतोषं
स्फीतञ्च दध्यतुरतीव विनीतभावौ ॥७॥

एवं गतेषु दिवसेषु किलैकरात्रौ
स्वप्ने शिवं स्मितमुखं नृपतिर्ददर्श ।
आह स्म तं नृपवरं तवकान्तिके प्राक्-
लिङ्गं तृणैः पिहितमस्ति तदर्चयेति ॥८॥

तन्मार्गणे श्रमितवान् स तृणैर्विलुप्तं
कृष्णं त्रिपुण्ड्रलसितं शिवलिङ्गमापत् ।
पूर्वैः समर्चितचरं शिवबोधितं यन्
नत्वा नृपस्य युगलं यजति स्म नित्यम् ॥९॥

मन्त्रं प्रजप्य हृदयेन च तत् प्रपूज्य
ह्यर्घ्यं प्रदाय युगलौ करपल्लवौ सः ।
उत्थाप्य तं कुसुमवारि वितीर्य सूर्य-
मेकेन पादतलतः स्थिरको ननाम ॥१०॥

अर्घ्यं प्रदाय रवये समुपस्थितिञ्च
हस्तद्वयेन शिरसा प्रणते च तस्मिन् ।
तत्क्ष्माभृतः करकयोश्च हि मध्यभागे
तूत्सङ्गकोपरि समास शिशुर्मनोज्ञः ॥११॥

तत्रैव गाढतमसस्तमसो हृदश्च
हन्ता स तत्कृतरुजापहृतश्च राजा ।
स्वाङ्के सुरूपमतिसौम्यशिशुं मनोज्ञं
दृष्ट्वा मुमोद तपनं स्तुतवान् शिवञ्च ॥१२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भास्वन् विकर्त्तन इहासि च मादृशानां
दुःखं विकर्त्तयसि सन्ततिशून्यताजम् ।
पुष्णासि तद्विरहजञ्च शिशुं प्रदाय
तेनैव पूषण इति प्रथितैः स्तुतश्च ॥१३॥

भो आशुतोष मृडकोऽसि सुखं ददासि
सन्तत्यभावजनिताधिरुजं निहन्सि ।
त्वं चेशिषेऽभिलषितादि च दातुमीश
ईशान इत्यपि समार्त्तजनैस्तु गीतः ॥१४॥

मज्जीवने रविशिवौ चरमावलम्बौ
राज्यश्रियै बलसुमित्रसमर्जनायै ।
वंशप्रवाहवहनाय च हेतुभूतौ
नित्यं नमामि मम चित्तगतावनन्यौ ॥१५॥

कृष्णातटे तपनपूजनकावसाने
त्वाविर्बभूव सुत आर्त्तिविनाशनाय ।
इत्यास्थया नृपवरश्च चकार कृष्णा-
गारेति नाम शुभकार्थदमात्मतोषम् ॥१६॥

शापं निरासयितुकामनया तपन्ती
विद्याधरी रतिसमा च सुरोचनाख्या ।
तन्मुक्तये गतवतः स्खलितेश्वराद्धि
प्रादुर्बभूव, शिवजं ननु तमवेदिषुः ॥१७॥

शुक्लस्य चेन्दुरिव बालक एधमानः
रिङ्गँश्च स्वाजिरगृहादिषु मिष्टभाषः ।
शिक्षाप्रशिक्षणविनीतिनयान् समर्ज्य
तद्राजदम्पतिवरौ मुदितौ व्यधत्त ॥१८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुर्भाग्यतो वयसि षोडशवर्षदेश्ये
पुत्रेऽथ सञ्चलितसद्मपरम्पराश्रीः ।
मन्दाकिनी नृपतिसर्वसहायिका सा
दुर्दान्तकालकवलायिततां प्रयाता ॥१९॥

पुत्रोपलब्धिसुखतः प्रकृतायितः सः
पत्न्या अकालमरणेन पुनर्व्यविध्यत् ।
कालात्यये स्थिरमतिः सचिवैः प्रमृष्ट
उद्वाहनं विहितवान् भुजकन्यया सः ॥२०॥

(शमसारश्चित्रकूटस्य राज्ञो भुजकवचस्य कन्यया सह विवाहं कृतवान्)

कालक्रमेण, नवयौवनयापि पत्न्या
पूर्वाणि दुःखनिवहानि विनाश्य राजा ।
सुस्थः प्रजाविनय-रक्षण-सम्भरादौ
लग्नश्च तासु भुवि रञ्जकतामियाय ॥२१॥

सापत्नपुत्र-समयौवनतादिहेतोः
कृष्णालयः समभवन् महिषीनिवासात् ।
दूरे स्थितो नहि घनिष्ठतया तु वृत्ती
राज्ञा ह्यकाम्यत तयोर्व्यवहारवेत्रा ॥२२॥

सापत्नपुत्र-महिषीद्वयमप्यभूता-
मन्योन्यकावपरिचेयनिभौ नियत्या ।
कृष्णः शिवांशजनितः शिवकर्मनिष्ठः
राज्ञी च राज्यविभवेष्ववगाहमाना ॥२३॥

राज्यप्रचालनविधिं प्रविधाय राजा
त्वाखेटकर्मणि दविष्ठवनाभिलाषः ।
पाथेय-सैन्यबल-हेतिसमन्वितः सन्
ऐणेयसिंहबहुलं विपिनं प्रतस्थौ ॥२४॥
आखेटकर्मणि समैरपि राजवर्यैः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रायेण राजमहिषी न च नीयते स्म ।
विद्रोहविघ्नपरिरक्षणहेतुराज्ञी
तस्मात् प्रकृष्टमदरूपवती न निन्ये ॥२५॥

सप्ताहतोऽधिकदिनानि गतानि तस्य
नैवेष्टजन्तुमृगया समभूद्धि तत्र ।
दृश्यावलेर्नयनतृप्तिविधायिकायाः
प्राचुर्यतोऽपि शमसार उवास भूयः ॥२६॥

राज्ञी नवा विविधभोज्यमदप्रकर्षा
कार्यान्तरेषु रमणाद्रहिता वियुक्ता ।
पुंयोगसौख्य–सुरतेषु च लोलुपाया
आकर्षणं युवजनेष्वभवद्धि तस्याः ॥२७॥

तप्तेन दम्पतिवरेण शिवार्चयाप्तः
कृष्णो युवा सकलपुष्टवपुः सुरूपः ।
आजानुबाहुविपुलाक्षविशालवक्षा
राज्ञ्या त्वदर्शि निजसद्मत आलयस्थः ॥२८॥

तुल्यं वयो विपुलनेत्र–सुपुष्टबाहुः
प्रांशुर्ललाटफलकी च सुसौम्यमूर्त्तिः ।
चाञ्चल्ययुक्तनयनोऽपि सदेङ्गितज्ञः
कान्ताभिरिष्यत अतीव मनोजशान्त्यै ॥२९॥

नैजालयात् परिसरे च विलोक्य कृष्णा–
गारञ्च हिण्डनकृतिं त्ववलोक्य राज्ञी ।
दासीमुवाच पुरषं ह्ययि तञ्च लाहि
वार्त्तां लपिष्यति मयेति स वेदनीयः ॥३०॥

तं दासिका खलु जगाम जगाद धीरं
'राज्ञी समाह्वयति शीघ्रतया तु याहि' ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राज्ञया च मातृसमया प्रतिबोधहेतोः
प्रश्नान् विनैव गतवान् तरसा विनीतः ॥३१॥

गत्वा प्रणम्य विनयेन समुत्सुकः सः
तस्थौ करावुरसि सम्पुटितौ विधाय ।
राज्ञी तमादिशति नैजमृदूच्चपीठे
वस्तुं, स सङ्कुचितवानपि तद् व्युवास ॥३२॥

तत्रापि दूरवसनं ह्यवधार्य राज्ञी
तञ्चादिदेश युवकं त्वतिसन्निधातुम् ।
कृष्णस्त्रपामनुभवन्नपि सन्निधिस्थस्-
तच्चेष्टितं त्वनभिवाञ्छितकं व्यजानात् ॥३३॥

सा नैजयौवनमदस्य सुशान्तिहेतो-
र्बाहु प्रसार्य सहसा सयनं समैच्छत् ।
तं चुम्बितुं च परिरम्भयितुं त्वरन्ती
द्रुत्या हि तन्निकटतोऽपससार कृष्णः ॥३४॥

सा तञ्च प्रार्थितवती रमणाय भूयः
कामाग्नितर्पणविधौ परिकल्पितं प्राक् ।
तत्कर्मके विनयमाननके कृते च
शैवांशतो नहि विनिन्द्यतमेऽनुकूलः ॥३५॥

भो प्रार्थयित्रि ! तव नास्मि विलासनीयः
पुत्रोऽस्मि ते, मम पितुर्विवहेन योगात् ।
त्वद्गर्धतो यदि भवेद्रमणं त्वया चेद्
आवां हनिष्यति सुराडिति निश्चयोऽस्ति ॥३६॥

लोके जना विधिविहीनशरीरयोगं
मात्रा स्वपुत्रविहितं ननु पापहेतुम् ।
जन्मान्तरेऽपि मनुजा बहु गर्हयन्ति
ष्ठीवन्ति चापि नहि वेत्सि? कथं नु मातः ? ॥३७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

खेदागमं निरसितुं विधिना विवोढृ –
युग्मं सदा भवति योग्यतमं त्ववद्यम् ।
कुत्रापि केन च कयापि यथेष्टिभोगे
तत् पापकं भवति भक्षकमात्मनीनम् ॥३८॥

तस्मात्तवाऽऽकरणतो मम चागमोऽस्ति
गच्छाम्यतस्तवकगर्धमपूरयित्वा ।
सर्वत्र नैव सुधियोऽधमके रमन्ते
सम्भाविनं परिविभाव्य निजापकर्षम् ॥ ३९॥

कामान्धताथ च समाजविनष्टिहेतु–
र्मर्यादिता विधिमयी तु सुसृष्टिहेतुः ।
सम्भ्रान्तकैर्यदि निरङ्कुशता प्रणीता
सन्तान–वित्तविषये शुचिता कथं स्यात् ? ॥४०॥

शुद्धस्य वंशविभवस्य सुरक्षणार्थं
सावर्ण्यवैदिकविधी परमावलम्ब्यौ ।
ताभ्यां समूढवरशौण्डरतेन नारी
तादृक्समूढवर एव च तां रमेत ॥४१॥

इष्टासु खेदविगमः पशुवद्रिरंसो–
रस्त्येव यद्यपि हि, तस्य निषेधितत्वात्
रोगादिदुःखदसमेतकुलस्य दोषात्
कीर्त्तेर्विनाशकतयापि जनो न मुह्येत् ॥४२॥

गोप्यस्य भञ्जनभिया किल भीषिता सा
राजाऽऽगतिं समवधार्य च पीडिताभूत् ।
भुक्त्वा विषं त्वथ च रज्जुषु लम्बयित्वा
प्राणान् जिहासुरभवद बत कृष्णकर्मा ॥४३॥

दासी तदैव समुवाच च तामधीरां
कोपं विधाय शिथिलं वसनञ्च केशान् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृत्वाथ कोपभवने परपीडितेव
वाष्पाश्रुमोचनपरा भवती भवेति ॥४४॥

राज्ञो गृहागमसमीपदिनं विभाव्य
कोपाभिनीतिचतुरा चतुरा व्यवाये ।
कोपालयं विविधयाचनपूर्तियोग्यं
गत्वा रुरोद करपादयुगं प्रफाल्य ॥४५॥

वृत्तं निशम्य नृवरो ह्यपसार्य कष्टं
कोपालयं प्रति जगाम भवन् सशङ्कः ।
राज्ञीं विपर्ययमयीञ्च विलोक्य सुप्तां
केनासि भो प्रियतमे ! त्वमिहासि नीता ? ॥४६॥

केनापि सुन्दरि कुदृष्टितयासि दृष्ट्या
लुञ्चामि तस्य नयने वद कोऽस्ति धृष्टः ?
स्पृष्टासि वा सपदि मृत्युमुखोन्मुखेन
छेत्स्यामि तद्रिपुकरौ भव सुस्थिरा त्वम् ॥४७॥

प्रत्यग्रपुष्पनिभकोमलकायधाम्नि
केनापि दूषणततिर्विहिता नु दण्ड्या
किं वा तवाचरणकर्मकनिन्दनञ्च
कृत्वापराधबहुलं कृतवान् गतायुः ? ॥४८॥

एवं भुजावतिसमाश्वसने प्रवृत्ते
सा तं जगाद ऋतवत् सकलञ्च वृत्तम् ।
कृष्णोऽस्ति ते हतकपुत्र इहानुकश्च
मां दारकर्मणि सदा नुदते समेत्य ॥४९॥

मां भूप बाहुयुगले प्रतिबन्धनाय
आलिङ्गितुं प्रयतवानपि कामवार्त्ताम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृत्वा सदैव तव तर्पणदेन नैच्यं
प्रादर्शि नाथ मृगयासु गते त्वयीशे ॥५०॥

तद्भीतितःसकलसौधगतानपास्य
सौविध्य–दास्य–विभवानपि केवलाहम् ।
द्वारं पिधाय निजसत्यचरित्ररक्षां
जीवाम्यहं विदधती तव चागमार्थम् ॥५१॥

कृष्णस्य कृष्णचरितस्य बकायितस्य
स्वामिन् त्वदीयविरहावसरस्य चेच्छोः ।
दुष्कर्म तद्भवति मर्मणि घातकं मे
तत्रास्ति साक्ष्यमिह तथ्यवचास्तु दासी ॥५२॥

राजा भुजावतिभुजङ्गमृदूक्तितुष्टः
पक्षान्तरस्य कथनं समुपेक्षमाणः ।
दण्डं जुघोष तपसार्जितपुत्रकस्य
छित्त्वाङ्घ्रिहस्तयुगले त्यजनञ्च मार्गे ॥ ५३॥

पक्षद्वये कृतपदस्य विवादवह्ने–
र्निर्वापणाय द्वितयं ह्यपि वेदनीयम् ।
एकावधानविरहे तु न न्यायत्यताऽतः
स्वेनापि भाविनि जनो हि समेति दग्धिम् ॥५४॥

राजाऽपराधरहितस्य कुलीनसूनोः
सापत्नतालगुडसम्प्रहृतेश्च भोक्तुः ।
पादौ च जान्ववधिकौ करकौ कफोणेश्–
श्रृङ्गाटके परिजहाववशं विभेद्य ॥५५॥

उग्रे च कर्मणि रतस्य गतेस्तु द्रष्टा
चान्याप्रवर्त्तनविधावपि नोदकोऽपि ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एतादृशो भवति यद्यपि राजदण्डश्-
चात्राविवेककृत-मन्तुविहीनकः सः ॥५६॥

मार्गे च छिन्नचरणादिकपीडितञ्च
चित्काररोदनसमिङ्गनबोध्यपीडम् ।
राज्यप्रभीतिकृतसर्वसहायहीनं
श्रीगोरखो गुरुसहाय उपेतवान् तम् ॥५७॥

योगाप्तसर्वविषयावपि मन्तुवित्त्या
कृष्णापराधविरहं बहुधा निरीक्ष्य ।
तस्याश्रयं विविधपान्थगतेश्च मार्ग-
मन्यायकातरतया सहसेयतुस्तौ ॥५८॥

सत्यानुकूलकरणेऽकरणे च तत्र
योगाप्तशक्तिसफलीकरणाय नित्यम् ।
तथ्यञ्च योगबलचालनिकाविशुद्ध-
ञ्चाधृत्य योगबलिनो हितमाचरन्ति ॥५९॥

तत्सेवको भवति साङ्गविधानदक्षो
नैवाभवत्त्विह च कोऽपि दयालुजीवः ।
तेनैव तं स्वसयितुं ह्यपि कृत्तशोधं
कर्त्तुमुवाह गुरुगोरखयोगिवर्यः ॥६०॥

राज्ञः कुमार इति तं नृपतिं त्वयाचीत्
अङ्गैः प्रहीण इति कोऽर्थ इहास्ति योगिन् ?
सञ्जीवनी-युतिबलेन हि साधयित्वा
तं सुस्थकं प्रतिविधाय करोमि साङ्गम् ॥६१॥

आर्त्तस्य चार्त्तिशमनाय गुरुश्च मत्स्यः
स्वं गोरखं सपदि चेङ्गितवान् दयालुः ।
भस्म प्रयुज्य च विभिन्नछितेषु लेपं
कृत्वाऽपराधरहितं कृतवान् स साङ्गम् ॥६२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृष्णस्य कष्टशमनेन समाङ्गपूर्त्या
तद्दर्शका युतिबलस्य च शक्तितश्च ।
न्यायं करोति भगवानिति कीर्त्तयन्तो
हर्षातिरेकमनसो जयतां समाहुः ॥६३॥

सुस्थञ्च सद्मगमनाय ह्युवाच योग्यं
नाहं च यामि बत मृत्युमुखं प्रयामि ।
एवं दृढं शिवगुरुर्निजकं विधाय
साकं निनाय भगवान् गुरुणा द्वितीयः ॥६४॥

तत्रापि तं निरगदत् युवकं हताशं
त्वं हिण्डने क्षुधि तृषासु गतानुभूतिः ।
वर्षातपादिसहनेऽपि सदाऽपटुस्त्वं
नैवानुयाहि युवराज विचारय त्वम् ॥६५॥

एवं गुरुद्वयकृतेऽपि प्रबोधनेऽयं
नैवावबोधि युवको भुवि निस्पृहः सन् ।
दुःखेन लब्धतनयं प्रति तातकृत्यात्
स्वार्थान्धसंसृतिविहानमुखः प्रतस्थे ॥६६॥

मत्स्येन्द्र–गोरखगुरू अनुयन् विरक्तः
शुश्रूषु–सेवकसुशिष्यतयानुयाता ।
प्रक्षाल्य गौरवपदानि सुपीड्य पादौ
भिक्षां प्रयाच्य वचनानि विधाय सोऽभात् ॥६७॥

शय्यासनादिरचनासु स बालकोऽपि
प्रासादतः सपदि चागतवान् कुमारः ।
पूर्वं गुरोर्गुरुकृते विरचय्य शय्यां
श्रीगोरखस्य कृतवान् शयनञ्च सेवाम् ॥६८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पादप्रपीडनपरं विनयेन युक्तं
जिज्ञासयाथ च चिकीर्षुतयानुयातम् ।
धैर्यं दमञ्च शुचितादिसमेतनीती–
र्मत्स्येन्द्रनाथगुरुराज उवाच बालम् ॥६९॥

पत्नी प्रमुग्धनृपतिश्च जना परेऽपि
शिश्नोदरादिवशगा प्रभवन्ति चान्धाः ।
ते चापि भाविसमये समयेन दण्ड्याः
दुष्कृत्यबोधविवशाश्च भवन्ति वत्स ॥७०॥

पश्चात्तपन्ति रहसि प्रकटे रुदन्ति
देहं दहन्ति मनसा च सदा स्मरन्ति ।
ष्ठीवन्ति तामसकृतिं ह्यविवेकिनस्ते
तस्माज्जनाः कृतिषु पूर्वपरेक्षकाः स्युः ॥७१॥

संख्यानवद् भवति वत्स जनस्य यानं
तस्योन्नतौ बुधवरैर्युतिता विधेया ।
ईर्ष्या च दुर्व्यसनहेतुरपासनीया
सम्बर्धयेद् बुधगतिं विभजेत्परार्त्तिम् ॥७२॥

भूत्यै क्रियासु किल जागरणं विधेयं
तत्राक्रियत्वचरितस्तु न भूतिमान् स्यात् ।
योगादिसिद्धिविषये कृतवान् श्रमं यः
सव्येतरे फलयुतिं लभते स नित्यम् ॥७३॥

रामाहितं ह्यथ दशास्यचरं हि वेत्सि
सोऽभूच्छिरांस्यनुसरन् मतिमान् बहुज्ञः ।
लोकस्य सङ्ग्रहविधिस्तु सदैव रामे
नैवास्ति तत्र, जनतार्चति चैव रामम् ॥७४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्माच्चरित्र-कृति-लोकसुसंग्रहैस्त्वं
सर्वात्मना जगति लब्धपदश्च योगी ।
नाथीयपद्धतिविकासनयं प्रमार्क्षि
सिद्धेषु नाथनवकेषु च गण्यसेऽथ ॥७५॥

योगिन् ! तवापि बत तातहतो हि मूढो
नैजञ्च दुर्मतिकृतं स्खलनं विवेक्ता ।
श्रेयोयुते कृतपदस्य च तेऽत्र चिन्ता
माभूदतः परत एव परो विवेच्यः ॥७६॥

सन्न्यासिभिः सुजनकैश्च सदावधेय-
मन्येऽपि तैः सफलतासु विबोधनीयाः ।
स्वस्यानुकूलनविधिं न च यैति चेष्टा
सा नैव मानववरेण परेषु कार्या ॥७७॥

निन्दासु गालिषु परेण कृतासु चेत्त्वं
दुःखानि साध्वनुभवन् विकृतिं प्रयासि ।
तेनैव नान्यजनतासु विनिन्दनं स्यात्
त्वत्कर्तृकं किल कदापि भवेद् विनिन्द्यम् ॥७८॥

अन्नाद्यभावविहितेन च खिद्यसे त्वं
तेनेतरोऽपि भवतीति क्षुधा न पीड्यः ।
तद्वच्च ताडनविधावपि वेदनीयं
कार्यं परस्य हितकारि निजानुरूपम् ॥७९॥

स्वार्थान्धतां विषयजाञ्च विहाय तृष्णां
देशादिसर्वविषयेषु हितं विदध्याः ।
धर्मञ्च संस्कृतिनिजाचरणानि रक्षन्
वैराग्यभाग् बुधजनः परमे रमेत ॥८०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्मात् समाज–जनता–विषयप्रपूर्त्यै
स्वोत्कर्षतां गुणकृतां विशदय्य नित्यम् ।
सर्वात्मना निजचरित्रधने सुरक्षये
आदर्शता युतिसुनीतिषु वर्धनीया ॥८१॥

शमसारं समाजञ्च विबोध्य देशिकद्वयम् ।
उज्जीवितव्यवस्थायै प्राव्रजत् काननान्तरम् ॥८२॥

इति नेपालगौरवमहाकाव्ये शमसारवृत्तकथनं नाम एकादशः परिमलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वादशः परिमलः

चौरङ्गिनाथवृत्तं वनदेवीवृत्तञ्च

एवञ्च योगिसहचारिजनो हि योगी
स्यादेव चेति युवकस्य मतैकतातः ।
प्राप्त्या चतुष्पथत एव हि तस्य नाम
चौरङ्गिनाथ इति गोरखनाथ आह ॥१॥

नाथेष्वयं नवसु चान्यतमोऽस्तु योग्यश्-
चन्द्रस्वरूप इति भक्तगताङ्गरोढा ।
विद्या-सुबुद्धिबल -देह-चरित्रशक्ती-
र्भक्ताय हृष्टमनसा प्रददिष्यते ऽथ ॥२॥

अङ्गचतुष्टययुतध्वजिनीबलानां
दाता भविष्यति युतौ नयकेऽनुगानाम् ।
चौरङ्गिनाथ इति सार्थकतां च भोक्ता
तन्नाम नाथपथविस्तरणाच्च लोके ॥३॥

चौरङ्गिणः प्रसृतमूलतया प्रवृत्तो
नाथीयपद्धतिविधे र्घटकश्च मार्गः ।
पङ्गूल-पाङ्गल अथापि च पाकलेति
नाम्ना भविष्यति चलः खलु निःस्पृहाणाम् ॥४॥

नाथत्रयं गमनकर्मणि नव्यदेशं
कृष्णातटीयरुचिरायितकं जगाम ।
दृष्ट्वा सुरम्यदरिकाञ्च तपोऽनुकूलां
विश्रान्तये तरुतले वसनञ्चकार ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्रैव पक्वफलितानि समश्य वारि
पीत्वाथ तत्र पुरतः स्थितगह्वरञ्च ।
युक्तं हि तापसविधाववधार्य सम्यक्
चौरङ्गिणं ह्युपदिदेश तपस्यितुं सः ॥६॥

वैराग्यवर्त्मपथिकस्तपसे समुत्कः
श्रुत्वा गुरुद्वयकृतं वचनं हिताक्तम् ।
जिज्ञासया त्वरणतां सहसा प्रदर्श्य
साफल्यसूचनविधिं स्वयमेव चाह ॥७॥

सिद्धिप्रदा भवति साधु कृता तपस्या
सा चाथ तापसहिताय दुरापदात्री ।
भागीरथीं किल भगीरथ आनिनाय
श्रीवायुजश्च सुरसास्यगतो निवृत्तः ॥८॥

सिद्ध्या जयन्ति जगतो मनसेप्सितेषु
योगाप्तसिद्धिविभवाः सहजं प्रयान्ति ।
शैलप्रवेश–तटिनीतरणादिदुर्ग–
मुल्लङ्घ्य योगिवरका हितमाचरन्ति ॥९॥

लङ्कामियाय हनुमानणुतां प्रयुज्य
सम्प्राप्तये त्वरिगृहस्य च रामपत्न्याः ।
वात्यायितेन गुरुतो नभसश्च कृष्णस्–
त्यक्तोऽसुरेण बहुभारनतेन सिद्धः ॥१०॥

कायात्मसिद्धिकृतजीवहितं प्रसिद्धं
पारक्यदेहगमनं ह्यपि बोधवृद्धौ ।
एकत्र कायनिकरैर्विषयान् रसन् सः
पञ्चाशतारमत सौभरिको निजाभिः ॥११॥

इच्छामृतावपि च कायसमूहकृत्यं
तत्रैव कर्मफलनाशकतापि तेन ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नानोपदेशकृतयेऽपि च काययोगं
बुद्धश्चकार बहुशिष्यजनेष्वनेकः ॥१२॥

सिद्ध्यैव यासि गुरुतामणुताञ्च दैर्घ्यं
तूलादिवल्लघु च सिद्धिबलेन गात्रम् ।
प्राप्तिश्च क्वापि च कुतोऽपि हि वस्तुलाभः
प्राकाम्यता भवति लिप्सितकेष्वबाधा ॥१३॥

सर्वेषु वस्तुषु वशीकरणेन कुड्य -
सम्वाहनादिकरणं कथितं तदीश्यम् ।
क्ष्वेडादिवश्यकरणं वशितां समाहुः
सिद्ध्या भवेद् गरलता च सुधासमाना ॥१४॥

एवञ्च सिद्धिफलिता सकला प्रवृत्तिस्-
तत्रापि योगिजनकैः किल चात्मदृष्टिम् ।
संल्लक्ष्य सिद्धिविभवा उपयोजनीया
नो चेत्तया व्यवसिता मधुपायिताः स्युः ॥१५॥

एवञ्च साधकवरेण हि सिद्धिकार्यं
कर्त्तव्यमेव विपुलं जनताहितार्थम् ।
तेनैव नैज-गुरुपद्धतिकीर्त्तिरक्षा
तस्माद्धि तत्र हितकर्मणि तेऽस्तु योगः ॥१६॥

एवं स्वतस्तपनकर्मणि चोत्सुकोऽसौ
सिद्धेः प्रकर्ष-हितकारिवचो निशम्य ।
सर्वात्मना तपसि चातुरतां प्रदर्श्य
स्थानावधी कृतिविधिञ्च हि ज्ञीप्सति स्म ॥१७॥

तत्रास्ति गह्वरवरो मुखतो विशालः
शान्तिप्रदे प्रकृतिसुन्दरिकासनाथे ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पानीयपातलसिते फलपुष्पकाढ्ये
क्ष्माभृद्वरे तव तपस्करणाय योग्यः ॥१८॥

चौरङ्गिणं निजविनेयवरं विबोध्य
श्रीगोरखो निजगुरोः प्रतिलभ्य चाज्ञाम् ।
तत्तापसस्थलदिशं प्रणिनाय धीमान्
पद्मासने च किल वासयति स्म शिष्यम् ॥१९॥

पद्मासनोपरि शिलाशकलं प्रलम्ब्य
तस्यैव दृष्टिविषयाय समादिशत्तम् ।
पूर्वोन्मुखं तपसि तत्परकं विवित्सुं
चौरङ्गिणं नवकनाथसुसिद्धिभाजम् ॥२०॥

प्राणान्नियम्य नयने परिलक्ष्य लक्ष्ये
चावृत्तितः परमतेजसि रोचमानः ।
ब्रह्मात्मकं भवति तत्त्विवति निर्णये सन्
ध्यायन् सदा भव फलाय, समर्हसि त्वम् ॥२१॥

कालक्रमेण नियमेन तपःस्तरस्य
चोन्नायनाय मनसा यतनीयमस्ति ।
तृष्णाक्षुधादिसमये शमनाय तेषां
आपः फलानि लसितानि भवन्ति चात्र ॥२२॥

वृद्धौ तु तापसतपःस्तरणस्य बिन्दो-
र्नो बाधते तपसि तत्त्वरसे निमग्नान् ।
तृष्णादिभौतिकगुणास्तृषितान् तपन्ति
युत्या परात्मरसिकेषु कुतो हि तापः? ॥२३॥

वर्षाणि द्वादशमितानि भवन्ति सिद्धौ
तद्वर्षकावधिकबाधविहीनता स्यात् ।
स्युरेव तापसकृते फलदानि चापि
दृष्यानि वत्स ! तवकानि भवन्तु तानि ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तप्त्वा व्यतीत्य समयावधिकञ्च योगिन्
ख्यातो भविष्यसि च योगबलेन नित्यम् ।
नाथीययोगपथविस्तरणे प्रभावी
मार्गो विशिष्टिसहितोऽपि कृतस्त्वया स्यात् ॥२५॥

एवं हि तापसविधीनभिधाय योगी
श्रीगोरखो बहिरियाय शुभस्य लिप्सुः ।
वन्यैश्च जन्तुनिवहैरहितं विचार्य
गौहास्यकं पिहितवान् शिलया बृहत्या ॥२६॥

योगप्रयोगविधितः क्षुधि नो जितायां
प्राणान् सुरक्षयितुकामनया हि खाद्यम् ।
आवश्यकमिति धिया शिवगोरखोऽयं
सम्प्रार्थयत् विपिनदैवतकं तदर्थम् ।२७॥

तत्प्रार्थनां श्रुतवती वनदेवता सा
प्रादुर्बभूव, गुरुगोरखकार्यसिद्ध्यै ।
किंहेतवे भुवि गुरो मम तेऽर्थनाभूत् ?
तद् ब्रूहि मे सपदि पूरयितुं यतिष्ये ॥२८॥

अस्मद्विनेयनवको नवकश्च योगे
त्वत्सन्निधौ भवति गह्वरके तपस्यन् ।
क्षुत्तृट्पराभवतपोऽर्जनतो हि पूर्वं
मातःस्वयं ननु फलानि समाहरेथाः ॥२९॥

पानाशनस्थितिसमत्ययने तु तस्य
मातस्त्वदीयसमनुग्रहणं न वा स्यात् ।
अभ्यासकालिकतपश्चरणे तु देवि !
साहाय्यकं तव भवेत् फलदं सदात्र ॥३०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लोकस्य सङ्ग्रहविधावपि तद्धितार्थं
ये योगिनःसुतपसाप्यधियन्ति सिद्धिम् ।
मुक्ता भवन्ति च तया, जनता निरोगास् –
तत्रोपकर्मणि रताश्च फलेन युक्ताः ॥३१॥

सामर्थ्यवज्जनवितीर्णसहायतातः
कार्योद्यतस्य सहकार्यकृतेः प्रयोगात् ।
संयोजकस्य च हि योजनसत्प्रयासा–
ल्लोके महान्ति सफलानि कृतानि सन्ति ॥३२॥

लोके महज्जनसमादरणात्ममानात्
साधारणेषु च सदोपकृतेः प्रयोगात् ।
पूर्वञ्च तस्य मनसः किल पूरणाच्च
सांसारिकी चलति लोकगतिर्हि सर्वा ॥३३॥

सम्भूय सर्वजनकैरथ सेवितानि
दुष्कार्यतामपि गतानि सुखङ्कराणि ।
तस्मान्निजोन्नतिविधौ परकीययोगस्–
तस्योन्नतौ च निजयोग इतीह युक्तम् ॥३४॥

सन्तीह काननवराणि ततस्तवैश्य–
मैश्वर्यतश्च वनरक्षणसम्पदे च ।
तत्राश्रितस्य परिपालनकं त्वदीयं
तस्मादनुग्रहसमेतफलानि देहि ॥३५॥

श्रीगोरखोक्तिपटुतामवधार्य देवी
सर्वाङ्गभूषणविभूषितसुन्दरास्या ।
दृष्ट्या बभूव गुरुगोरखकार्यसिद्ध्यै
योगिन् तवार्थितमहं सकलं प्रदास्ये ॥३६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पात्रे प्रदानमुपकारकृतेर्विधान-
मज्ञस्य बोधनमथार्त्तजनस्य चार्त्तेः ।
दूरीकृतिश्च हि सामयरुग्विधूतिः
प्रोत्साहनं कृतिमताञ्च न याचनेऽपि ॥३७॥

उद्योगिनस्तु मनुजा यदि देशहेतो
र्व्यष्टेरथोन्नतिविधावपि सोद्यमाः स्युः ।
सर्वेषु तादृशजनेषु मदीययोगः
प्राप्तो भविष्यति यतो मयि शक्तियोगः ॥३८॥

सर्वं वनं मम हि भौतिकरूपमस्ति
तद्रक्षणं जनतया विपुलं विधेयम् ।
योगिन् ! सदा त्वमसि सर्वगतिर्हि लोके
तद्बोधनं युतिप्रचारसमं विदध्याः ॥३९॥

तद्भेदनं विनशनञ्च ममैव नाशस्-
तद्रक्षणं ह्यथ परिष्करणञ्च पूजा ।
तद्धारिता सघनता च मदीयपुष्टिस्-
तस्मात् सदा जनतया वनरक्षणं स्यात् ॥४०॥

एकेन चापि तरुणाऽथ तरन्ति लोकाः
पापात् क्षुधस्तपनकादपि दार्वभावात् ।
भूमेश्च साधु पतनादपि वारभावात्
किं काननस्य परिरक्षणतो न यत्स्यात्? ॥४१॥

लोके च प्राणपवनस्य ततः सुयोगस्-
तेन प्रदूषणनिशाचरतःसुरक्षा ।
काष्ठादिकस्य समिधामपि लम्भनेन
देशाढ्यताप्रतिविधानसमर्थतात्र ॥४२॥

तिस्रो भवन्ति भुवि संस्कृतयः प्रधानाः
आरण्यकी च मरुजा च समुद्रजाता ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आद्या च सा भवति संस्कृतिरस्मदीया
तन्नाशनं किमु न चात्मविनष्टिरेव ? ॥४३॥

आरण्यकं विपुलदर्शनधर्मसत्तां
त्वं वेत्सि साधु समके वनजा भवन्ति ।
तत्तापसं स्थलमपीह च यज्ञकर्म
योगिन् ! सदैव मनसापि न नाशनीयम् ॥४४॥

आर्षीञ्च ज्ञानलतिकां वनजामवेहि
रामायणादिरचनामपि तद्भवाञ्च ।
रुग्णस्य रोगशमनाय रुजामभूत्यै
वन्यौषधं जगति गर्जति चाप्यमूल्यम् ॥४५॥

उच्चावचा अथ भुवोऽपि च पर्वतीया
सन्त्येव भूस्खलनभाजनभाज एव ।
तेषाञ्च रक्षणविधौ तरवो हि रोप्याः
वानप्रवर्धनविधिश्च त्वया प्रसार्यम् ॥४६॥

त्वज्जन्मभूर्गिरिमयो नयपालदेशो
भूचालभूस्खलनभागितया प्रसिद्धः ।
तस्या हि दैवविपदः परिरक्षणार्थं
योगिन् ! प्रचारय वनस्य तरोर्महत्त्वम् ॥४७॥

नैपालकं हरितकाननमस्ति वित्तं
काष्ठादिवीरुधि सदैव हि तस्य वासः ।
पाथःस्रवस्य विविधस्य हि रक्षणाच्च
तद्वित्तकं भवति रक्षणहेतु भूमेः ॥४८॥

जातैश्च रोपिततरूत्तमगुल्मशष्पैः
स्वीयैश्च मूलनिवहैःप्रतिरोध्यमाना ।
तन्मृत्तिका ह्रसति नैव, च तेन रक्षा
भूमेश्च तथ्यपरता सकला प्रकाश्या ॥४९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यायावरोऽसि जनताहितकर्मनिष्ठो
योगान् प्रचारयसि पीडितरञ्जकोऽसि ।
लोकाय योगविभवान् प्रददासि नित्यं
त्वं याहि चेहितदिशं त्वहमस्मि गुप्त्यै ॥५०॥

सर्वञ्च तापसहितं प्रविधाय योगी
सुस्थो बभूव नृपदण्डितसुव्यवस्थः ।
तत्सिद्धये च मनसा शुभतां समिच्छन्
देशाटनाय गुरुणा सह प्राव्रजत् सः ॥५१॥

इति तपनसुसिद्ध्या ख्यातितुङ्गे स्थितस्य
बहुविधगुण–रूपैरक्षरत्वं गतस्य ।
विविधतपनशौर्यैर्लोकशर्माश्रितस्य
जगति विदितनाम्नः कीर्त्तनं किञ्चिदुक्तम् ॥५२॥

अधिभुवनसुसिद्धश्चास्ति नेपालदेशः
शिवगुरुकृपया यः प्राप्तवानेकभावम् ।
अपि च नहि वशेऽभूदाङ्ग्लकानां कदापि
स जयतु कृपयैव श्रेष्ठसामर्थ्यशाली ॥५३॥

नभसि डयनकार्यं यामधाम्नो मृतस्य
जगति झटिति गत्वा चानयं संविभाव्य ।
अपि सरिति पदाभ्यां पारलब्धिं विचार्य
प्रणमति मम चित्तं तं सदा श्रद्धयार्द्रम् ॥५४॥

वचसि कृतिषु सिद्धिस्तत्र साफल्यदृष्टे–
स्तदितरजनकार्यादुत्तमानां विधानात् ।
अथ च नियमरोधे शोषणे सद्विरोधात्
स भवति युतियुक्तो वैभवं चात्र देशे ॥५५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीगोरक्षीयसिद्ध्या समितविषमकान् वर्णयित्वाथ पूर्वे
द्रव्यं रामञ्च पृथ्वीं निजजनिदभुवश्चैकता–सुव्यवस्था–
कार्ये वै नोदयित्वा पृथुलनृपकृतैर्दिव्यकैश्चोपदेशैः ।
साकं सेनागणानां गुरुगतपदकैर्नामता पर्य्यतेऽग्रे ॥५६॥

इति नेपालगौरवमहाकाव्ये चौरङ्गिवृत्तं वनदेवीवृत्तञ्चेति द्वादशः परिमलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रयोदशः परिमलः

गोरखनाथस्यानुग्रहवर्णनम्

श्रद्धां प्रकाशयितुकामनया तु गोर्खा-
नाम्नाऽस्ति मण्डलवरो विदितोऽत्र देशे ।
गोरक्षनाथकृपया शकलान्निरस्य
यश्चाप गौरवबृहत्तमते प्रशस्ये ॥१॥

श्रद्धातिरेकमनसैव च भारतीये
श्रेष्ठे प्रदेशसुभगे नयपाललग्ने ।
गोरक्षणे पुरमिति श्रुतिसार्थकं स-
देके च गोरखपुरं ननु सद्म आहुः ॥२॥

जीवन् चिरं स हि तताप युगे तृतीये
तेनैव तद्भवति तस्य तपःस्थलञ्च ।
गोर्खास्थलीयतपनादपि सिद्धिदाच्च
पीठं कृतं किल भवेद्धि समस्थलत्वात् ॥३॥

कैलासकूटभवने खलु गोरखीये
एका गुहा लसति सर्वमनोरमा या ।
तत्रैव गोरखगुरुस्तपतां वरेण्यः
प्रादुर्बभूव हि कलाविति तथ्यमाहुः ॥४॥

अन्तर्गुहञ्च दहनस्य शिखा प्रदीप्ता
स्पष्टं प्रकाशयति झोलिकमाल्यशूलम् ।
अन्यानि योगिसुलभानि च साधनानि
संसूचयन्ति निजसंस्कृतिधर्मसारान् ॥ ५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्यैव गह्वरवरस्य च भूमिकायां
लम्बायमानदृषदस्ति विराजमाना ।
तत्रैव गोरखगुरोश्चरणद्वयस्य
राराजति प्रकटपादतलानि भूरि ॥६॥

तत्रैव साधु तपतो गुरुगोरखस्य
स्नेहानुसिक्तसमनुग्रहतो विशिष्य ।
देशार्जनं विहितवान् खलु गोष्ठकर्मा
रामो व्यधत्त नियमान् जनतानुकूलान् ॥७॥

पृथ्वीनृपश्चतुर आढ्यतमं विधाय
व्यस्तारयल्लघुमिमं हि विजित्य दीनान् ।
तन्मार्गगैस्तनयतत्तनयैश्च गोर्खा
ह्यातिष्टकाङ्डविशालतमः प्रतेने ॥८॥

एकात्मताभवनतः पुरतो विभिन्ना
देशेऽभवन् किल सुसीमितमण्डलेशाः ।
तादृक्च लम्जुङभवो नृपतिर्बभूव
ब्रह्मोत्तरेण यशसा व्यवह्वीयमाणः ॥९॥

पुत्रास्त्रयो नरहरिः प्रथमो बभूव
मध्यश्च सन्नरपतिश्चरमायितो ऽयम् ।
ज्येष्ठश्च ज्येष्ठगुणकोऽपि च राजनीतौ
मध्यश्च तत्सहकृतौ मनसाऽव्रियेताम् ॥१०॥

सद्वृत्तितो विनयदेहबलेन युक्तो
द्रव्योऽवरोऽतिसरलश्च हि तातसेवी ।
तात्कालिकप्रचलनस्य च कारणाद्धि
गोपालने नरपतिस्तमयुङ्क्त गोष्ठे ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गोष्ठालयः स च जगाम मुदैव गोष्ठं
श्रीरागिनाशगतशष्पजलाढ्यवित्तम् ।
चम्पावतीपरिसरेण च शोभमानं
सीमाभवे विविधशस्यमये सुरम्यम् ॥१२॥

गोष्ठे वसन् स मुदितः कृतगोष्ठकर्मा
गोसेवनेन बहुदुग्धतया प्रसन्नः ।
गोवंशवर्धनकृतिं प्रविधाय नित्यं
पित्रोर्हितं स कृतवान् विनयी च धीमान् ॥१३॥

गोष्ठं तलद्वयमयं त्वभवत् समुच्चं
भौमे तले समवरोधिषतात्र वत्साः ।
द्रव्येण वत्सतरकाश्च हि तथ्यवेत्रा
पर्णालये च परके न्यवसँश्च गावः ॥१४॥

तेनैव गव्यबहुलं बहुवत्सता च
कूटस्थराजभवनं किल गव्यपूर्णम् ।
गोचारका अपि च घासविकर्त्तनाश्च
दध्योदनादथ च दुग्धमयाद्विरक्ताः ॥१५॥

दध्ना प्रगाढपयसा घृततोऽपि तृप्ताः
पादाम्बुना मथितकेन च तृप्तिभाजः ।
गव्यप्रकारपरिकल्पनतो विदूराः
वन्यञ्च तेमनमयं स्वदितुं समैच्छन् ॥१६॥

गोष्ठगृहे च दधिमन्थनतीव्रघोषाः
पञ्चाननीयघनगर्जनतुल्यनादाः ।
सन्ध्याद्वयेऽपि नवकाः पथिकाः सतर्का
आयान्ति यान्ति च समीपपथेन भीताः ॥१७॥

भौमोपरिस्थतलके स्वयमध्युवास
पाकालयेन सह दुग्धतपक्रियार्थम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अग्न्यालयोऽपि विहितः स हि तत्र दुग्धं
सन्तापयन् पदरवानशृणोद्धि धीरः ॥१८॥

भिक्षाटकोऽस्मि जनतालयतोऽनुजीवी
नित्यं निरञ्जनशिवं मनसाप्यलक्ष्यम् ।
उच्चार्य साधु कृपया परिलब्धभोजी
सन्त्यत्र गाव इति गोरसकं प्रयाचे ॥१९॥

भिक्षाटकः समभवत् किल माणवोऽसौ
तुम्बीत्रिशूलकरको धृतदर्शनश्च ।
हस्तं प्रसार्य तलकोपरि दत्तपात्रः
प्रादर्शयन् ननु वटुस्त्वतिमानुषत्वम् ॥२०॥

गोपालकश्च मतिमान्नपि सिद्धकं तं
विज्ञाय सम्भ्रमगतिस्तरसावरुक्षत् ।
पादौ प्रणम्य विनयेन च तस्य भिक्षो-
स्तञ्चानिनाय तलकोपरि साधुवृत्तः ॥२१॥

पाकप्रगाढपयसि श्रितकं विडङ्गं
निक्षिप्य स्वादुतमपायसकं पपाच ।
तच्चादरेण परिवेष्य च पत्रपात्रे
सिद्धाय छद्मवटुकाय ददौ प्रसन्नः ॥२२॥

प्रत्तामृतायितपयस्यसमाशनेन
तृप्तो बभूव स हि भिक्षुकबालयोगी ।
तद्भोजनादधिकपायसशेषभावो
द्रव्योदयस्य विषयं समसूचयच्च ॥२३॥

इष्टेन भोजनवरेण सुतृप्तिमान् स-
द्रव्येण तेन सुविनीतवरेण तुष्टः ।
श्रीगोरखोऽस्मि युतियुक्त-सुसाधकश्च
नन्वेष नैजपरिचायनकं व्यधत्त ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृष्ठप्रपोषणकृतिञ्च विधाय तस्य
गोरक्षराज्यविभवोऽस्तु तवेति चाह ।
नेपालराज्यविजयस्तु तवात्मवंश्यैः
सम्प्राप्स्यते नहि तपोविरहादिदानीम् ॥२५॥

आशीर्वचांसि गुरुतः प्रतिलभ्यगोप–
उत्साहवान् नृपतिशासनभारमिच्छुः ।
वेशन्ततो दधिपयांसि समूढवान् स
प्रासादमेत्य जननीं निजहार्दमाह ॥२६॥

गोरक्षणं जननि ! यद्यपि मेऽस्ति हृद्यं
तत्सेवनं सुगतिदं मतिदञ्च दुग्धम् ।
तच्चालनेन सहितामपि राज्यसत्तां
शक्तोऽस्मि चालयितुमत्र विधेहि तत्त्वम् ॥२७॥

माता च राजसहितेन विमृश्य साधु
पुस्तूनके नरपतिं ह्यथ गोपकं तम् ।
श्रीरागिनाशपुरके हि युयोज योग्यं
तस्माद्धि लिग्लिगजयाय कृतोद्यमोऽभूत् ॥२८॥

राज्यप्रवर्धनदिशि प्रसृतां सुचेष्टां
द्रव्योत्थितां सपदि तज्जननी ह्यवेदीत्–
गर्भस्थितौ किल कनीयस आत्मजस्य
पानीयपानसहितस्य तु तात्विकार्थम् ॥२९॥

कालक्रमेण स हि लिग्लिगकूटगोप्तॄन्
नाम्ना घले इति समैर्विदितान् विजित्य ।
गोर्खा च तेन विजितः कुशलं शशास
भ्राता पुनर्नरहरिश्चकमेऽनुजात्तम् ॥३०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्रव्योऽभवत् किल सदैव विशालतेच्छुस्-
तस्याग्रजश्च बलहीनतयापि लिप्सुः।
युद्धानि तेन रचितानि च सम्बभूवु-
र्माता निजस्य पयसां क्षरतो रुरोध ॥३१॥

तस्यैव वंशविभवे किल रामसाह-
नाम्ना प्रसिद्धिकलितोऽथ च तत्प्रपौत्रः।
गोरक्षसेवनविधौ चतुरश्च वीरः
पत्नी च तस्य गुरुगोरखसम्प्रतीता ॥३२॥

वार्त्तामिषेण स हि तत्त्वविबोद्धुकामस्-
तत्पक्वभोजनविधां विपुलां समीक्ष्य ।
सर्वांश्च रामरचितानपि तान् प्रकारान्
भुक्त्वा न्यलीयत गुरुर्हि तदस्ति वृत्तम् ॥३३॥

श्रीदेविका सकलशक्तिमयी तथात्वे
श्रीगोरखस्य हितकामनया ब्रवीति ।
भोज्यञ्च वस्तु विविधं यदि ते ऽस्ति रुच्यं
दद्याञ्च तानि छलकं विहितं किमर्थम्? ॥३४॥

राज्ञि ! त्वया सह मितं लपनं विधाय
चैशं बलं त्वयि समस्ति हि तेन राम-
साहाय्यकं ह्यपि सदैव तु ते विधेय-
मित्येष मामकछलेऽथ हि चार्थसारः ॥३५॥

साक्षाच्छिवोऽसि वचसां नहि निष्फलत्वं
योगेन चाप्तयशसां विहितोत्तमानाम् ।
तत्रापि देशहितकर्मणि चैकतायै
प्रोत्साहयामि नृवरं क्रियया यतिष्ये ॥३६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देशस्य चैककरणे ननु रामराज्ये
साफल्यचिन्तनतदीयसहायतायाम् ।
धर्मप्रचारण–सुरर्षिसतां सुलब्धौ
मात्स्येन्द्रिधर्मसरितोर्यजनं बभूव ॥३७॥

एतद्द्विवेणितटसम्भवपूजनस्य
गूढार्थता भवति यन्मनसां तु देव्याः ।
आराधनाविधितयैव हि तेन शक्तिः
प्राप्ता भविष्यति तयैव च देशलाभः ॥३८॥

श्रीगोरखोऽपि लसितोऽत्र च लक्ष्मणोऽपि
श्रीदेविकासहितरामनृपो विनेयः ।
देवान् प्रपूज्य मनसामपि पूरिकां तां
श्रीलक्ष्मणःसविनयं विधितः समार्चत् ॥३९॥

सर्वैश्च तैर् ऋषि–सुर–ज्ञवरैश्च सिद्धैः
निर्णीय घोषितमिदं ह्यपि सर्वमान्यम् ।
सच्छासनेन जनदेशहितं विधाता
राजा पराक्रमयुतो हि सदैव जेता ॥४०॥

देशोदयं जनहितं सततं प्रकल्प्य
कोऽपीह नैव भविता सफलःप्रजेशः ।
सर्वेषु मण्डलनृपेषु कृतेश्च वृत्त्या
रामः सदैककरणे प्रभवेन्नरेशः ॥४१॥

राजीयता नरवरेण निरासनीया
सङ्कीर्णता ह्यपि समुत्तमतार्जनीया ।

शौर्येण नागरसहायतया युतेन
स्वाधीनराज्यविभवा अपि वर्धनीयाः ॥४२॥

विद्वज्जनेषु नृपतिः शरदीयचन्द्रो
दुष्टेषु चाथ हि निदाघविभाकराभः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नैजप्रजाहितकृतौ च वसन्तसूर्यः
एवंविधो भवतु राजवरो विशिष्टः ॥४३॥

तत्रागतान् दिविषदो बुधकान् ऋषींश्च
सम्पूज्य वस्तुविषयान् परिचाय्य सर्वान् ।
आशीर्वचांसि च ततः प्रतिलभ्य राजा
सुस्थो बभूव विससर्ज हि चागतान् तान् ॥४४॥

रामप्रिया नहि च केवलराजपत्नी
सा कामनावितरिकाऽखिलभक्तिभाजाम् ।
सिद्धेन लक्ष्मणवरेण च साधितं त-
च्छ्रीगोरखैरनुमतं जनतापि तुष्या ॥४५॥

श्रीदेविका शिवगुरुर्हि च लक्ष्मणोऽपि
तत्स्वस्तये सकलशत्रुविनाशनाय ।
आशीर्वचांसि विदधुश्च हि रामसाहे
तेषां फलोपहितये च जुघोष राज्ञी ॥४६॥

आश्वस्तवान् शिवगुरुः स च सिद्धथापा
सर्वं निधाय हृदि तौ गमने समुत्कौ ।
राजाज्ञया निखिलसिद्धिगुरुर्निलीनः
सिद्धोऽपि लक्ष्मणवरो निलयं जगाम ॥४७॥

कृपोपकाररूपात्मा नेपालानुग्रहो मतः ।
अनुग्राह्यश्च द्रव्यादिरभवद्देशमङ्गले ॥४८॥

इति नेपालगौरवमहाकाव्ये गोरखनाथस्य नेपालानुग्रह इति नामा
त्रयोदशः परिमलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चतुर्दशः परिमलः

रामसाहीया व्यवस्था सिद्धलक्ष्मणविवृतिश्च

पूर्वं जनोपकृतयेऽथ च शोषमुक्त्यै
व्यापारविक्रयक्रियादिषु सत्यतायै ।
माप्यस्य मापननिमित्तकसाधनस्य
चादर्शतां विविधवस्तुषु राम ऐच्छत् ॥१॥

एकादिका गणनसाधनिका तु संख्या
चोच्चाल्य मापकरणार्हतुलादिकं यत् ।
उन्मानकं भवति तद्, परिमाणखारी
लम्बाय दैर्घ्यमितये च भवेत् प्रमाणम् ॥२॥

एवञ्च रामनृवरेण मितौ व्यवस्था
चान्नादिमुष्टिदशकैर्मितमानिकाभूत् ।
प्रस्थस्तदष्टकमितः परिमाणकं तत्
प्रस्थैश्च विंशतिमितैरपि मूरिबोध्यः ॥३॥

एवं विधाय परिमाणपदार्थ–माने
ह्युन्मानसाधनतुलादि च सञ्चचाल ।
हस्तैर्वितस्तिकृतमापनकं प्रमाणं
निर्माप्य साधनचयं प्रचचाल दक्षः ॥४॥

वित्तस्य वार्षिकी वृद्धिर्दशैव शतकादिषु ।
अनन्तेऽपि गते काले द्विगुणान्नाधिका भवेत् ॥५॥

अन्नानां त्रिगुणं लेयं दशकाद्यदि चोत्तरम् ।
ततः पूर्वन्तु द्विगुणञ्चेति रामव्यवस्थितिः ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कूपपानीयभरणे पेषण्यां तिलपेषणे ।
पर्याय:किल सम्पाल्यो वैपरीत्यं न कारयेत् ॥७॥

भूमेः पतित्वदाने च विप्रभूवृत्तितार्पणे ।
चतुर्दिग्लेखसाकञ्च भूमात्रामपि लेखयेत् ॥८॥

गोचराणां सशष्पाणामानुकूल्येन स्थापनम् ।
गवां रक्षा च विप्राणां राज्ञा कार्या विशेषतः ॥९॥

तरवस्तरुमच्चैव धनानि हरितानि नः ।
तरन्ति रोपकास्तैश्च क्षुधस्तापादितोऽपि च ॥१०॥

पानीयमूलरक्षार्थं मार्गेषु तापनष्टये ।
सान्द्रच्छायामया वृक्षा रोप्या पाल्याश्च शासकैः ॥११॥

मधूकवृक्षकैः सान्द्रैः पानीयमूलरक्षणम् ।
कृतमवाप्यते राज्ञां दुर्गेषु सूक्ष्मदर्शिनाम् ॥१२॥

नेपालमूललिग्लीगकूटे चाद्यापि दृश्यते ।
वानप्रस्थद्रुमैः स्रोतो जलस्य परिरक्षणम् ॥१३॥

वानं जलसमूहः स्यात् तस्योत्कर्षेण रक्षणात् ।
मधूको वानप्रस्थोऽभूदर्थानुगुणकश्च सः ॥१४॥

व्यवहारव्यवस्थायै रामसाहप्रवर्त्तिताः ।
इतीमा राजभिरन्यैरपूर्वाः परिपालिताः ॥१५॥

(लक्ष्मणस्य तत्सिद्धेश्च विवृतिः)

श्रीरामसाहसमये तदभीष्टिपूर्त्यै ।
श्रीगोरखस्य कृपया प्रतिलब्धसिद्धिः ।
थापोत्तरो लखन इत्यभिधासनाथो
देवीं प्रपन्नहितदां समराधयद्यः ॥१६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालवृत्तकथने लखनद्वयं चेत्
ज्येष्ठोऽस्ति सिद्धिशिखरोऽवरको हुतात्मा ।
रामस्य योगदवरः प्रथमो बभूव
राणाप्रशासनविकारविरोधकोऽन्यः ॥१७॥

श्रीगोरखस्य समनुग्रहतः प्रबोधात्
सिद्धो बभूव स हि पूर्वज-लक्ष्मणो यः ।
पुष्पादिपत्रचयनेऽपि वनेऽपि नाथस्-
तत्सन्निधौ समवतीर्य ह्युपादिशत्तम् ॥१८॥

मात्स्येन्द्रि-धर्मनदिकाजलयोस्तु वेण्यां
सैवाभवत् यजनकर्मणि मुख्ययष्टा ।
तत्रापि सिद्धिविषयान् ददृशुस्तु लोका-
स्तेनापि रामसहयोगविधिः प्रशस्तः ॥१९॥

सिद्धस्य लक्ष्मणवरस्य च सिद्धिमातृ-
वृत्तद्वयं चरति लोकपथे प्रसिद्धम् ।
तद्भासकं सदसि कारणहीनमेकं
निश्च्योतनं ह्यपरकं निजवासाञ्च ॥२०॥

श्रीपालपानरवरस्य च रङ्गमञ्चे
नृत्यं बभूव रसिकं किल नृत्यदास्याः ।
तत्त्वप्रकर्षसमये गतितारतम्या-
न्नीव्याः श्लथेन स हि तत्र स्थितो जहास ॥२१॥

सुभाषितैश्च गीतैश्च वाद्यैरप्यङ्गनेङ्गनैः ।
गोप्याङ्गेऽगोप्यतां याते मानसं परिवर्त्तते ॥२२॥

विकृताकारवाग्वेशचेष्टाभिः कारणान्तरात् ।
हासः सञ्जायते सद्य एषा प्राकृतिकी स्थितिः ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रृङ्गारे रस्यमाने च द्रुत्या हासस्य कारणात् ।
तस्यानिवार्या सम्भूतिर्जाता वेद्याऽऽनुभावकैः ॥२४॥

तत्रैव लक्ष्मणवरः सदसि व्यराजत्
तत्रोत्थितश्च सहसावरणं पिपीड ।
सभ्या हि तत्र चकिताः सचला बभूबू
रामोऽपि तद्घटनया कुतुकी बभूव ॥२५॥

राजा स लक्ष्मणवरं परिपृच्छति स्म
त्वं राजसंसदि चिराय विमर्शनेऽसि ।
क्लेदस्य वारिविहितस्य न चात्र भूतिः
किंकारणेन तव वस्त्रविक्लिन्नतेति ॥२६॥

श्रीलक्ष्मणो दृढतया तमुवाच रामं
श्रीगण्डकी खलु बबाड अपूर्ववृष्टेः ।
द्रोणी जनैः सुभरिता सहसा न्यमज्ज-
दुद्धारणे समवगाहनतः समार्द्रः ॥२७॥

सर्वैः स्थितस्य सदसीह कथन्तु तत्र
भावो भवेदिति कथं तव कर्त्तृतेति ?
इत्याकुलः प्रतिनिधिं स लिलेख पत्रं
वेलाञ्च मासदिवसौ विशदान् विधाय ॥२८॥

श्रीगण्डकीतटनिवासिनृणान्तु साक्ष्यात्
तद्घट्टके च वसतामपि नाविकानाम् ।
सत्याञ्च तत्प्रतिनिधिर्घटनां विलिख्य
श्रीरामसाहनृपतिं व्यनिवेदयत् सः ॥२९॥

स्थानद्वयेऽपि घटनाद्वयके तु सत्ये
राज्ञा सहैव जनता निखिलापि तुष्टा ।
तेनैव लक्ष्मणवरस्य च सिद्धता हि
देशे बभूव विसृता स च विश्रुतोऽभूत् ॥३०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मन्त्र–योगादिसम्भूताः सिद्धयोऽनेकधा मताः ।
ताभिः सर्वस्य भूतस्य रुतकादि प्रबुध्यते ॥३१॥

तेन पञ्चालदेशस्य ब्रह्मदत्तेन वर्मणा ।
सर्वभूतरुतज्ञानं जातिस्मरणकं कृतम् ॥३२॥

विप्रकृष्टस्य संज्ञानं व्यवधानपरस्य च ।
वरुणात्मजविज्ञातं पुराणे परिकीर्त्तितम् ॥३३॥

वशिष्ठस्य च खे नित्यं गमनं वामने स्थितम् ।
प्रवेशो मण्डले सौरेर्यथार्थः परिवर्णितः ॥३४॥

देवर्षेर्नारदस्यापि ब्रह्मलोकादिप्रापणम् ।
पठ्यते, तच्च योगेन स्वीकुर्वन्ति मनीषिणः ॥३५॥

देवासुराणां संग्रामे सञ्जीवनीप्रसाधकैः ।
असुरैरमृतैर्युद्धं व्यतनिष्ट भयङ्करम् ॥३६॥

अमरा देवता उक्ताः सिद्धाश्च देवयोनयः ।
त्रिकालदर्शिता तेषामृषीणाञ्च सुसम्भवा ॥३७॥

तेन कर्त्तुमकर्त्तुञ्च त्वन्यथाकर्त्तुमित्यपि ।
सिद्धयः प्रभवन्त्येव अनेकत्र स्थितिस्तु का? ॥३८॥

एकस्य तस्य निजगोरखके स्थितस्य
पाल्पास्थितिश्च समकालभवा हि सिद्धया ।
एवं जले प्रवहतामवगत्य रक्षां
तत्सिद्धता सविशदाऽधिगता जनैश्च ॥३९॥

सिद्धतायां प्रसिद्धायां तस्य, रामः प्रहर्षतः ।
आदरान् कुरुते नित्यं सोऽपि रामस्य भक्तितः ॥४०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तौ रामलक्ष्मणौ स्वार्थान् परिहाय परस्परम् ।
मैथिलीमिव देशैक्यं रावणारी इवैच्छताम् ॥४१॥

देवीस्वरूपमहिषीकृतचोदनातः
श्रीगोरखस्य सविशेषशुभाशिषा च ।
सिद्धस्य लक्ष्मणवरस्य च योगदानाद्
रामो व्यवस्थिति–सुनीतिविधौ कृतार्थः ॥४२॥

न्यायश्च देशजनतासु सुशासनार्थं
विद्या प्रकाशयति गोपितबोधधाराम् ।
तद्द्वैतकं भवति वृद्धिमयन्तु राम–
राज्ये च तस्य यशसो लतिकाप्रतानम् ॥४३॥

रामस्य राज्यकालश्च न्यायप्रवणतां गतः ।
विशुद्धव्यवहारश्च यशसस्तस्य वर्धकौ ॥४४॥

न्याये तु हारिते गोर्खा गन्तव्यस्तेन तत्प्रियैः ।
विद्यायां हारितायाञ्च कास्कीति चालितं बुधैः ॥४५॥

मातस्त्वदीयतनयैः समनुष्ठितस्य
एकात्मभावरचितस्य तवोदयस्य ।
वृद्धिं विधाय परनिर्भरतानिरासस्–
त्वद्गौरवाय भवतीति मदीयहार्दम् ॥४६॥

रामसाहव्यवस्थाया विवृतिं लक्ष्मणस्य च ।
विधाय चाग्रिमे सैन्यसम्मानं वर्ण्यते शुभम् ॥४७॥

इति नेपालगौरवमहाकाव्ये रामसाहीया व्यवस्था सिद्धलक्ष्मणविवृतिश्चेति
चतुर्दशः परिमलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पञ्चदशः परिमलः

गोरखनाथगुरूणां सैन्यसम्मानोल्लेखः

विद्वांसं बहुयोगभावनपटुं नेपालभक्त्यास्पदं
गोर्खाभूमिभवं तदेककरणे साहाय्यदं प्रेरकम् ।
तत्कार्ये कृतकर्मराजनिवहस्याऽऽस्वासने सक्रियं
कर्त्तारं ह्यतिमानुषस्य युतितस्तं नौमि नाथं गुरुम् ॥१॥

नेपालीयजनैस्ततो नृपतिभिः सम्मानितौ श्रद्धया
गेहे मानसमन्दिरे पणमये मुद्रान्तरे स्थापितौ ।
तत्पादाम्बुजकौ सदा भवहरौ नेपालसंवर्धकौ
नित्यं तापदरिद्रताशमनकौ स्यातां सदा भाविनि ॥२॥

श्रीश्रीश्रीगुरुगोरखेतिसहितं नाथाक्षरं स्वक्षरं
नेपालीयपरम्परासु सुचलन्मुद्रासु लब्धास्पदम् ।
नेपालस्य जनैर्गुरोरनुगतैस्तद्भक्तकै राजभिश्-
श्रद्धाभक्तिमयेन राधितपदः सोऽव्याद् भुवं मातरम् ॥३॥

सीम्नो मातृभुवश्च रक्षणविधौ सङ्कल्पिताः सैनिकाः
पृथ्वीतोऽपि धुरन्धरा बहुबलाः ख्यातिङ्गता आस्तिकाः ।
नाथं गोरखपूर्वकं हृदयतः सम्पूजयन्तः सदा
कृत्वा नाम दलस्य नाथसहितं तस्यादरान् कुर्वते ॥४॥

श्रीनाथेति पुराणगोरखगणःश्रीनाथनामापरो
नव्यो गोरखनामकोऽथ च परो गोरक्षबक्सोऽपि च ।
श्रीगोरक्षगणः सुरेन्द्रविहितश्चान्यो दलाख्योऽपि हि
श्रीगोरक्षसमादराय विहिता आसन् समाख्या नृपैः ॥५॥

एवं मानव–राज–सैन्यविभवो नेपालरक्षापटु–
र्नित्यं तस्य हिताय शौर्यनिधये जागर्त्ति योगेन यः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रेष्ठो योगिजनेषु शैवविभवः कालोऽपि भीतो यतः
सर्वाङ्गीणसमादरेण लसितः सोऽव्याद् भुवं सैनिकान् ॥६॥

षट्कोणः शिवहेतिमान् शरमयश्चापश्च सन्नद्धकः
श्रीविष्णोः कपिशेखरस्य सुदृढा शत्रुञ्जया सद्गदा ।
नेपालस्य भुवोऽधिदेवगिरिशस्याढ्यञ्च सन्मन्दिरं
चिह्नं वाहिनिवर्त्तितं भवति तद् धर्मात्मतासूचकम् ॥७॥

देवीभक्तिसनाथितं हृदयतस्तत्पूजने सक्रियं
प्रत्येकस्य गणस्य प्राङ्गणगतैः सन्मन्दिरैश्शोभितम् ।
पूजायां पठितैः श्रुतिस्मृतिगतैर्मन्त्रैः स्तवैः पावितं
सैन्यं शक्तिमयं प्रसिद्धिचणकं नैपालकं तन्नुमः ॥८॥

धर्माधीनतया समैरपि सदा चाथर्याश्च तेऽर्थाः सदा
कामानामपि पूरणे जनिमतां जागर्त्ति तद्वश्यता ।
धर्मप्राणतयैव सैन्यनिवहो जेगीयते सर्वशस्-
तन्नेपालभवं स्वकर्मनिरतं भूयादजेयं सदा ॥९॥

दुर्गाः पर्वमया लसन्ति गिरयः सूच्चावचा भूरिशो
नेपाले, जननं ह्यवाप्य शिशवः सङ्कूर्दनेऽभ्यासिताः ।
सेना स्वामिहितङ्करा निजकृतौ बद्धादरा वेगिनी
नेपालस्य शिलोच्चया इव सदा विश्वासभूमिङ्गता ॥१०॥

विश्वासेन सदैव वृत्तिदवरैराज्ञापिते वर्त्तनात्
प्राणान् मृत्युसमीपगानपि सदा दृष्ट्वापि लक्ष्ये रतः ।
देशेऽथापि परस्य देशविषये रक्षाविधौ पाटवान्-
नेपालेऽथ च विश्वसैन्यनिवहे सिंहायिता नश्चमूः ॥११॥

राजा भवति चेनो हि तेन याति सहैव या ।
सा सेना चोच्यते नित्यं देशरक्षाप्रसाधिका ॥१२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रमे शास्त्रे च संलग्ना बुद्धिः सर्वार्थसाधिका ।
वीरा प्रसिक्षिता सेना स्वामिनां विजयप्रदा ॥१३॥

प्रकाराः सन्ति सेनायाः पुराणेषु षडेव हि ।
पदाती रथमारूढा गजाश्वारोहिणस्तथा ॥१४॥

मन्त्राः सिद्धाश्च निधयोऽप्रमादव्ययनाथिताः ।
स्वामिनां जयदाः सर्वे रिपूणां मानमर्दकाः ॥१५॥

मन्त्रैः सिद्ध्या च गोरक्षो सेनानां विजयप्रदः ।
नित्यं सेनासु वर्त्तेऽहमिति योऽभूत् प्रवाचकः ॥१६॥

विश्वास–वीरताभ्यासैः साकं मन्त्राभिशंसनात् ।
गुरुगोरक्षनाथोऽयं नेपालसैन्यपूजितः ॥१७॥

राष्ट्र–राष्ट्रियता–सार्वभौमसत्ताः सुरक्षितुम् ।
नेपाले वीरनेपालीसेना जागर्त्ति सर्वदा ॥१८॥

चीनतिब्बतदेशौ च पराभूतौ पुरानया ।
मीरकासिम किन्लक् च शस्त्रं त्यक्त्वा पलायितौ ॥१९॥

विदेशेष्वपि सेनेयं शान्तिकार्ये प्रयोजिता ।
तत्रापि शौर्यसम्पत्तिस्तया साधु प्रदर्शिता ॥२०॥

तत्तद्देशीयसेनाभिर्दुर्जयं यद्धि योधनम् ।
तत्र सर्वत्र नेपालीसेना विश्वे प्रयोजिता ॥२१॥

ब्रिटेनदेशराज्ञ्या च फक्ल्याण्डे विजयाय हि ।
उच्चावचेषु कुशला वीरगोर्खाःप्रयोजिताः ॥२२॥

विजित्य तद्भवं सैन्यं वीरगोर्खालयाश्च ते ।
फक्ल्याण्डं ब्रिटिशाधीनं कूर्युर्मोदावहं द्रुतम् ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्तद्युद्धेषु गोर्खाभिः शौर्यं सम्यक् प्रदर्शितम् ।
अतुल्यं साहसञ्चापि राज्ञ्या सर्वं विभावितम् ॥२४॥

प्रथमे विश्वयुद्धे च भिक्टोरिक्रसनामकम् ।
पदकं गौरवायत्तं सैनिकाभ्यां समर्पितम् ॥२५॥

द्वितीये विश्वयुद्धे च शौर्याद् गोर्खाप्रदर्शितात् ।
सैनिकं पदकं प्रत्तं दशभ्यो मानवर्धकम् ॥२६॥

मिलिटरीक्रसाख्यं तद् विश्वजेत्रा प्रकल्पितम् ।
उत्कृष्टशौर्य-कर्त्तव्यनिष्ठाभाग्भ्यः प्रदेयकम् ॥२७॥

पाक-भारतयुद्धे च नेफा-लद्धाकयोरपि ।
पाकं विजित्य सेनेयं तुतोष भारतं भुवम् ॥२८॥

वीरगोर्खेति याथार्थ्यान् निष्ठाविश्वासभाजनात् ।
आदरातिशयेनैव प्रार्थ्यन्ते सैनिकाः समैः ॥२९॥

जालियाबागकाण्डेऽथ विद्रोहे चावधस्य च ।
नेपालीसेनया शौर्यं चोपकार्येषु दर्शितम् ॥३०॥

अनेन त्रितयं जातमुपकारः प्रशंसनम् ।
वीरगोर्खालयानाञ्च देशो नेपाल इत्यपि ॥३१॥

देशरक्षासुशान्तिभ्यां प्रकृतेः कोपशामनम् ।
विकासकार्यसम्पत्तिर्नेपालसैन्यकीर्त्तिदम् ॥३२॥

यातायातस्य सारल्यं सन्मार्गेषु प्रतिष्ठितम् ।
तथ्येनानेन मार्गाणां रचनायै प्रवर्त्तितम् ॥३३॥

द्रुतमार्गादिमार्गाणां दुर्गस्थानां विनिर्मितिः ।
सेनाभिर्विहिता चास्ति चापि सम्पत्स्यमानता ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

युद्धे चोद्धारकार्येषु दुर्गमार्गादिनिर्मितौ ।
अप्रतिहतता सैन्ये नेपालीये विलोकिता ॥३५॥

देशैकीकरणे कृतोपकरणैर्भूपैश्च पृथ्वीवरैः
श्रीनाथेति गुरोश्च सूचकतया ज्येष्ठो गणः स्थापितः ।
योऽभूत्कम्पनिनामितः शतजनैः संस्थापितः सायुधै-
र्यस्यादर्शमयं त्वभूत्पदमयं 'नेपालकं गौरवम्' ॥३६॥

खिष्टाब्दे नयनर्त्तुलोकविधुके (ई. १७६२) ज्येष्ठो गणश्चाजितै-
रस्त्रैः साधुभुशुण्डिभिर्लसितवान् तच्चालने शिक्षितः ।
शत्रूणां भयवर्धनं विहितवान् गोरक्षरक्षाबला-
देकत्वस्य विरोधिनोऽथ च परे भीता मदाच्च्याविताः ॥३७॥

श्रीनाथीयगणस्य वैभवमयं यल्लक्ष्यकं गौरवं
तद्ध्येकीकरणेन देशविभवे सम्वर्धनाद्विस्तृतेः ।
अर्थानां स्थितिवर्धनादथ जितस्थानस्य संरक्षणात्
साफल्यं ह्यधिगम्यते शुभमयं कुर्वन् तथा दृश्यते ॥३८॥

स्वस्यालम्बनतासुरक्षणविधौ मार्गादिसम्पादने
वासोऽन्नादिसमर्जने बहुविधे शिक्षाप्रशिक्षादिके ।
राष्ट्राणां निधिभूतसङ्घकृतये शान्त्यै गतोऽयं गणः
स्वस्योद्देशसमर्जने कृतपदो नाथाशिषा लोक्यते ॥३९॥

श्रीगोरक्षगणः पुराण इति यः पृथ्वीनृपैः स्थापितः
खिष्टाब्दे गुणरत्नलोकविधुके (ई.१७६३)देशे हि भक्त्यान्वितः ।
मीरात्कासिमकात्तदीयपृतनाजित्या समालम्भितै-
रस्त्रैःसाधुभुशुण्डिभिर्ह्यपि शतघ्नीकद्वयेनाञ्चितः ॥४०॥

श्रद्धामर्पयितुं गुरौ युतियुते सर्वक्षमे गोरखे
नामैतद्ध्यभवत् बलस्य नृपतेः श्रीगोरखाकम्पनी-
अन्यन्नाम बभूव तस्य विदितं चादर्शवाक्यं त्विदं
'स्वर्गादुत्तमता सदैव जननीजन्मप्रदोर्व्योर्मता' ॥४१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मातुर्जन्मभुवश्च कीर्त्तिलतिका शास्त्रेषु संख्यापिता
संसारे व्यवहारवर्त्मनि तयोर्जन्तूपकाराग्रता ।
संसेव्या जननी च जन्ममहिका चेत्यादरात्सैन्यपो
लक्ष्ये सूचनतत्परं विहितवानादर्शवाक्यं त्विदम् ॥४२॥

उत्पत्तया स्तनपानमूत्रशमलात्संरक्षणाद्वुगततेः
माता सर्वजनेषु लोकमहिता तत्सेवनं लक्ष्यकम् ।
सर्वाधारमयी समुन्नतिविधौ क्रीडाङ्गणा जन्मभूः
रक्ष्ये द्वे अपि सैनिकैरिति धिया चादर्शता स्थापिता ॥४३॥

नाथाख्यस्य गुरोः स्मृतौ सुविहितः श्रीगोरखीयो गणः
कासीमाद्विजितैर्निजैश्च सहितैश्शस्त्रैरथास्त्रैर्युतः ।
सत्स्वाम्येन मनोबलेन तपसा चाभ्यासतो निष्ठया
शत्रूणां भयवर्धनं विहितवानन्यान् वशे नीतवान् ॥४४।

श्रीनाथस्य कृपाबलादथ निजे शौर्यातिरेकादपि
नैज्या जन्मभुवः समेककरणाद्विस्तारणाच्छौर्यतः ।
मातुर्मातृभुवश्च गौरवधनं सम्पूर्य तत्सैनिकै-
र्नैजादर्शसुवाक्यवैभवमिदं सार्थक्यमापादितम् ॥४५॥

पृथ्वीपौत्रवरेण श्रीरणबहादूरेण नव्यो गणश्-
श्रीनाथेति समाख्यया सुघटितो बाणेभलोकेन्दुके (१७८५ ई.) ।
तस्यादर्शमयं त्विदं समभवज् 'जीवन् मृतोऽसौ भवेन्
मृत्सा येन च विस्मृता जनिभुवः' कार्त्तज्ञ्यभावात्ययात् ॥४६॥

स्वार्थेनान्धतया क्रियाविरहतः कर्त्तव्यनिष्ठात्ययाद्
यैर्यैर्मातृभुवः सदैव विहिता दुर्भाग्यतो हेलनाः ।
सामान्येन जनेन सैनिकजनैराधिक्यतो रक्षकैः
ते वै साधु मृताः समेऽप्यकृतिनः प्राणैः श्वसन्तोऽपि च ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आदर्शात्मपदीयसंहतिमयेनानेन तत्सैन्यकं
सोत्साहं ह्यतिशौर्यतः समुचितं शस्त्रास्त्रयुक्तं दृढम् ।
देशे पश्चिमभूमिभागविभवं द्रुत्यार्जयन्निष्ठया
शक्त्या काँगडनामकं विजितवद् भागान् जितान् रक्षयत् ॥४८॥

देशा भूमिमयाः सिताश्च शिथिलं सीमासुदाम्ना पुरा
भूवृद्धिं व्यदधच्च साधुगणको लक्ष्यं सुरक्षामपि ।
तत्त्वं पूर्वभवं विधाय कृतिमान् तस्योदये सक्रियो
मृत्सां मातृभुवः सिसेव क्रियया स्वप्नेऽपि नोपैक्षत ॥४९॥

नव्यो गोरख इत्यनेन च रणेनेनेन संस्थापितः
ख्यातो गोरखनाथसंस्मृतितयाऽजेयोऽत्र वर्षेऽथ च ।
अस्यादर्शमयं बभूव 'सततं हेमाद्रिवच्चोच्चता
ह्याटल्यञ्च क्रियासु सैनिकजने' देशोन्नतौ सर्वदा ॥५०॥

औन्नत्यं हिमवद् गिराविव सदा लक्ष्ये न विश्रामता
देशोत्कर्षविधौ जनैरपि समैः सैन्यैः समालम्बनम् ।
अत्यावश्यकतां बिभर्त्ति धरणावित्यस्य विज्ञातृभि-
र्लक्ष्यं साधु विभाव्य घोषितमिदं कार्यं तथा कारितम् ॥५१॥

राज्ञा श्रीरणकेन गोरखगुरौ श्रद्धातिरेकेण च
आशीर्वादसुमानि देशविजये लब्धुं ह्यमोघानि च ।
नेत्राङ्कर्षिविधौ (१७९२ई.) च खृष्टलसिते वर्षे च तद्गोरख-
बक्सेत्याख्यया कृतश्च गणको वीराञ्चितो दुर्जयः ॥५२॥

योद्धुं तिब्बतदेशकेन घटितो जेताऽभवत्तत्र हि
भूमेर्दुर्गमतानिरासनविधौ कष्टानि चालिङ्ग्य च ।
देशं रक्षितवान् दृढेन तपसा सेवाधनेनापि च
तेनादर्शमयं त्वभू'ज्जनिभुवः सेवैव सत्यं तपः' ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीगोरक्षवरेण दत्त इति तत्तात्पर्यभाक् वैरिहा
पूर्वं कम्पनिरूपतां समभजदग्र्यो विजेता गणः ।
सिद्धाशीर्वचनेन कर्मणि रतेर्दुःखेऽपि कर्मस्थितेश्-
श्रेष्ठः सैन्यगणेषु दुर्गमतमे युद्धैरभूत्सद्यशाः ॥ ५४॥

भूपैश्चापि सुरेन्द्रवीरकृतिभिः सिद्धौ सदा श्रद्धितैः
खिष्टाब्दे युग-बाणसिद्धिविधुके (१८५४ई.)श्रीगोरखेत्याख्यया ।
अन्त्ये नाथजुषा, प्रसिद्धिगमितः संस्थापितः सद्गणो
यस्यादर्शमयं हि 'सत्यबलतः सेवामहे भक्तितः' ॥५५॥

सत्यं देशहितं समैरपि सदा कर्त्तव्यता नीयते
सैन्यैर्देशसुरक्षणे कृतपदैर्नित्यञ्च तत्पाल्यते ।
भक्तिर्नाम निजस्य भूमिविषया पुष्टानुरक्तिर्मता
द्वाभ्यां साधु सुसज्जिता च पृतना जित्वा परान् मोदते ॥५६॥

खृष्टे शून्यवसुद्वयेन्दुलसिते (१८८०ई.) तेनैव तन्नामत
एकं श्रेष्ठदलं विधाय बलवत् सेनाथ सज्जीकृता ।
योगाचार्यगुरौ हि भक्तिसहिता श्रद्धा पुरःस्थापिता
'वीरा एव सदामरा' इति दृढा चादर्शता घोषिता ॥५७॥

जन्तौ नाशवशंवदेऽपि गणको रक्षन् मृतश्चेद्रणे
कीर्त्या जीवति, देहतो हि मरणं स्वर्गे मुदा राजते ।
वीरास्तेन सदामरा इति बलं प्रत्याययन् युक्तिभिश्-
श्रीगोरक्षदलं विधाय मतिमान् राजा सुरेन्द्रायते ॥५८॥

खिष्टाब्दे निधियुग्मलोकविधुके (१७९९ई.) गीर्वाणनामा नृपः
श्रीशार्दूलगणं व्यधत्त मतिमान् श्रीसम्पदो रक्षितुम् ।
पश्चाद् गौरवसैन्यतां समभजत् तद्रक्षणादौ रतं
तेनैतद् गुरुपल्टनेति कथितं तद्गौरवीस्मारकैः ॥५९॥

तस्यादर्शमयं त्विदं समभज् 'जातोऽमरः सर्वदा -
मृत्सां संस्मरतीह यो हि मनसा तत्राऽऽनुकूल्ये रतः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शार्दूलेन समः स गौरवगणश्श्रीसम्पदां रक्षकः
प्रासादानथ धर्मसंस्कृतिसभाः संरक्षयन् राजते ॥६०॥

एवं सैन्य–नरेश–नागरजनैः संस्थापितो मानसे
श्रद्धापुष्पसमर्पणेन महितश्श्रीगोरखो योगिराट् ।
योगैरभ्युदयश्च मुक्तिसहितः प्राप्तो यथा स्याज्जनै–
स्तादृक् मानवरः प्रदेय इति मे विज्ञापना देशतः ॥६१॥

असत्सु चित्तस्य हि वृत्तिरोधको
धनस्य सत्स्वास्थ्यततेश्च वर्धकः ।
गुरोः कृपातः प्रभवेद्धि योगकः
सदैव नेपालयशो विवर्धकः ॥६२॥

शिवोऽस्ति पूर्वः खलु योगदेशिकस्–
ततो द्वितीयश्च हि योगिगोरखः ।
उभौ हि नेपालभवौ यथार्थतस्–
ततः प्रवृत्ताय च योग ते नमः ॥६३॥

शङ्करः शङ्करोऽस्माकं योगस्य परमो गुरुः ।
नटराजतया ख्यातो योगाप्तशैत्यशातनः ॥६४॥

तत्प्रयोगपटुर्नाथस्तदभ्यासेन सिद्धिमान् ।
लोकोपकारितां यातः सिद्ध्या इन्द्रादिशासनः ॥६५॥

हिमालये वसन् शर्वः सञ्जीवनीसहोदरः ।
गोरखावसतिर्नाथो योगशक्तिमहोदयः ॥६६॥

उभौ तौ लोकनैरुज्यवर्धकौ परमौ मतौ ।
महादेवतया शर्वः पूजितो न हि गोरखः ॥६७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शर्वाय पार्वती दत्ता पूजा रुद्राभिषेकतः ।
जनोपकारकर्त्रे च योगिने न हि किञ्चन ॥६८॥

नेपालमातृको नाथो योगसिद्ध्योः प्रचारणात् ।
अस्मद्राष्टस्य सम्पत्ति र्विभूतिः स मतो भवेत् ॥६९॥

सुगतो गोरखः पृथ्वी भानुरादिकविः पुनः ।
त्यागस्वरूपिणी सीता मातस्ते गौरवप्रदाः ॥७०॥

सर्वेऽपि क्रियया ख्याता नेपालख्यातिवर्धकाः ।
विभूतित्वे मते तेषां तन्मन्तुरेव गौरवम् ॥७१॥

इति नेपालगौरवमहाकाव्ये श्रीगोरखनाथगुरूणां सैन्यसम्मानवर्णनं नाम
पञ्चदशः परिमलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

षोडश : परिमलः

पृथ्वीनारायणस्तत्कृतनेपालैकीकरणवर्णनञ्च

नरभूपालसाहोऽपि नर-भू-पालकोऽभवत् ।
द्रव्यतो दशमो राजा, देशस्यैक्यं समीहिवान् ॥१॥

धार्मिकस्तापसो राजा जपपूजादिसक्रियः ।
पुरश्चरणकर्माणि श्रद्धया कृतवान् सदा ॥२॥

काल्या जपक्रियां कुर्वन् होमेन सह तर्पणम् ।
अभिषेकञ्च, विधिना कारयामास भोजनम् ॥३॥

तत्तपस्याप्रभावेण तज्जुष्टं खादतां किल ।
कुष्ठादयोऽपि निर्मूला अजायन्तेति विश्रुतिः ॥४॥

नित्यं पूजयता तेन तत्प्रसादसुमान्यपि ।
उत्तमाङ्गे ह्यधार्यन्त पापानां नोदनाय च ॥५॥

तद्धारितानि पुष्पाणि शिरःशूलवता यदि
धार्यन्ते स च तच्छूलान्मुच्यते तत्प्रभावतः ॥६॥

प्रयासान् विदधानोऽपि पूर्वान् जेतुं परानपि ।
नाशकद् यत्नशीलोऽपि स्वप्नेनापि तदिङ्गितम् ॥७॥

तदर्थं चापि पुत्राणां जनिरावश्यकी मता ।
तल्लब्धौ गुरुदेवानामाशीर्वादा अभीप्सिताः ॥८॥

नरभूपालराजस्य चतस्रो राज्ञिकाः स्थिताः ।
द्वितीया तासु कौशल्यानुमिता वीरसूतये ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तयैकदा हि सूर्यस्य बिम्बं स्वप्ने निगीरितम् ।
ब्राह्मे मुहूर्त्ते चेत्यस्मादपि वीरप्रसूतिता ॥१०॥

प्रारब्धात् सत्कृतेश्चापि सगर्भा साऽभवच्छुभा ।
स एव गर्भश्चोत्पत्तौ नेपालैक्ये फलायितः ॥११॥

कौशल्यासुप्रजा राम यथा रावणनाशनः ।
अभूच्चाऽनेकताहन्ता कौशल्येयोऽधुनातनः ॥१२॥

सूतेः स्थानं निजनिलयके सर्वसौलभ्ययुक्तं
रम्ये कूटे विविधवसुमज्ज्ञानविज्ञानयुक्ते ।
कैलासाख्ये विरचितमभूत्, कालिका-नाथदत्ता
आशीर्वादाः खलु विजयिनो यत्र नित्यं चरन्ति ॥१३॥

एकोनाशीत्यधिकशतके वैक्रमे सप्तदश्ये
पौषे दर्शे ह्यभिजिति सुभे गौरवे रात्रिकायाम् ।
कौशल्याया उदरविभवादाप्तभूपालबीजाद्
देशस्यैकीकरणकृतये सप्तमे मासि जज्ञे ॥१४॥

सौम्याकारं ह्यविकलवचोविग्रहं चावलोक्य
कौशल्याम्बा-जनकनरभूपालकौ हर्षतः स्म ।
प्रासादीया हित-परिजना वैद्यकाः पण्डिताश्च
आशीर्वादैः शुभकथनतो जात-तातान् ननन्दुः ॥१५॥

निर्धूमोऽग्निर्हर्युदवसितके चत्वरे चोर्ध्वज्वालो
वायुर्वातः सुरभिसहितः प्राणने सन् सहायः ।
सर्वाकाशं त्वडुविलसितं शान्तभावेन कान्तं
काष्ठाश्चासन् प्रगतिसरलाः सर्वमाङ्गल्यमय्यः ॥१६॥

संस्कारेषु प्रचुरमतिमान् जातकर्मादिकृत्यं
वित्तौदार्याद् विधिविपुलतः श्रद्धया साधु चक्रे ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भाग्योन्नत्यै निजजनिभुवश्चैकभावेन वृद्ध्यै
भालोल्लेखप्रचुरपटुका षष्ठिका तेन चेजे ॥१७॥

नामकरणसंस्कारः सर्वेषु व्यावहारिकः ।
व्यावृत्तिर्व्यवहारश्च स्वभीष्टिस्तत्प्रयोजनम् ॥१८॥

पृथक्करणकार्यञ्च व्यवहारप्रवर्त्तनम् ।
अभीष्टा प्रतिपत्तिश्च नाम्नः कृत्यं बुधैर्मतम् ॥१९॥

अत्र कर्मणि देवानां गुरूणाञ्चापि पूजनम् ।
हवनञ्चापि सञ्जातं देवा हव्यभुजो यतः ॥२०॥

एवं विभाव्य विद्वद्भिर्नाम जातस्य कारितम् ।
पृथ्वीनारायणो ह्यस्या जगत्या ईशवाचकम् ॥२१॥

एकीकृते च नेपाले पृथिवीपदवाच्यता ।
तत्र नारायणो बोध्यस्तद्वाच्य इव नायकः ॥२२॥

कलावन्नगताः प्राणा इति तथ्यं विचार्य हि ।
यथाकालं विधानेन चान्नप्राशनकं कृतम् ॥२३॥

अन्नाशनेऽपि बालस्य पयो मातुर्न हीयते ।
शिशोर्वृद्धौ हि दुग्धस्य चाल्पत्वात्तद्विधीयते ॥२४॥

विचार–व्यवहाराणां शुद्धये शुद्धभोजनम् ।
बल–बुद्धिविकासार्थं शिशोः सर्वं व्यवस्थितम् ॥२५॥

राज्ञां सैन्यजनानाञ्च कृते मांसौदनं हितम् ।
इत्येतद् दृश्यते स्वाथ्यशास्त्रे चेति मतान्तरम् ॥२६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पयश्शाकमयं श्रेष्ठं तैलाक्तं मध्यमं मतम् ।
भोजनं पलमूलन्तु चाधमं मुनिगर्हितम् ॥२७॥

संस्कारेऽत्र कुमारस्य खेलसाधनकान्यपि ।
दर्शितानि यथोक्तानि भाविनः सूचकानि च ॥२८॥

कृपाणग्रहणे बालः सहसा संप्रवृत्तवान् ।
तेन भाविनि तद्योगात् साफल्यमन्वमीयत ॥२९॥

एवमन्ये च संस्कारा योग्यताधायकाः समे ।
कालेन श्रद्धया राज्ञा विहिताः स्वार्भकोदये ॥३०॥

संस्कृतो भविता जातो नाशयन् बल–बुद्धिभिः ।
शुक्लपक्षस्य शुभ्रांशुस्तिमिरं भागतामिव ॥३१॥

वर्षषट्कोत्तरो बालः क्रीडमानो गुरोर्गुहाम् ।
एकदा चाप्तवान् तञ्च दृष्टवान् कृतसाधनम् ॥३२॥

गोरक्षो निकटे बालं दृष्ट्वा चादिष्टवान् मुदा ।
याचित्वा मातरं नैजीं दध्यानय सुतर्पणम् ॥३३॥

कुमारेण च गत्वा तां, तदर्थं दधि चार्थितम् ।
नव्यं सान्द्रं ददौ राज्ञी काष्ठिकारचितं मुदा ॥३४॥

दाने मुक्तकरा राज्ञी दधिकाष्ठ्यन्तराणि च ।
बालाऽवाह्यतया नादात् गुरुदेवार्चनारता ॥३५॥

बाल एकल एवेहि गुरवे दधि चार्पय ।
न ह्यसौ योगिमात्रश्च सर्वदो भगवान् हि सः ॥३६॥

उत्कर्षः साहवंशस्य तदायत्तश्च पूर्वतः ।
अनुग्रह इतोऽपि स्यात्तत्र सावहितो भव ॥३७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुश्रूषुणा त्वया नित्यं नतेन च सुधीमता ।
सिद्धेन गुरुणा प्रोक्तं सर्वं वत्सानुपाल्यताम् ॥३८॥

न्यायिना श्रमशीलेन प्राप्तानुग्रहतस्त्वया ।
परास्य भाजकान् सर्वानेकतां साधु लप्स्यसे ॥३९॥

सामान्यजनसम्पत्तिर्यथा पुत्रेषु भाज्यते ।
न तथा देशसम्पत्ती राज्ञा भागाय कल्प्यते ॥४०॥

सपादलक्षराष्ट्रस्य काश्मीरात्पूर्ववर्त्तिनः ।
परस्य कामरूपाच्च भित्तानि विहितानि तैः ॥४१॥

राष्ट्रमेकं विशालञ्च बहुखण्डेषु भक्तकम् ।
क्षुद्रकैर्विहितं दृष्ट्वा दीर्यन्ते हृदयानि नः ॥४२॥

बृहदाकारतो ह्रस्वे चाकारे गमनं बत ।
देशीयं दुःखदं मन्ये स्वाङ्गच्छेदसमं हि तत् ॥४३॥

तस्य शासकनिन्द्यस्य चातुर्यं नहि शासने ।
यस्य दीर्घस्य राज्यस्य खण्डनं पुरतो भवेत् ॥४४॥

अङ्गच्छित्त्या च छिन्नस्य पीडाऽशक्तिद्वयं भवेत् ।
देशच्छेदे तु सर्वेषां तेनाधिः सह जायते ॥४५॥

ह्रस्वकै राष्ट्रकल्पैश्च स्वस्वातन्त्र्यं न रक्ष्यते ।
वैदेशिकैश्च सर्वाणि विजितानि भवन्ति वै ॥४६॥

भौगोलिकमहत्त्वञ्च स्रोतोवत्त्वञ्च प्राकृतम् ।
स्वावलम्बश्च समृद्धिः प्राज्ञता गौरवेहितम् ॥४७॥

सर्वस्मिन्नेकतां याते बलमेकं बलिष्ठकम् ।
सहसा न पराजेतुं शक्यं विस्तारवादिभिः ॥४८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एकीकृतश्च यष्टीनां समूहो न च भाज्यते ।
बलिनापि च भो बाल देशैक्यं विद्धि तादृशम् ॥४९॥

एवमेकस्य राष्ट्रस्य चावश्यम्भावितां हृदि–
धृत्वा त्वं वत्स चेष्टस्व तदर्थं बलमर्जय ॥५०॥

पित्रंशवदविभागाच्चीनभारतरूसकाः ।
विशालास्तारतम्येऽपि तावको ह्रस्वकः कृशः ॥५१॥

राज्यानि क्षुद्रकैः सत्यं बहूनि विहितानि च ।
पित्रंशवद्धि भो वत्स त्वया चैको विधास्यते ॥५२॥

एकीकरणकार्यस्य मण्डलेशा विरोधिनः ।
साशिर्बलप्रयोगेण जेतासि त्वं न संशयः ॥५३॥

अतस्त्वं बलबुद्धिभ्यां कूटनीत्या शुभाशिषा ।
देशैकीकरणे योग्यो भवितासि तदर्जय ॥५४॥

खण्डराज्यस्य चेशास्ते न दास्यन्ति स्वशासितम् ।
एकीकरणकार्याय बलेन स्यात्तदर्जनम् ॥५५॥

क्षुद्रस्वार्थैश्च देशस्य स्वार्थो नैवावचीयताम् ।
तथा चेद् यदि केनापि विहितं स हि दण्ड्यताम् ॥५६॥

राष्ट्रस्वार्थो विकासश्च तत्सीम्नः साधुरक्षणम् ।
स्रोतसामुपयोगश्च स्वावलम्बः सुशासनम् ॥५७॥

आत्मना सह प्रेष्याणामेकतायै प्रवर्त्तनम् ।
आशिषां सहकारित्वं घटते फलने ध्रुवम् ॥५८॥

पित्रादिपूर्वजैश्चापि देशैक्ये यतितं पुरा ।
बलाल्पत्वेन भो बाल! न लक्ष्ये ते फलायिताः ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति मातुर्यथार्थोक्तिं मनसा साधु धारयन् ।
मनस्वी चतुरः पृथ्वी दधिपात्र उपेयिवान् ॥६०॥

पत्राणां पुटकं गृह्णन् प्रतीक्षायां गुरू रतः ।
बालो गत्वा ददौ तस्मै दध्ना पूर्णं ह्यमत्रकम् ॥६१॥

पत्राणां पुटके न्यस्य दध्याश योगिशेखरः ।
तच्च बालाञ्जलौ वान्तं पिबैतदिति चोक्तवान् ॥६२॥

घृणया नापिबद् बालो योगी शक्त्या ह्यपाययत् ।
परं बालप्रतीकारात् पादयोः पतितं समम् ॥६३॥

वान्तं यदि त्वया पीतमुक्तं सर्वं यथार्थताम् ।
गच्छेत्; तत् पतितं पादे हिण्डितं तेन तावकम् ॥६४॥

इति गोरखनाथेन चाशिषा स हि नाथितः ।
तव सैन्येषु मद्वासो भवितेति स चाश्वसत् ॥६५॥

देशैकीकरणे त्वत्के प्रयाणे बलसंयुते ।
वृष्टिश्चेद् यदि जायेत मत्सत्ता तत्र बुध्यताम् ॥६६॥

तमनुगृह्य गोरक्षः स्वगुहायां प्रविष्टवान् ।
कुमारोऽपि निजं सौधं गत्वा सर्वं न्यवेदयत् ॥६७॥

बालवृत्तान्तजातेन पितरौ सम्प्रहर्षितौ ।
देशैकीकरणं भावि चेति निर्णीतिनाथितौ ॥६८॥

एकतो बालवृत्तान्तात् प्रासादे हर्षवर्षणम् ।
अन्यतश्चाभवत्खेदो जुष्टगव्यनिषेधनात् ॥६९॥

पृथ्वीनारायणस्तत्कृतनेपालैकीकरणवर्णनञ्चेति षोडशः परिमलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सप्तदशः परिमलः

पृथ्वीनारायणस्योपनयनविवाहादिवर्णनम्

पृथ्वीनारायणो बालो व्रतबन्धोपयुक्तकः ।
पठितो विनयी तीक्ष्णश्श्रद्धाभक्तिसमन्वितः ॥१॥

उपनेयः स बालश्च तदर्थं मैदिकास्थलम् ।
पवित्रं देवजुष्टञ्च नीयते स्मोपमिश्रकम् ॥२॥

नैरन्तर्याय मिश्राणां दीक्षायाः स्थाननिर्णयः ।
देवालयादिजुष्टत्वादिति चापि विदां वराः ॥३॥

नरभूपालसाहस्य मानस्या व्यथयाऽथ च ।
गौरेश्वरोपदेष्टृत्वं गायत्र्याः परिशङ्कितम् ॥४॥

बालकस्योपनयनं गायत्रीश्रावणं तथा ।
गुरुःश्रीहर्षमिश्रो हि कृतवान् दीक्षया समम् ॥५॥

गुरुर्गौरेश्वरश्चैतत् स्ववृत्तेरपहारकम् ।
मत्वा रुष्टश्च तद्राज्यं त्यक्तुं तत्र जुघोष च ॥६॥

उच्चलक्ष्यस्य संप्राप्त्यै संग्रह इति तथ्यतः ।
पुत्रान्तराणि सन्दर्श्य राज्ञ्या ते हि प्रसादिताः ॥७॥

यथार्थज्ञानदातृत्वात् पशुभावस्य नाशनात् ।
वटवोऽन्ये च दीक्ष्यन्ते एषास्माकं परम्परा ॥८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पापस्य मोचनं तेन गुणाधानञ्च जायते ।
इति याथार्थ्यभावेन गायत्रीं श्राव्यतेऽर्भकः ॥९॥

गायत्रीपदवाच्यस्य 'गायन्तं त्रायते' इति ।
विग्रहं सम्प्रदर्श्यापि श्रद्धा तत्राङ्कुरायिता ॥१०॥

सन्ध्याद्वयेऽपि सावित्रीं जपतस्तस्य श्रद्धया ।
धिषणा स्फीतिमापन्ना लोके शास्त्रेऽपराहता ॥११॥

गुरवो धर्मशास्त्राणि नीतिशास्त्राणि यत्नतः ।
राजकृत्यानि सोत्साहं नियतं पाठयन्ति च ॥१२॥

तत्तद्विषयवस्तूनां बोद्धा चोत्साहवाँश्च सः ।
जिज्ञासते स्म विषयान् पृष्टान् क्षिप्रं प्रवक्ति च ॥१३॥

वयसा सह चोद्योगः सत्कार्येषु प्रवर्धितम् ।
बुद्धिमत्त्वञ्च शूरत्वं तेजस्वित्वं नृपार्भके ॥१४॥

शिक्षया सह कूटा च नीतिरभ्यासिता पुनः ।
मातृमातुलवर्याभ्यामेकतायै हितावहा ॥१५॥

चन्द्रप्रभेति विख्याता कूटनीतौ विचक्षणा ।
माता ज्येष्ठा स्वमातुश्च पितृभगिनिका हि सा ॥१६॥

अपुत्रत्वेन पुत्रत्वात् पृथिवीरञ्जिका च सा ।
देशैक्ये प्रेरयामास तं नित्यं सहकारिणी ॥१७॥

पालपायुवराजश्च नाम्ना चोद्योतसेनकः ।
मातुलश्चाभवत्तस्य राजनीतिप्रशिक्षकः ॥१८॥

पितुर्गोरक्षकाल्याश्च पुरश्चरणकर्मणि ।
रतत्वाच्चापि तद्राज्यं मातृमातुलचालितम् ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्ययानुभवात्पुष्टः कूटनीतेः स्वशक्तितः ।
कौमारं वयसा यातो विवाहाय प्रकल्पितः ॥२०॥

कन्यान्वेषणसम्पत्त्यै सर्वत्र प्रहिता जनाः ।
विद्वांसो हितकामाश्च व्यवहारविदां वराः ॥२१॥

द्विचतुर्विंशराज्यानां कन्याः हित्वा तदिङ्गितैः ।
हैमकर्णी सुकन्या च माकवानी विनिश्चिता ॥२२॥

तैः शातिताश्च गोरक्षे शासका न हि चान्वयम् ।
समीहन्ते स्म तैः साकमेकतायां प्रबाधकम् ॥२३॥

सम्बन्धोऽन्यत्र योग्योऽपि चैकतायामयोग्यकः ।
यतो हि देशभेत्तारस्ते विभक्तिप्रियाः सदा ॥२४॥

एवं त्रयोदशे वर्षे विवाहोऽस्य प्रकल्पितः ।
स चैकतासहायः स्यादिति दृष्टिर्विभाविता ॥२५॥

इन्द्राख्या सा नृपतितनया रूपलावण्ययुक्ता
पट्वी शक्ता सदनकृतये चापि मातुः सहाया ।
भ्रातुः स्निग्धा प्रकृतिललिता शीलधर्मादिमूर्त्तिः
पत्राणां सा ग्रथनकुशला चाभवत् कर्मयोगा ॥२६॥

सौम्याकारा पृथुलनयना स्वर्णवल्लीव नम्रा
गौराङ्गी सा विशददशना पुष्टगात्रा सुभाला ।
लम्बग्रीवा कृशकटिमया पुष्टजङ्घानितम्बा
कन्या दृष्ट्या नरपतिजनैः स्वीकृता दीयमाना ॥२७॥

वर्ये लग्ने ग्रहविषमकान् शान्तयित्वा सुपूज्य
विप्रान् देवान्, नरपतिजनाः पञ्चवाद्यैः समेताः ।
सैन्यै र्वाद्यैरपि कृतमुदः पङ्क्तिबद्धा वराग्राः
दध्ना पूर्णैः कलशिवरकैश्शाकभारैर्ययुस्ते ॥२८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गीतिं नृत्यं युवनृपवरस्वानुकूलं मनोज्ञं
कुर्वन्तस्ते विविधवसना राजकीयैश्च वस्त्रैः ।
युक्ताः काले बहुवसुमयं हेमकर्णीयहर्म्यं
अश्वारोहा गजगमनकाः प्राप्तवन्तो वरेण ॥ २९॥

भैतिक्यस्ता विविधरचना हैमकर्णीर्विलोक्य
चावासार्थं रचितशिविर –सौध–भोज्यानि पीतिम् ।
दृष्ट्वा भुक्त्वा वरमनुगता नर्त्तका वादकाश्च
आतिथ्येनाथ च बहुविधेनादृताश्चित्रमापुः ॥३०॥

मार्गाः रथ्या नृपतिभवनं दीपपुञ्जैः प्रदीप्तं
रात्रिः पूर्णा दिनयति रुचा भ्रान्तिभाजोऽनुयाताः ।
केचिद्वैवाहिककृतिरताः केऽपि वाद्यादि नृत्यं
स्वादं स्वादं निजशिशयिषां दूरयन्तो बभूवुः ॥३१॥

दानाधारं सकलशुभदं कारयित्वा च कृत्यं
कन्या रूपेऽतुलितविभवा मण्डपं भूषयन्ती ।
सालीका सा कनकखचिता चन्द्रहारेण दीप्ता
ध्वान्तग्रामान् निरसनपटुनिर्निमेषञ्च दृश्या ॥३२॥

कान्त्या नैज्या ह्युपचितविभश्चन्द्रहारश्च तस्याः
नैजं कोष्ठं गृहपरिसरान् सन्निवेशान् चकास्ति ।
हारे तस्मिन् सति तिमिरकं तूलवच्चानलेन
नष्टिं याति झटिति विततं सोदरत्वात्कृशानोः ॥३३॥

कन्यादाने कृतमतिनृपस्तादृशी चापि राज्ञी
तद्दानार्थं वरकरयुगे स्थाप्य कन्याकराग्रान् ।
पक्षद्वैतानुगत–पुरुषैर्वाक्प्रबन्धं ह्युदीर्य
वाद्यैर्वेदध्वनिसहितकैर्दत्तवन्तौ समोदम् ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिन्दूराणि प्रचलितपथेनैव दत्त्वा विवाहः
शिष्टैः कृत्यैः सह परिणतोऽभिन्नतायाः प्रयोक्ता ।
कन्या प्रेष्या भवतु न च वा सैव कालेऽत्र दत्ता
बाल्यात्तस्या इति नरपतिः पट्टराज्ञ्या व्यमृक्षत् ॥३५॥

कौशल्याया भवति वधुका यद्यपीयं हि बाला
ज्येष्ठा श्वश्रूः प्रभवति परं तत्र सौधे कठोरा ।
तस्याश्चाज्ञां विमृशति यदा पालनीया न वेति
तस्मिन् काले बलमतिमती सक्षमा याति नाद्य ॥३६॥

बालिकाभावसत्त्वेऽपि तदीयप्रेषणात्ययः ।
महत्त्वाहङ्कृतेर्जातो विवेकाच्च पराङ्मुखः ॥३७॥

गोरक्षामूलराज्यस्य लघुत्वादसमादपि ।
ज्येष्ठायाः सक्रियत्वाच्च तुच्छता तत्र भाविता ॥३८॥

हिन्दूपतिरिति ख्यातो राजा चैश्वर्यभाजनम् ।
राज्ञ्या सहैव याति स्म अहङ्कारप्रदर्शने ॥३९॥

दिग्बन्धनेन पुत्रेण हस्ति–हारनिमित्ततः ।
परुषोक्तिः कृता तीव्रा मातृ–भूविषयापि च ॥४०॥

वरस्य तेन यूनश्च मानिनो नायकस्य च ।
मानसं दावमापन्नं विद्रोहाय प्रवर्त्तितम् ॥ ४१॥

मानोच्छेदां परुषभणितिं चारजातैर्निशाम्य
व्यूढा कन्या पतिगृहगतौ नास्ति प्रेष्येत्यवेत्य ।
कालूपाण्डेप्रभृतिकृतिभिर्मृष्टवान् वीरपृथ्वी –
दत्ता प्रेष्या करिवरयुता चन्द्रहारान्विता चेत् ॥४२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हैमे सौधे द्युतिमयपदश्चैकदन्तश्च दन्ती
आसीद्वर्यो शुभशकुनको यावनाग्र्येण कान्तः ।
देयः पुत्र्यै सविधि ननु तच्चन्द्रहारेण साकं
प्रस्तुत्यैतत् प्रतिनिधिवरास्तर्कयुक्त्योर्दृढास्ते ।४३।।

राजा हेमः प्रकृतविषये गोष्ठिकायै प्रवृत्तः
पक्षद्वैतं लसितमभवत् तत्र राजप्रभावे ।
वृद्धिं याते वदति स रुषा नैव हारादि देयं
कन्यां बालामपि वितरितां क्रूरभावेष्वनर्हाम् ।।४४।।

प्रस्थाप्यैषा परकरगता चन्द्रहारादियुक्ता
कन्यादाने सति सकलकं वस्त्रभूषादि दत्तम् ।
बोध्यं राजन् ! परमकृतिना नीतिवेत्त्रा त्वयापि
तद्रक्षायां न कुरु मनसो व्यग्रतां सास्मदीया ।।४५।।

गोरक्षाख्यं लसति विदितं राष्ट्रमेकं पुराणं
न्याय्यं काल्या रचितरचनं स्वात्मरक्षाप्रगल्भम् ।
अस्मल्लक्ष्यं धरणिधरणं रक्षणीयाश्च सर्वाः
किं ते बाला न भवति सदा गोपिताऽसद्विवादात्? ।।४६।।

पृथ्वीसाक्ष्ये नृपतिशिखरे बोध्यमानेऽपि सर्वैः
सालङ्कारां वरकरगतां नेष्टवान् तां विदातुम् ।
रुष्टो रक्तो वदति सहसा हारदाने न बाध्यो
दत्तायान्ते भवति निजता नैव सौदायिकेषु ।।४७।।

सर्वं बुद्ध्वा वरबुधयुवा नायकस्तत्सभातो
गत्वाऽऽवासान् निजसहचरैः साधु वार्त्तां विधाय ।
यातॄन् सर्वान् वरविषयकान् सूचयित्वा च शीघ्रं
मानी प्रागादसहजगतिस्तद्विसृष्टिं विनैव ।।४८।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रत्यावृत्तौ सचिवकनकं वानियां प्रैषयत्स
गत्वा यत्नं बहुविहितवान् पादपद्मे निपत्य ।
मानी धीरो युवनृपवरो दूरयन् तस्य याच्ञां
गोर्खां प्राप्तः स्वगुरुसहितान् तातवर्याननंसीत् ॥४९॥

व्यूढाहीनं वरयुवनृपं दोलिकां चापि रिक्तां
दृष्ट्वा राज्ञस्त्वसहजतया चित्रलेखायितास्ताः ।
तथ्यं बुद्ध्वा वरवचनतो मातरो दैन्यभाज-
श्चान्ये खिन्ना वरसहगतैर्बोधिताः क्षीणहर्षाः ॥५०॥

सर्वारम्भा नववरवधूस्वागताय प्रयुक्ता
रोधो ज्योतिर्दलनविषयः सौधविष्टिः सपर्या ।
शान्ता व्यर्था वरभगिनिका वित्तवस्त्रैर्विहीना
राज्ञ्यो मान्याः समुपहतितो वञ्चिता दैवयोगात् ॥५१॥

क्षिप्रं व्यूढाऽऽनयनमथवा प्रेषणं हेमकीयं
दुःसम्भाव्यं नृपति-सचिवैर्मातृभिर्मन्त्रयित्वा ।
तस्योद्वाहो भवतु समये चापरः सत्फलाय
चेत्याशास्ते हितकरजनप्रेषणे सम्मताश्च ॥५२॥

वृत्तान्तेन प्रकृतविषये हेमयुग्मोद्भवेन
पारम्पर्यात् प्रचलितकुले निस्पृहा सा विवोढुम् ।
भानुं जोसिं त्वविचलमना कन्यकान्वेषणायै
काशीं ज्येष्ठा गमयति समैर्मन्त्रयित्वा सुतीक्ष्णा ॥५३॥

तीर्थे वासं बहुसमयतः पण्डितः श्रीजयाख्यः
कुर्वन्नासीत् विगतविषयो धर्मकर्माणि चापि ।
तद्द्वारैव प्रतिनिधिजनो भानुनामा हितैषी
कन्यारत्नं समधिगतवान् भूमिपत्युः सुगुण्याम् ॥५४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काश्यामेको विपुलधरणी राजपूतः कुलीनः
ख्यातः कीर्त्त्या स च हृयभिपुरो मानपश्चश्च सिंहः ।
पुत्री काम्या गुणविभवतो रूपशीलैः सनाथा
लक्ष्मीवद् या नरपतिहिता सा नरेन्द्रेति लक्ष्मीः ॥५५॥

कन्यां दृष्ट्वा कुलविषयकं चानुकूल्यं विमृश्य
कन्याताततो जयबुधयुतो भानुना चापि युक्तः ।
गोर्खां प्राप्तो वरनिजजनैः साधु वार्त्तां विधाय
कन्यादाने विहितधिषणः कालिकां तां ददर्श ॥५६॥

प्रातःकाले सुविहितकृतिस्त्यक्तकैलासकूटो-
द्रष्टुं सिद्धं शिवगुरुवरं श्रद्धितोऽगाद्विनीतः ।
दृष्ट्वा सिद्धं गिरिशिखरतो दर्शनीयञ्च दृश्यं
वाचा दत्त्वा नृपसदनतो निर्ययौ स्वालयाय ॥५७॥

लग्ने श्रेष्ठे सकलविधिभिः शान्तयित्वा ग्रहादीन्
देवान् पूज्यानपि सुविधितः पूजयित्वा नरेशः ।
लक्ष्म्या विष्णोरिव विहितवान् पाणिपीडां सुतस्य
वंशोन्नत्यै निजजनिभुवश्चैकतायै सतर्कः ॥५८॥

युक्ते सौधं बहुविधगुणां तां नवोढां प्रविष्यं
दृष्ट्वा सर्वा नृपसदनके वर्त्तमानाः समस्याः ।
शान्तिं याता युवनरपतिर्हर्षितः प्राप्तलक्ष्म्या
देशस्यैक्ये सुविहितमतिर्योजनाग्र्याँश्चिचिन्त ॥५९॥

पत्नीयुक्तो धनबलयुतो विंशवर्षीयकोऽसौ
कैलासाख्ये भुवनविदिते रामसाहीयपीठम् ।
राज्यायालं नरपतिनरैश्चाऽभिषिक्तो विधानाल् -
लोकान् रञ्जन् विविधकृतिभिस्त्वध्यतिष्ठन्महीयान् ॥६०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लक्ष्ये नित्यं कृतमतियुवा वीरवर्यो मनस्वी
युद्धे सज्जां झटिति कृतवान् पार्ष्णिशुद्धिञ्च ऋद्धाम् ।
रक्षाशत्रून् बलनियमतो दूरलक्ष्यो नियम्य
देशस्यैक्ये प्रखरतरसा पूर्वदेशान् स्म याति ॥६१॥

गुरुवरकृपयासौ प्राप्तगव्याशिराढ्यः
सदयमहिषमर्दिन्यानुकम्पाप्तखड्गः ।
सकलनिजजिगीषापूरणे सिद्धखड्गो
निजबलकृतयुद्धो नव्यकूटं जिगाय ॥६२॥

शाके षोडशपूर्वे हि चाष्टसप्ततिपश्चिमे ।
शिवपुरीति विख्यातं ततः पृथ्वी जिगाय च ॥६३॥

मकवानपुरं पश्चादेकीकरणहेतवे ।
श्वशुरस्य पुरं सिंहो जितवानरिसूदनः ।६४॥

कीर्त्तिपुरेण सहिते काष्ठमण्डपपाटने ।
निगृह्य चैकतां नीते बलैश्वर्यप्रवर्धके ॥६५॥

शाके षोडशपूर्वे च त्रिणवत्या युते शुभे ।
त्रितुङ्गं तत्परिसरान् जित्वा गोर्खामवर्धत ॥६६॥

वर्षद्वयानन्तरञ्च चौदण्डिविजयां पुरम् ।
सिक्किमञ्चापि तिष्यान्तं जितवान् वीरकेशरी ॥६७॥

धर्मशासकवीरोऽसौ विजिताननुरञ्जयन् ।
एकतां द्रढयन् धीरः पश्चिमं सबलोऽक्रमीत् ॥६८॥

पीडितान् दैन्यभाजश्च रोगिणः प्रोन्नयैषिणः ।
सहयोगप्रदानेन चोद्धृताः प्रेरिता अपि ॥६९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुराणायुधजातानां परिष्कारश्च तेजनम् ।
नवानां रचना चापि कारितं दूरदृष्टिना ॥७०॥
तदर्थं चायुधोद्योगाः स्थापिता विविधा भुवि ।
स्वदेश्याश्चान्यदेश्याश्च दक्षास्तत्र नियोजिताः ॥७१॥

बलिनः शौर्यसम्पन्ना एकतायां दृढाशयाः ।
गोरक्षदेशा अन्ये च हेतिज्ञा रक्षिता बले ॥७२॥

पश्चिमान् सन्धिकार्येण शान्तान् कृत्वा च नीतितः ।
पूर्वान् जिगाय पृथ्वी सः बलवृद्धौ च तानपि ॥७३॥

एकताभाजकान् सर्वान् राज्ञो जित्वा महोदयः ।
मृगान् सिंहो यथा पश्चात् लम्बयुग्मान् जिगाय सः ॥७४॥
एकीकृताँश्च भूभागान् रक्षन् नित्यं विचक्षणः ।
योगक्षेमे जितानाञ्च सदैव सक्रियोऽभवत् ॥७५॥

दुःखदारिद्र्यरोगाणां शोषणस्य च निग्रहात् ।
नवतानुभवे याता जनता जेतृशासने ॥७६॥

आपेक्षिकस्य देशस्य महतो जनता वयम् ।
इति गर्वसमायुक्ता उन्नत्यै विहितत्वराः ॥७७॥
क्षेत्र–केदारवैपुल्ये विद्यावत्सु सुतेषु च ।
जना गर्वेण फुल्लन्ति यथा नागरिकास्तथा ॥७८॥

सतर्का राष्ट्रवादे च वीरुधन्नप्रवर्धकाः ।
स्वावलम्बनतीव्राश्च जनाः सैनिकभावनाः ॥७९॥

नेतृणामनुगन्तारो देशवर्धनकाङ्क्षिणः ।
अभूवन् कर्मभिर्युक्ता एकतातथ्यगामिनः ॥८०॥

ततश्च एकताकार्यं पुत्रपौत्रादिपूरितम् ।
नव्यदेशार्जनञ्चापि बलानुग्रहतः कृतम् ॥८०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतापसिंहपुत्रेण भ्रातृभिस्तस्य पुत्रकैः ।
पूर्वपश्चिमयोस्तिष्टाकाँगडान्ता व्यधायि भूः ॥८१॥

एवं गौरवशालियुक्तिरचितो रक्तार्जितः पूर्वजै-
र्नेपालो बत विस्तृतो भुवि समैर्भिन्नः कथं सह्यते ?
पृथ्वीमल्ल इवातिशौर्यधनिकः पृथ्वी महानायक-
ऐक्ये वीरवरैः सहात्र विषये किं भो वदेच्चिन्त्यताम् ॥८२॥

गर्भात् सूचितभानुचण्डविभवो बाल्याच्च तादृक्क्रियः
उत्साहैरतिमानुषैः प्रयतनै र्युक्तो तथा कार्यकृत् ।
देव्याः खड्गवरेण गोरखगुरोर्दध्नो वरेणापि च
युक्तोऽवस्थिवितीर्णखड्गमहितो जीव्याच्चिरं चेतसि ॥८३॥

अतुलितबलबुद्धिर्निश्चिते दत्तदृष्टिः
कृतिफलसमयान्तं कार्यकारी नितान्तम् ।
निजभुवि नयपाले दत्तस्वाकाररूपो
वितरतु दृढमूलामेकतां स्वावलम्बम् ॥८४॥

तव कृतिशिखराणामज्ञतायां गतानां
तव रचिततनूनां ध्वंसने शौर्यभाजाम् ।
सहनपरगतानामागसामर्जकानां
गणनविधिविरागं मातृभूरीहते त्वाम् ॥८५॥

पृथ्वीवीरस्य साफल्ये वर्णिते चैकतामये ।
राज्यसञ्चालिका नीतिरग्रिमे तस्य वर्ण्यते ॥८६॥

दिव्योपदेशनाम्ना वै स्वानुभूतिर्वितीर्यते ।
नेपालशासनेऽद्यापि पालनीया विराजते ॥८७॥

इति पृथ्वीनारायणस्योपनयन-विवाह-नेपालैकीकरणवर्णनं नाम सप्तदशः परिमलः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अष्टादशः परिमलः

पृथ्वीनारायणस्य दिव्योपदेशाः

भवन्ति वीरा विदुषश्च देशजा निजानुभूत्या स्वजनस्य पोषकाः ।
हितस्य देशस्य जनस्य काङ्क्षिणश्चात्मानुभूतीर्वितरन्ति भाविषु ॥१॥

बुधोऽथ पृथ्वी नृपनीतिकोविदो देशैकतावर्धकधर्मरक्षकः ।
बभूव देशस्य हितस्य चेच्छुको दिव्योपदेशान् प्रददौ स ऋद्धये ॥२॥

संघर्ष–निर्माण–तपःक्रियायुते सुजीवने चोच्चतमे च लक्ष्यके ।
विशिष्टतायुक्तसुकार्यनाथितेऽनुभूतिगम्याः कथिता हिताप्तये ॥३॥

स्वतन्त्रता निर्भरता निजे सदा स्ववस्त्रभूषाजनिभूप्रपत्तिता ।
खनेर्विकासः कृषिवर्धनं हितं जनैर्विधानीयतया निगीरितम् ॥४॥

स्थितिश्च रीतिश्च निजा विशेषता सुरक्षणीया कलया समन्विताः ।
सुसभ्यता–संस्कृति–धर्मदर्शनं सदा समैः स्वोन्नतयेऽपि रक्ष्यताम् ॥५॥

भवन्ति बोधाश्च सुशास्त्रशिक्षया निजानुभूत्या हि समर्जिता अपि ।
वितीर्णतायां द्वितयस्य भाविषु शुभं करोत्येव परीक्ष्य भावितम् ॥ ६॥

हितोपदेशेन विचारबोधनात् परम्परारूपतया प्रचारणात् ।
त्वदीयतो मामकबान्धवाः सदा मदीयतो लाभयुताश्च तावकाः ॥७॥

सदैव भाषा लपने पृथग्भवा, शब्दात्मशास्त्रस्य ह्यपूर्णकाऽपि सा ।
नवा नवा संसरति प्रयोजने तथैव सुज्ञानगतिःसदेष्यते ॥८॥

तथैव वृद्धात्ययतो नवो जनः साफल्यभागीति विचारयन् नृपः ॥
वितीर्णवान् आत्मजनेषु कोविदो निजानुभूतिं जनिभूहितावहाम् ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विकासकार्यं स्वनुभूतिसम्भवं प्रक्रान्तकार्यस्य परैश्च पूरणम् ।
इतोऽपि देशैक्यविकासहेतवे दृढानुभूतिर्महता वितीर्यते ॥१०॥

विकासकार्याणि महान्ति भूरिशः सुसम्भवानीति यथार्थसत्तया ।
सम्पूर्त्तये चैक्यविकासकर्मणोरुपादिशद्दिव्यमयान् स राजराट् ॥११॥

त्रिशूलिकावामभवे तु कूटके नवे वसन्नेकितभूमिहर्षितः ।
निजात्ययं साधु विभाव्य कर्मठः प्राशिक्षयद्राष्ट्रहितानि सर्वशः ॥१२॥

निजेषु दायादवरेषु मन्त्रिषु पुरोहिते देशिकषट्स्थलेषु (थरेषु)च ।
बुधेषु वृद्धेषु हि सत्सु नायक उपादिशद्राष्ट्रहिताय तथ्यकम् ॥१३॥

स ऊर्जया दूरदृशा सदान्वितस्तथापि काली–शिवगोरखाश्रयः।
अतश्च लेख्येषु शिवश्च कालिका सहाय इत्येव लिलेख सादरम् ॥१४॥

परम्परायामपि चालितं द्वयं रणेन पौत्रेण ततोऽपि वर्धितम् ।
पृथ्वीसहायेति च लेखनादिके ततश्च तेषां त्रितयं सहायकम् ॥१५॥

निजस्य शौर्येण च दूरदृष्टितो गुरोश्च काल्याः सहयोगकार्यतः ।
जिगाय वीरः पृथिवी स भाजकान् फलान्वितश्चैक्यविधौ समादृतः ॥१६॥

सुदूरदृष्टिर्नृपतिर्निजान् हितमबोधि गोपायनपूर्वकं सदा ।
निजस्य राज्यस्य, ततः पराक्रमः फलाय कल्पेत विवृद्धशक्तिकः ॥१७॥

सुपार्ष्णिशुद्धिं प्रविधाय शासको युगानुकूलैर्निशितायुधैर्युतान् ।
प्रशिक्षितान् वीरवरांश्च सैनिकान् सुवेतनान् योग्यपदांश्च योधयेत् ॥१८॥

सदा महत्त्वं ह्यभिकाङ्क्षयतां नृपैरभीष्टजेयस्य समीक्षणं भवेत् ।
विमृश्य विज्ञैरतिशक्तिता यदि युधापि भागानपि मेलयेद् बुधः ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नृपैर्महत्त्वं यदि नेहितं सदा कथं प्रकर्षोऽथ च भौतिकोन्नतिः ।
लघोश्च राज्यस्य कथं विशालता ? कथं शुभैकीकरणस्य लब्धिता? ॥२०॥

प्रसिद्धशौर्यान् सकलोत्तमान् जनान् विधाय सैन्यं बलिनः प्रतीतिनः ।
निजस्य नेतृत्वतया जयाय च बुधेन राज्ञा सबलेन गम्यताम् ॥२१॥

विशिष्टतायुक्तजना विशेषिते पदे नियोज्या न तु योगभाविताः ।
विराजनामा न मया नियोजितो ह्यमात्यतायां मम चोपकारकः ॥२२।

स जीवने यद्यपि मेऽस्ति साधको मदीयतीर्थाटनकादिरक्षकः ।
तथापि लोकानुमतेरपेक्षया ह्युपेक्षितः सोऽस्ति वृतोऽस्ति कालुकः ॥२३॥

सुयोग्यकान् योग्यपदे नियुज्य तैः तदीयभागस्य विकासनं भवेत् ।
अतश्च तथ्याद्धि जनानुमोदतः स कालुपाण्डेयवरे तु मन्त्रिता ॥२४॥

अधीतिनः शूरतमाः शुचिप्रियाः कुलोद्भवा देशहिता नयप्रियाः ।
सुदण्डनीतौ कुशलास्तपस्विनः सुलक्ष्यकाः स्युः सचिवाः परीक्षिताः ॥२५॥

बलेन सार्धं समयानुकूलता युधे प्रयाणाय सदैव पालिता ।
भवेद्विजेतुं ह्यत एव पण्डितैः प्रयाणकालस्य शुभस्य निर्णयः ॥२६॥

लघुश्च एकीकृततोऽपि देशकस्तरूलवदुत्तरदक्षिणाश्मनोः ।
विधीयतां तद्द्वितयेऽपि सन्धिता यया न रुष्टौ भवतां कुचेष्टया ॥२७॥

सुसन्धिना संहितकोऽपि दक्षिणः पराजितस्तज्जनिभाग्भिराकुलः ।
समाक्रमस्तस्य भवेद्धि छद्मतः ततः सतर्कैरनिशं प्रभूयताम् ॥२८॥

सुरक्षणं सीमनि मार्ग–पद्धतौ विशिष्टकं साधु सदैव साधितम् ।
भवेच्च गुप्तं चरताञ्च पापिनां निरोधनं येन भवेत् सनातनम् ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समुच्चतुङ्गेषु च कूटभूमिषु शतघ्निकारक्षणचालनं भवेत् ।
दलञ्च सीमाऽवनकार्यकारिणां यतो भवेद् रोधविधिश्च सागसाम् ॥३०॥

फिरङ्गिणां लक्ष्यविधौ विभावितः शिवालयः काष्ठमयश्च मण्डपः ।
स सर्वदा रक्षणभाक् समैर्मतः तन्मूलमार्गेष्ववरोधसम्भवम् ॥ ३१॥

बलीयसि स्वाक्रमणं सदैव न विधीयतां किन्तु शमेन सन्धिता ।
निजे परस्याक्रमणे तु घातके प्रदर्श्य खड्गानरिमर्दनं भवेत् ॥३२॥

विवेकराहित्यमयस्त्वराकृतः पराक्रमो देशविखण्डकोऽपि च ।
भवेद्धि गत्वाऽऽक्रमणं न तेन च पराक्रमे छेदनभेदने त्वरेः ॥३३॥

महेन्द्रमल्लेऽपि च रामसाहके जयस्थितौ साधुविधिर्विलोकितः ।
समैश्च सौराज्यविधौ प्रवर्त्यतां पणेषु शौचं सततं विधीयताम् ॥३४॥

अवञ्चनीया जनिभूश्च वित्ततः करच्छलं नैव विधेयमस्ति च ।
उपत्यकामार्गसुचालनैरपि निरुद्धमार्गान्तरणेन शौचता ॥३५॥

गिरिव्रजाः प्राकृतिकाश्च दुर्गका न लङ्घने कोऽपि भवेत्फलान्वितः ।
महीध्रभग्नस्थलसैन्यरक्षणे न कोऽपि नेपालभुवं वशं नयेत् ॥३६॥

वणिग्जना देशभवाः प्रतीतिनः विनिर्मितौ वस्तुविधासु योजिताः ।
न शोषका द्रव्यहराश्च छद्मिनः विदेशजास्ते हि सदैव चार्जकाः ॥३७॥

विदेशतः शिल्प-विधौ प्रशिक्ष्यतां तज्जातकानां प्रभुता निषिध्यताम् ।
विदेशवस्त्रादिनिषेधनं भवेद् वणिग्जनान् देशभवान् प्रवर्धयेत् ॥३८॥

स्वदेशवस्त्रादि समैः प्रयुज्यतां स्वनिर्मितेर्विक्रयणं विधीयताम् ।
समुच्चरूपाणि निदर्श्य कर्मठान् कुटीर-कर्मालयकादि चाल्यताम् ॥३९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुतन्तुवायैर्गृहनिर्मितांशुकं सदाभवं स्थूलसुतन्तुभावितम् ।
सदा प्रयुक्तं हि मयापि सज्जनैः सुचाल्यतां भाविनि नो पराश्रयः ॥४०॥

निमित्तमात्रं किल चास्मि चैकतासुकार्यजाते जनता धुरन्धरा ।
सुपुष्पवाटी जनिभूः प्ररक्ष्यतां कुलस्य धर्माचरणादि चानिशम् ॥४१॥

न वञ्चनीया जनिभूः प्रशासकैस्तदीयभृत्यैः स्थिरसर्वकारकैः ।
विकासनं देशगतं तदाहितं यतो हि ते तल्लवणाशिनः सदा ॥४२॥

सदा जनानां च धनेन जीविभिः सुकार्यजातैः प्रथितिर्विधीयताम् ।
जनेर्भुवो वृत्तिभुजश्च कर्मठास्तदानुकूल्येन चरन्तु नित्यशः ॥४३॥

जनैः प्रदत्तेन करेण जीविभिर्न वञ्चनीयाः करकार्यचोरणैः ।
भवेद्यदा वञ्चकता प्रमाणिता सा दण्डनीया भवितेति घोष्यताम् ॥४४॥
जनाः सदा न्यायपथा चलन्तु ते न वञ्चनीया नयतोऽथ शिक्षया ।
अलब्धितस्तद्द्वयकस्य नित्यशो विद्रोहतस्तस्य गतेर्निरोधकाः ॥४५॥

सुसिद्धये नागरकर्मणां द्रुतमनीतितः सङ्ग्रहणं पणात्मकम् ।
जनैः प्रदत्तं ह्यपि गर्ह्यतां गतं सुदण्डनीयमुपदात्मकं समम् ॥४६॥

धनेन जीवात्ययेनेन तद्द्वयं सुदण्डनीयं नृप–शासनादिभिः ॥
न चात्र पापोपचयोऽस्ति तावक उभौ च तौ शत्रुतया विभावितौ ॥४७॥

विकासकार्येषु वितीर्णराशितःप्रभूतवित्तादनतो निरन्तरम् ।
अपूर्णकार्याणि तनूनि तानि च त्वदीयदेहो जनिके ! हि दुर्बलः ॥४८॥

विदेशसाहित्यविधासु चैव न नयस्य सम्पादनरीतिचातुरी ।
सरस्वतीवाङ्मयराशिराजिता स्वकीयसम्पत्तिरतोपि चालिता ॥४९॥

प्रपीडिता न्यायविनष्टितो भृशं भवन्ति विद्रोहमयास्तु घातकाः ।
अतश्च सन्न्यायविधेश्च लम्भकाः स्युरेव लोका इति सर्वगम्यता ॥५०॥
कृषिश्च सूद्योगभवञ्च सम्पदा तया समं स्वाकरजानि सा मता ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अतश्च सत्ताप्रमुखेन चाकराः समीक्ष्य धातुप्रचयाः सुचालिताः ॥५१॥

खनिस्थले ग्रामततेरपि स्थितौ ह्यपास्य चान्यत्र च ते सुचाल्याः ॥
यतो हि भाण्डादि कृषेश्च साधनं सुभूषणं चाकरसम्भवानि हि ॥५२॥

जलस्य सौविध्यमये च भूस्थले भवेद्यदा ग्रामवरश्च शोभनः ।
सुसार्य चान्यत्र विधाय वप्रकान् कृषिर्विधेया विविधान्नसम्भवा ॥५३॥

समस्थलं चान्नविधानयोग्यकं गिरिस्थलं सद्मविधानसम्भवम् ।
प्रपूर्य चान्नेन पिचण्डगर्त्तकं समुच्चगेहादवलोकनं वरम् ॥५४॥

क्षुधो निवृत्तेः प्रथमा विधेयता गृहस्य चावश्यकता द्वितीयका ।
तरोरधःसंवसनस्य सम्भवाद् विचार्य चेत्थं समभूर्न नाश्या ॥५५॥

अपास्य तथ्यं ह्यधुनान्धका जना घरेरितैर्मार्गविधानखेलनैः ।
समा हि सा चोर्वरतासमाकुला विनाश्यते निःस्पृहया कुबुद्धिभिः ॥५६॥

सदाऽसमे देशवरे शिलोच्चयैः समा च भूरन्नविधानसाधिका ।
सदाभिरक्ष्या नहि चालयादिभिर्विनाशनीया अपि मार्गनिर्मितेः ॥ ५७॥

न चान्नजातं क्रयणीयमस्ति वै विदेशतो, विक्रयणे पुरा रतैः।
सदोर्वरोत्पादनशालिदेशके निर्वस्तुता तत्क्रयणं न शोभते ॥५८॥

विवेक–बुद्ध्या ह्यपि कुटनीतितो बलेन रक्ष्या जनिभूः सनातनी ।
परे सदा छद्मचरा विरोधिनः पराभवेऽजेयजयेऽपि तत्पराः ॥५९॥

अलिश्च कास्मीरभवो हि कासिमः फिरङ्गितो हार्डिविधेयकिन्लकः ।
पुरा मदीयां शिवरक्षितां भुवं कुदृष्टितश्चाक्रमितुं व्यचेष्टताम् ॥६०॥

पुरीञ्च हैमीं बत चाक्रमीदलिः दुर्गञ्च सिन्धुं स च हार्डिचोदितः ।
दृढप्रहारैरुभयत्र मारिताः पलायितास्त्यक्तभूशुण्डिकाः परे ॥६१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समायुधैस्तत्र रणेषु लम्भितैः बलं मयाकारि परं सहेतिकम् ।
तेनापि मत्सैन्यबलं प्रवर्धितं विलोक्य नैवेहितवान् न कोऽपि तत् ॥६२॥

प्रशिक्षितं ह्यभ्यसितञ्च मद्‌बलं भयङ्करं विश्वबलेषु सादरम् ।
तदीयसूत्साहनतः प्रशंसन् स्वदेशरक्षां विदधीत शासकः ॥६३॥

स्वराष्ट्रवादं विदधीत शाश्वतं निजावलम्बो हि स्वयं प्रवर्ध्यताम् ।
मनोविनोदेऽथ च खाद्यवाससोः कृते न रूप्याणि बहिर्व्ययेन्नृपः ॥६४॥

स्वदेश्यवस्तूनि परे पणन्तु चेत् स्वयं न क्रीणाम परोद्‌भवानि च ।
जनैर्मदीया खलु चार्थिकी स्थितिः सदा दृढा स्यादिति चिन्त्यतां हृदा ॥६५॥

क्रयस्य विस्थापनतोऽथ विक्रयात् समुन्नतिर्वित्तमयी सदा भवेत् ।
गुणस्तरौ वस्तुषु साधु रक्षितौ सदा भवेतां बहुवस्तुवर्त्तिनौ ॥६६॥

मनोविनोदाय च देशनिर्मितां समुन्नतां नाट्यविधां प्रयुज्य च ।
सदा मनोरञ्जनतां लभेमहि न चैव बाह्यैर्मनसां प्ररञ्जनम् ॥६७॥

प्रशिक्षणादावपि बाह्यशिल्पिनः समागता शीघ्रतया निजां भुवम् ।
निवर्त्तनीया अपि देशगुप्तये ततोऽन्यथा गुप्तिविभेदनं भवेत् ॥६८॥

स्वदेशसम्पत्तिचयेन नागराः सदैव सम्पत्तिमया भवन्ति हि ।
अनेन तथ्येन सदैव जन्मभूर्विकासनीया प्रविधेश्च शिक्षया ॥६९॥

बलैर्जयः साधु तदैव सुस्थिरः यदा जितानां हृदयानि चात्मना ।
जितानि तेषामनुकूलभावनादनेन तथ्येन चरन्तु जित्वराः ॥७०॥

मनोश्च शुक्रस्य च धर्मशास्त्रतःसुबोधराशिं मनसा विभावयन् ।
प्रमथ्य विज्ञैर्जनताहितं सदा प्रशासकः साधु करोतु सत्क्रियः ॥७१॥
तपोमयश्चैकमयो निजाश्रयः सुनिर्मितेर्बोधक आशु शिक्षकः ।
सदैव चादर्शमयश्च जित्वरो हितोपदेशो भवतान्नृपोहितः ॥७२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महानसावैक्यविधानतस्तथा बलप्रवृत्तेर्विविविधप्रवर्त्तनात् ।
निजानुभूतेरुपदेशनादपि महत्तमो देशहिते सदा रतः ॥७३॥

उपकृति-हितकार्यात् सोऽस्ति नित्यं प्रणम्यो
ऽनुकरणविधियोग्यश्चास्ति राजाग्रगण्यः ।
अपि च सकलकार्यं दूषयन्तस्तदीयं
प्रतिकृतिविभवानां ध्वंसकाः निन्दनीयाः ॥७४॥

पर्यन्तकथनम् -

मातस्त्वदीयगुरुता पुरतश्च बोध्या
श्रीशङ्करो गिरिसुता च तपश्चरन्तौ ।
त्वत्प्राङ्गणे सुखमये लसतः सदैव
नेपालराज्यविभवं परिरक्षतश्च ॥७५॥

श्रीजानकीजनकराजवरश्च नित्यं
त्वत्कुक्षितस्तव यशः परिगानशक्तौ ।
सीतासुकीर्तिलतया किल नाकुजस्य
कृत्या च तावकगुरुत्वमयञ्च सिद्धम् ॥७६॥

श्रीबुद्धगोरखवरैर्निजदृष्टिसिद्ध्या
प्रख्यापितं तव यशो भुवि निष्कलङ्कम् ।
केनापि दुष्टमनसा न पराजिताऽऽस्से
चेत्येव गौरवगुणेन विशिष्यसे त्वम् ॥७७॥

अम्बे ! त्वदीयगुरुतां न हि वक्तुमीशः
स्तोकेन तुष्टिमयतां नितरां दधानः ।
सम्प्रार्थये जननि! तावक-गौरवाय
तेनैव ते कृतिमिमां चरणेऽर्पयेऽहम् ॥७८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गोरक्षाख्ये जनपदवरे लिग्लिगे रम्यकूटे
द्रव्याख्येन प्रखरमतिना रोपितैकात्म्यसूत्रे ।
श्रीमात्स्येन्द्र्या ध्वनिभिरनिलैर्दर्शनैः स्पर्शनैश्च
पूतो ग्रामो मिहगिरिरुची राउतेपानीनामा ॥७९॥

माता यस्य महाकाली लोकनाथश्च यत्पिता ।
नेपालगौरवं तज्जविष्णुना रचितं मुदा ॥ ८०॥

मम श्रद्धास्पदं देवाः विषयाः कवनस्य च ।
बुधाः ज्ञानाल्पतां वीक्ष्य क्षमन्तां बालकं यथा ॥८१॥

इति विष्णुदप्रसादो देवकोटा इत्यभिधानेन कृते नेपालगौरवमहाकाव्ये पृथ्वीनारायणस्य दिव्योपदेशनामाष्यदशः परिमलः ।

॥ इति नेपालगौरवम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काव्यकारपरिचयः

नाम –**प्रा.डा. विष्णुप्रसादः देवकोटा** ।

जन्मतिथिः –१९५१।६।१०।

जन्मस्थनम् – लिगलिगकोट, गोरखाजनपदः ।

पितृनाम –लोकनाथः देवककोटा

मातृनाम –महाकाली देवकोटा (गोमा देवकोटा)

धर्मपत्नी –श्रीमती विमलादेवी देवकोटा

पदम् –प्राध्यापकः सेवानिवृत्तः, नेपालसंस्कृतविश्वविद्यालयस्य ।

शिक्षा /उपाधयः –व्याकरणाचार्यः साहित्याचार्यः विद्यावारिधिश्च ।

प्राध्यापकानुभवः –३४ वर्षाणि षड्मासाश्च । भारते चत्वारि वर्षाणि च ।

पदभार – अनेकेषु अवधिषु व्याकरणविभागाध्यक्षः, एकावधौ परीक्षानियन्त्रकश्च नेपालसंस्कृतविश्वविद्यालये ।

कृतिप्रकाशनम् –व्याकरणप्रवेशिका, पर्वव्रतोत्सवमया अनेके लेखाः अनुसन्धानात्लकाश्च दैनिक–मासिकादिपत्रेषु प्रकाशिताः ।

सम्पादनम् –संस्मरणग्रन्थः (ने.सं.वि.संस्कृतविद्वत्सम्मेलनस्य –२०५३)
ऋतम्भरा (अनुसन्धानकेन्द्रम्, नेपालसंस्कृतविश्वविद्यालयः)

भ्रमणम्–भारतस्य संयुक्तअरबइमिरेटदेशस्य, कतारदेशस्य, अमेरिकादेशस्य च ।

रुचिकरो विषयः –स्वाध्यायो लेखनञ्च ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतं धर्मभूतये, जयतु संस्कृतं लोकभूतये ।
जयतु संस्कृतं राष्ट्रभूतये, जयतु संस्कृतं विश्वभूतये ॥

नेपालसर्वकारतः स्वीकृता सामाजिकी प्राज्ञिकी च सर्वकारीयेतरा संस्था

जयतु संस्कृतम् संस्थायाः प्रकाशनानि

१. मङ्गलग्रहः (काव्यम्) - डा. टीकारामः पन्थी
२. कृष्णाभिसर्पणम् (काव्यम्) - महाकविः भरतराजः मन्थलीयः
३. मीमांसातर्कभाषा - डा. काशीनाथः न्यौपाने
४. चन्द्रप्रभा (काव्यम्) - डा. टीकारामः अधिकारी
५. संस्कृतकवितासङ्ग्रहः (प्रथमपुष्पम्) - संयुक्तसम्पादनम्
६. कलमाक्षरचरितकाव्यम् - प्रा. तेजः केशरी शर्मा
७. संस्कृतमा के छ ? - अनुसन्धानात्मकलेखसङ्ग्रहः
८. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
९. प्राकृतपोखरा (संस्कृते) - अनुवादकः डा. लक्ष्मीकान्तः पन्थी
१०. लङ्कावतारसूत्रम् - अनु.डा. काशीनाथः न्यौपाने
११. चार्वाकदर्शनम् - प्रा. रेवतीरमणः खनाल
१२. गौतमन्यायसूत्रम् - अनु.प्रा. पद्मप्रसादः भट्टराई
१३. ब्रह्मसूत्रम् - अनु.प्रा.डा. दीर्घराजः घिमिरे
१४. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
१५. संस्कृतकवितासङ्ग्रहः (द्वितीयपुष्पम्) - संयुक्तसम्पादनम्
१६. कामकलाविलास - प्रा. विद्यानाथ उपाध्याय
१७. जैन दर्शन-तत्त्वार्थ सूत्रम् - डा. चन्द्रमणि नेपाल
१८. दर्शनसारामृतम् - लोकनाथ लुइँटेल
१९. मीमांसापरिभाषा- प्रा.डा. ऋषिरामपोखरेलः
२०. समिक्षात्मकग्रन्थ - ध्रुवभट्टराई
२१. ब्रम्हाण्डपुराण - डा. बद्रि पोखरेल
२२. नेपालगौरवम् (महाकाव्यम्) - प्रा.डा. विष्णुप्रसाद शर्मा देवकोटा
२३. संस्कृतकाव्यसिद्धान्त समीक्षा - डा. नवराज कट्टेल

जयतु संस्कृतम्
केन्द्रीयकार्यालयः, काष्ठमण्डपः, नेपालः
दूरभाषः ०१-५७०५३७१

ISBN 978-9937-9491-2-5
9 789937 949125

Jayatu Sanskritam, Kathmandu, Nepal